श्रीः ।

रामार्चनचन्द्रिका ।

परमहंसमुकुन्दवनशिष्य-आनन्दवनप्रणीता ।

पञ्चपटलात्मिका ।

गोमान्तकान्तर्गतपेडणेंग्रामनिवासि–
पणशीकरोपाह्वविद्वद्वरलक्ष्मणशर्मतनुजनुषा
वासुदेवशर्मणा
पाठान्तरादिभिः संवाद्य संशोधिता ।

साचेयं
मुम्बय्यां
पाण्डुरङ्ग जावजीमहाशयैः
स्वीये निर्णयसागराख्यमुद्रणालयेऽङ्कयित्वा
प्राकाश्यमानीता ।

शाकः १८४६, सन १९२५.

मूल्यं १ रूप्यकः ।

Scanned with CamScanner

[All rights reserved by the publisher.]

Published by Pandurang Jawaji at the 'Nirnaya-sagar' Press,
26-28 Kolbhat Lane, Bombay.

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya-sagar' Press,
26-28, Kolbhat Lane, Bombay.

Scanned with CamScanner

किंचिदत्र प्रास्ताविकम्—

निबन्धप्रणेत्रैवोपसंहारे ज्ञापितमैतिह्यमत्र निर्दिश्यते येन ग्रन्थहेत्वाद्यखिलैरनायासेनावबुद्धं स्यात् ।

"संसारदावानलतापशान्त्यै श्रीरामचन्द्रार्चनचन्द्रिकेयम् ।
स्यात्संहितामार्गमुपाश्रयद्भिर्भवादिभिर्निर्मितमौषधं यथा॥
पटलैः पञ्चभिः प्रोक्ता श्रीरामार्चनचन्द्रिका ।
आनन्दवननाम्ना हि यतिना रामतुष्टये ॥" इति ॥

रामार्चनचन्द्रिकाख्योऽयमपूर्वोऽर्चादिनानाविषयको निबन्धो नातिमहानपि विद्वद्ग्रेसरात्यन्तादरणीयमहानिबन्धेष्वापादिताऽऽसनत्वेन महानिव वरीवर्ति । प्रणेता चास्य महावैराग्यसंपन्नो मानुषप्राणिनां परमनिःश्रेयसत्वेनोद्घुष्टचतुर्वर्गीयचरमवर्गतया परिगणितमूर्धन्यापवर्गाख्योच्चपदारूढोऽखिलवर्गीयजननमस्यः पारिव्राज्यनिःशेषगुणगणमण्डितः परिव्राट् परमहंसमुकुन्दवनस्वामिकरकमलसंपादितमस्करिदीक्षः परमहंस **आनन्दवनस्वामी**ति अस्मिन्निबन्धे तन्निबन्धृनिर्देशादेवावसीयते । परंतु सोऽयं महामहिमविलासोल्लसितो महाशयः कदा कतमं वसुंधरामण्डलं मण्डलप्रदेशं वा निजजनुषा मण्डयांबभूवेति प्राचीनैतिहासिकैतिह्यानुपलम्भाद्यथावन्निर्देष्टुं यद्यपि न प्रभवामः अथापि पञ्चशतशरद्भ्यः प्राक्कालीन आसीदिति सुवचं निर्देष्टुम् । यतः प्रायः प्रचलितधर्मशास्त्रीयमहानिबन्धेषु तत्र तत्र व्रतादिनिर्णयावसरे "तदुक्तं रामार्चनचन्द्रिकायां"; "रामार्चनचन्द्रिकायां तु" इत्याद्यन्यतमान्यतमवाक्यैरस्योल्लेख उपलभ्यते; तेन निःशङ्कमखिलैरपि निश्चेतुमलं रामार्चनचन्द्रिकेयं प्राच्यैर्निबन्धृभिर्न केवलमियमालोडिता किंतु स्वस्वनिबधेष्वासनवितर-

Scanned with CamScanner

णेनात्यन्तं संमानिता चेति । ग्रन्थकारोऽयमुररीकृतसंन्यासदीक्षोपि पूर्वाश्रमात्प्रभृति श्रीरामचन्द्रचरणनलिनतलीनः परमभागवतो वैदिक-तान्त्रिकोभयतन्त्रप्रवीण आसीदित्युभयतन्त्रसंवलितललितप्रयोग-संगुम्फनेन जगदुपकारबद्धपरिकरोऽरीरचदमुं पूजाप्रामाण्यवचनोपन्यासात्मकं ग्रन्थं परं न साधीयसः प्रयोगान्निबबन्ध येन ये केचन सामान्यज्ञानिनोऽप्यनेन ग्रन्थेन प्रयोगान्पारयेयुः किंतु प्रयोगपाटवसंपन्नयाञ्चिका एवात्र मुख्याधिकारिणोऽकृतकार्याश्च भवेयुः । मन्ये तेन न साधीयसीयमदसीया ग्रन्थसरणिरिति । निबन्धकारेणापि सामान्यतः स्वस्यौदासीन्यं चरमभागे प्रकाशितम् । तदित्थम्—

ब्रह्मानन्दनिमग्नस्य नालं मे स्यात्स्थिरं मनः ।
त्वत्पादपद्मगन्धेन यथा स्याज्ज्ञानकीपते ॥
न कामतापो न तमोस्ति मे यतः प्रकाशिता तेऽर्चनचन्द्रिकेयम् ।
तुष्टो भव त्वं सुकृतेन तेन यस्मात्त्वदन्यन्न हि रामचन्द्र ॥ इति ।

अनेन ग्रन्थकर्त्रा नान्ये निबन्धा अनुबद्धा दृष्टश्रुतचराः क्वापि सन्ति ।

बहोः कालादारभ्य श्रीरामार्चनचन्द्रिकेति परं स्पृहणीयं पूज्यं च नामास्माकं दृष्टिसरणिं यदायदारूढं तदातदा क्व कुतः कदा वेमं निबन्धमुपलभेमहीति तीव्रतरास्मिन् लालसासीत् । अन्तरान्तरा च क्वचित् श्रीरामभक्तिपरायणैर्विद्वद्भिरपि भूयोभूयः पृष्टं भवद्भिरयं ग्रन्थो दृष्टः श्रुतो वेति । कैश्चिच्च निर्णयसागरे मुद्रित इति बुद्ध्या प्रेषणीय इत्यपि । तथाप्यस्य सुतरामलाभान्नास्माकं सविधेऽस्तीत्येवोत्तरितं महता कष्टेन तल्लाभार्थं नातीव प्रयतितं च । अथापि सत्यवसरेऽप्यलाभान्निर्विण्णा आस्म । परं चित्रमिदं कस्यचिन्निरपेक्षधिया चिरनिदिध्यासितमीप्सितं महल्लघु वा वस्तु, सकलान्तर्यामी भक्तमनो-

Scanned with CamScanner

रथकल्पपादपो भगवान् सुप्रार्पं तनोत्येवेति जगदनुभूतसमान्य-नियममनुसृत्य वर्षद्वयात्प्रागप्रार्थितैरप्यस्मत्स्निग्धैः—आयुर्वेदविशारद—भिषग्रत्न-काव्यतीर्थ—साहित्यभूषणेति पुरुषभूषणीयबिरुदावली-मण्डितैर्हैलेकरोपाह्वयैः मोरेश्वरशास्त्रिभिरस्यैकं पुस्तकं प्रायस्तत्रतत्र विद्वत्कृतशोधनं श्रीरामभक्तिपरायणानां

१ **श्रीमंत पंत अमात्य माधवराव ऊर्फ बाळासाहेब बावडेकर,** संस्थान गगनबावडा—महाशयानां संग्रहादानीय परोपकारबुद्ध्या दत्तम् । द्वितीयं काशीपुर्याः

२ **वे. शा. सं. बाबु दीक्षित रामचन्द्रदीक्षित जडे** राजमंदिर नं. ४ इत्येतेभ्यः संस्करणार्थं संप्राप्यं संपादितम्। तृतीयं पुनर्भूवैकुण्ठाख्यपण्ढरपुरतस्तत्रस्थानां परमवैष्णवानां

३ **वे. शा. सं. बलराम बाळकृष्ण शास्त्री सावदेकर** महाशयानां संग्रहात्—

वे. शा. सं. वेणीमाधवाचार्य गजेन्द्रगडकर इत्येतैरस्मन्मित्रैर्दत्तम्। एतद्ग्रन्थत्रयलाभोत्तरं चिरेप्सितलाभमोदमुदितान्तःकरणेन यथामति संवाद्य, युक्तान्पाठान्मध्ये सामान्यांश्चाधष्टिप्पण्यां निवेशनेनास्माभिः संशोधितोऽयं ग्रन्थः । अथाक्षरयोजकादीनामप्यल्पत्वेनान्यैश्च कारणैर्दुष्षमेपि समये ग्रन्थप्रकाशनाय बद्धपरिकरैः निर्णयसागरपरिवृढैः **श्रीमद्भिः पाण्डुरङ्ग जावजी** जे. पी. महाशयैरपि महतोत्साहेन स्वीयधनव्ययेनाङ्कितः प्रकाशितश्चेति किमधिकविलसितेन। आशासहे च नामंनामं कृतज्ञतापूर्वकं करुणावरुणालयं भगवन्तं

श्रीरामचन्द्रं निबन्धसंग्राहकाणामस्मभ्यं दत्तवतां प्रकाशकानां च निखिलान्मनोरथान्पूरयेति, अभ्यर्थयामश्च विदुषोऽत्रत्योर्वरितस्खलित्यमार्जनेन संशोध्यैनमादरेयुरिति—

विद्वदेकान्तवशंवदः पणशीकरोपाह्वो

वासुदेवशर्मा ।

Scanned with CamScanner

विषयानुक्रमः ।

विषयः	पृष्ठं.
प्रथमः पटलः १	
मङ्गलाचरणम्	१
गुरुलक्षणम्	२
शिष्यलक्षणम्	२
सिद्धारिचक्रशुद्धिः	३
(कोष्टकम्)	३
स्वकुलान्यकुलविचारः... ...	५
बालादिभेदाः	५
राशिमेलनम्	६
नक्षत्रमेलनम्	६
मुखप्रबोधकालः	७
शीघ्रमन्त्रसिद्ध्युपायः	७
ऋणधनशोधनम्	७
(ऋणधनकोष्टकम्)	८
राशिशुद्धिः	८
मन्त्रसंस्कारः	९
मन्त्रोद्धारविधिः	९
सीतामन्त्रः	१४
लक्ष्मणमन्त्रः	१४
हनुमन्मन्त्रोद्धारः	१८
रक्षाविधानम्	२१
अङ्गदेवतामन्त्रोद्धारः	२२
पञ्चायतनक्रमः...	२३
राममन्त्रमाहात्म्यम्	२४
राममन्त्रबीजार्थः	२५

विषयः	पृष्ठं.
राममन्त्रराजार्थः	२६
अधिकारिनिर्णयः	२७
मन्त्रदीक्षाविधिः	२८
मासशुद्धिः	२८
वारशुद्धिः	२९
नक्षत्रशुद्धिः	२९
तिथिशुद्धिः	२९
मन्त्रग्रहे सूर्यपर्वावश्यकता ...	२९
दीक्षाग्रहणविधानम्	३०
कुण्डलक्षणम्	३१
वेदीलक्षणम्	३१
स्रुक्स्रुवलक्षणम्	३२
अग्निमुखम्	३३
होमविधिः	३४
अभिषेकादि	३५
मन्त्रदीक्षोपदेशप्रकारः ...	३६
संक्षेपदीक्षाप्रकारः	३७
अत्यन्ताशक्तदीक्षा	३७
उपासनचिन्ता...	३७
द्वितीयः पटलः २	
भक्तेर्दार्ढ्यकथनम्	३९
स्वधर्मनिष्ठा	३९
दिनप्रथमभागकृत्यम्	३९
प्रातःस्मरणम्	३९
मूत्रपुरीषोत्सर्गविधिः	४०

Scanned with CamScanner

विषयः	पृष्ठं.
आचमनविधिः	४०
दन्तोल्लेखनविधिः	४०
भावनास्वरूपम्	४१
भगवत्प्रार्थनम्	४१
स्नानविधिः	४१
आचमनविधिः	४३
तिलकधारणम्	४३
मुद्राधारणप्रकारः	४४
सन्ध्याविधिः	४४
अजपाजपः	४६
होमसमर्पणादि	४६
दिनद्वितीयभागकृत्यं	४६
दिनतृतीयभागकृत्यं	४६
दिनचतुर्थभागकृत्यं	४६
दिनपञ्चमभागकृत्यं	४६
आसनविचारः	४८
पूजापात्रासादनम्	४८
मालाधारणविचारः	४९
सिद्धचतुष्टयम्	४९
आसनविधिः	५०
भूतोत्सारणम्	५१
गुर्वादिसंनतिः	५१
जीवस्थापनम्	५२
भूतोपसंहारः	५२
भूतशुद्धिः	५६
प्राणप्रतिष्ठा	५७
अन्तर्मातृकान्यासः	५८
बहिर्मातृकान्यासः	६०

विषयः	पृष्ठं.
केवलमातृकान्यासः	६१
सबिन्दुककलान्यासः	६१
संहारमातृकान्यासः	६२
पञ्चाशत्कलान्यासः	६२
अष्टत्रिंशत्कलान्यासः	६३
केशवादिमातृकान्यासः	६४
कण्ठादिमातृकान्यासः	६६
बृहत्तत्त्वन्यासः	६८
मूर्तिपञ्जरन्यासः	६९
किरीटन्यासः	७०
इन्द्रियन्यासः	७०
ऋष्यादिन्यासः	७०
अङ्गुलिन्यास–हृदयादिन्यास– अक्षरन्यास–पदन्यासाः ...	७१
व्यापकन्यासः	७१
द्वितीयपटलोपसंहारः	७२

तृतीयः पटलः ३

पूजाविधिः	७३
अर्घ्यपात्रासादनम्	७५
कलासंग्रहश्लोकाः	७६
शङ्खप्रतिष्ठा	७७
अर्घ्यपात्राणि	७७
अन्तर्यागः	७८
बहिर्यागः	७८
श्रीराममहायन्त्रम्	७८
पीठपूजाप्रकारः	८१
मूर्तौ रामानयनम्	८१
मुद्राप्रकारः	८१

Scanned with CamScanner

रामार्चनचन्द्रिका ।

परमहंसमुकुन्दवनशिष्यानन्दवनप्रणीता ।

प्रथमः पटलः ।

श्रीरामचन्द्राय नमः ।

मङ्गलाचरणम् ।

तर्तुं संसृतिवारिधिं त्रिजगतां नौर्नाम यस्य प्रभो-
र्येनेदं सकलं विभाति सततं जातं स्थितं संहृतम् ।
यश्चैतन्यघनः प्रमाणविधुरो वेदान्तवेद्यो विभु-
स्तं वन्दे सहजप्रकाशममलं श्रीरामचन्द्रं परम् ॥ १ ॥
विश्वव्यापितनोः शुभा रघुपतेर्मूर्तैव मूर्तिस्तु यो
वाक्यार्थप्रतिबोधनैकचतुरः शान्त्यादिशीलः शुचिः ।
अज्ञानान्धनिवारणैकतरणिर्विज्ञानचिन्तामणि-
र्नित्यानन्दपदैकभूर्विजयते श्रीमान्मुकुन्दो मुनिः ॥ २ ॥
वेदान्तवाक्यार्थहरिर्विराजते
यस्मिन्गजाः काममदादयो नहि ।
सन्तः सदानन्दपदं प्रपेदिरे
वन्दे मुकुन्दाह्वयनं गुरुं परम् ॥ ३ ॥

विविधादर्शोपलब्धपाठान्तराणि—

१ यस्मिन्नो निगमा भवन्ति न मनो माने च नाधीश्वरं तं । २ बुधाः । ३ मुकुन्दाख्यवनं ।

Scanned with CamScanner

पूर्वं चोत्तरतापनीयमखिलं कल्पं वरं मारुते-
ब्रह्मांगस्तिवसिष्ठवासविकृतान्कल्पांस्तथा संहिताः ।
शास्त्रं मन्त्रमयं महाकुवलयं चालोड्य सीतादिकं
श्रीरामार्चनचन्द्रिका कलिमलप्रध्वंसिका प्रोच्यते ॥ ४ ॥
तत्तद्ग्रन्थगतैर्नानावाक्यैरेव न कल्पितैः ।
सौकर्यार्थं पुनः सम्यक् संक्षेपेण प्रतन्यते ॥ ५ ॥

अथ गुरुलक्षणम् ॥ उच्यते प्रथमं तत्र लक्षणं गुरु-शिष्ययोः । शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेषवान् ॥ सदाचारः सुप्रसिद्धः शुचिर्दक्षः सुबुद्धिमान् । आश्रमी ध्यान-निष्ठश्च मन्त्रतन्त्रविचक्षणः ॥ निग्रहानुग्रहे शक्तो गुरुरित्यभिधी-यते ॥ इति गुरुलक्षणम् ॥

अथ शिष्यलक्षणम् ॥ शान्तो विनीतः शुद्धात्मा श्रद्धा-वान्धारणक्षमः । समर्थश्च कुलीनश्च प्राज्ञः सुचरितो धनी ॥ एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा । गुरुता शिष्यता वापि तयोर्वत्सरवासतः ॥ तथाचोक्तं सारसंग्रहे—सद्गुरुः स्वाश्रितं शिष्यं वर्षमेकं परीक्षयेत् । इति ॥ तत्रैव—राज्ञि चामात्यजा दोषाः पत्नीपापानि भर्तरि । तथा शिष्यार्जितं पापं गुरुं प्राप्नोति निश्चितम् ॥ इति ॥ देव्यागमे शिववाक्ये—

गुरोः शय्यासने यानं पादुकांशुकपीठकम् । स्नानोदकं तथा छायां लङ्घयेन्न कदाचन ॥ इति ॥ तत्रैव—गुरोरग्रे पृथक्पू-जामद्वैतं च परित्यजेत् । दीक्षां व्याख्यां प्रभुत्वादि गुरोरग्रे विवर्जयेत् ॥ इति शिष्यलक्षणम् ॥

---

१ ब्रह्मागस्त्यवसिष्ठवासविकृताः कल्पाः । २ तन्त्रं गाधिजजादिकं कुवलयं । ३ क्रमः । ४ शुद्धाचारः । ५ सच्चरितः । ६ चापि । ७ पादुकोपानत् पीठकं ।

Scanned with CamScanner

अथ सिद्धारिचक्रशुद्धिः ॥ दीक्षां विनोपदेशस्य दुष्टत्वात्प्रथमं तु सा । पापक्षयं दिव्यभावं साधकस्य करोत्यतः ॥ तत्रापि सिद्धसाध्यादिभेदैः संशोधयेन्मनुम् ॥ चन्द्रा१ग्नि३रुद्र११ नव९नेत्र२युगा४र्क१२दिक्षु१०ऋत्व६ष्ट८षोडश१६चतुर्दश१४-भूतकेषु५ । पाताल७पञ्चदश१५विश्व१३हिमांशुकोष्ठे वर्णान्न्यसे[1]ल्लिपिभवान्क्रमतः सुधीमान् ॥ जन्मर्क्षाक्षरतो[2] वीक्ष्य तत्र मन्त्रादिमाक्षरम् । चतुर्भिः कोष्ठकैस्त्वङ्क इति कोष्ठचतुष्टये ॥ पुनः कोष्ठगकोष्ठेषु सव्यतो जन्मभाक्षरात्[3] । सिद्धः साध्यः सुसिद्धोऽरिः क्रमाज्ज्ञेयं विचक्षणैः ॥ सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः । सुसिद्धो ग्रहमात्रेण अरिर्मूलनिकृन्तनः ॥ सिद्धार्णा बान्धवाः प्रोक्ताः साध्यास्ते सेवकाः स्मृताः । सुसिद्धाः पोषका ज्ञेयाः शत्रवो[4] घातका मताः ॥ जपेन बन्धुः सिद्धः स्यात्सेवकोऽधिकसेवया । पुष्णाति पोषकोऽभीष्टैर्[5]घातको नाशयेद्ध्रुवम् ॥ सिद्धसिद्धो यथोक्तेन द्विगुणात्सिद्धसाधकः । सिद्धः सुसिद्धोऽर्धजपात्सिद्धारिर्हन्ति बान्धवान् ॥ साध्यसिद्धो द्विगुणतः

[1] अ क थ ह	उ ङ प	आ ख द ळ	ऊ च फ
[5] ओ ड व	[6] ल् झ म	[7] औ ढ श	[8] ल् ञ य
[9] ई घ न	[10] ऋ ज भ	[11] इ ग ध	[12] ऋ छ ब
[13] अः त स	[14] ऐ ठ ल	[15] अं ण ष	[16] ए ट र

१ वर्णांल्लिखेत् (हिमांशुकोष्ठेषु=षोडशकोष्ठेषु) । २ नामर्क्षाक्षरतो । ३ नामतोक्षरात् । ४ अरयो । ५ भीष्टं घातको ।

साध्यसाध्यो निरर्थकः। [1]सुसिद्धस्त्रिगुणजपात्साध्यारिर्हन्ति गोत्रजान्॥ सुसिद्धसिद्धोऽर्धजपात्तत्साध्यो द्विगुणाधिकात्। तत्सुसिद्धो ग्रहादेव सुसिद्धारिः स्वगोत्रहा॥ अरिसिद्धः सुतान्हन्यादरिसाध्यस्तु कन्यकाः। तत्सुसिद्धस्तु पत्नीघ्नस्तदरिर्हन्ति साधकम्॥ मातापितृकृतं नाम यच्चाप्यभिजनैः कृतम्। विश्लेष्य तस्य वै वर्णान्स्वरवर्णविभेदतः॥ तथैव मन्त्रबीजानि ततः शोधनमारभेत्। बिन्दुर्द्विबिन्दुकोपध्मानीयजिह्वाङ्गिसंभवः॥ संहतोच्चारणप्राप्तमधिकाक्षरमेव च। अपभ्रंशाक्षरं ळक्षौ त्यक्त्वा खण्डचतुष्टयम्॥ मन्त्राक्षरैः सहैकैकनामवर्णान्विशोधयेत्। व्यञ्जनैर्व्यञ्जनान्येव स्वरैः सार्धं स्वरांस्तथा॥ आद्यमाद्येन संशोध्यं द्वितीयेन द्वितीयकम्। मन्त्रे वाप्यथवा नाम्नि वर्णाः स्युर्विषमा यदा॥ तदा मन्त्रं समारभ्य समं यावत्प्रयोजयेत्। आद्यन्तयोः सिद्धवर्णो मन्त्रे यस्मिन्वरानने॥ अचिरेणैव कालेन स भवेत्सर्वसिद्धिदः। साध्यान्तादियुतो यस्तु सोऽतिकृच्छ्रेण सिध्यति॥ आदावन्ते सुसिद्धस्तु सर्वकामविभूतिदः। आदावन्ते रिपुर्यस्य भवेत्त्याज्यः स मन्त्रकः॥ स्थानत्रयगतारिर्यो मन्त्रो मृत्युसमो मतः॥ शत्रुर्भवति य आदौ मध्ये सिद्धस्तदन्तके साध्यः। कष्टेन कार्यसिद्धिस्तस्य फलं स्वल्पमेव भवेत्॥ अन्ते यदि भवति रिपुः प्रथमे मध्ये च भवति साध्ययुगम्। कार्यं विलम्बितं स्यात्प्रणश्यति च सर्वमेवान्ते॥ सिद्धं सुसिद्धमथवा रिपुणान्तरितं परीक्षयेद्यत्नात्। वह्नायासं [2]ज्वलितं तं मन्त्रं वर्जयेन्मतिमान्॥ नृसिंहार्कवराहाणां प्रासादप्रणवस्य च। संपिण्डाक्षरमन्त्राणां [3]सिद्धा-

१ तत्सुसिद्धः। २ प्रज्वलितं। ३ सिद्धारीन्।

Scanned with CamScanner

दीन्नैव शोधयेत् ॥ स्वप्नलब्धे स्त्रिया दत्ते मालामन्त्रे त्रिबीजके । वैदिकेषु च सर्वेषु सिद्धादीन्नैव शोधयेत् ॥ इति सिद्धादिशुद्धिविचारः ॥

अथ स्वकुलान्यकुलविचारः ॥ स्वकुलान्यकुलभेदं वक्ष्यामो मन्त्रिणामथ । [ह्रस्वाः पञ्च परेऽथ संधिविकृताः पञ्चापि बिन्द्वादिकाः काद्याः प्राणहुताशभूमिखमया याद्याः शवर्णान्तिकाः । हान्ताः षळक्षसाः क्रमेण कथिता भूतात्मकास्ते पृथक् तैस्तैः पञ्चभिरेव वर्णदशकैः स्युः स्तम्भनाद्याः क्रियाः ॥ इति ॥] अस्यार्थः—उऊओगजडदबलळाः पार्थिवाः । ऋॠऔघझढधभवशा वारुणाः । इईएखछठथफरक्षा आग्नेयाः । अआऐकचटतपयषा मारुताः । लॡअंङञणनमसहा नाभसाः । साधकस्याक्षरं पूर्वं मन्त्रस्यापि तदक्षरम् । यद्येकभूतदैवत्यं जानीयात्स्वकुलं हि तत् ॥ भौमस्य वारुणं मित्रमाग्नेयस्यापि मारुतम् । पार्थिवस्याप्यमंशत्वात्तथाग्नेयस्य चाम्भसम् ॥ नाभसं सर्वमित्रं स्याद्विरुद्धं नैव मेलयेत् ॥ इति स्वकुलान्यकुलभेदः ॥

अथ बालादिभेदाः ॥ बालादिभेदोप्यपरो मन्त्राणामभिधीयते । आरभ्यैकाक्षरं मन्त्रं बाला आषोडशाक्षरात् ॥ तत आविंशतेः प्रौढास्ततोऽन्ये स्थविरा मताः ॥ स्वाहान्ताः स्त्रीस्वरूपाः स्युर्नमोन्ताश्च नपुंसकाः ॥ हुंफडन्तास्तु ये मन्त्राः पुमांसस्ते प्रकीर्तिताः । शस्तास्ते त्रिविधा मन्त्रा वश्यशान्त्याभिचारिके ॥ इति बालादिभेदाः ॥

---

१ षडक्षरे । २ अयं श्लोकः काशीपु० नास्ति । ३ मानुषं पार्थिवाप्यानां ।

Scanned with CamScanner

अथ राशिमेलनम् ॥ राशिमेलनमाख्यास्ये नक्षत्रस्थितिमप्यतः । अआइई मेषः । उऊऋ वृषभः । ऋलृए मिथुनः । एऐ कर्कटः । ओऔ सिंहः । अंअःषसहळक्षाः कन्या । कवर्गः (कखगघङाः) तुला । चवर्गः (चछजझञाः) वृश्चिकः । टवर्गः (टठडढणाः) धनुः । तवर्गः (तथदधनाः (मकरः । पवर्गः (पफबभमाः) कुम्भः । यरलवशाः मीनः ॥ साध्याख्याक्षरराश्यन्तं गणयेत्साधकाक्षरात् ॥ एक पञ्च नव बान्धवाः स्मृता द्वौ च षट् च दशमास्तु सेवकाः । वह्निरुद्रमुनयस्तु पोषका द्वादशाष्टचतुरस्तु घातकाः ॥ इति राशिमेलनम् ॥

अथ नक्षत्रमेलनम् ॥ अआ अश्विनी देवगणः । ईई भरणी मनुष्यगणः । उऊ कृत्तिका राक्षसः । ऋॠ लृॡ रोहिणी मनुष्यः । ए मृगशीर्षो देवः । ऐ आर्द्रा मनुष्यः । ओऔ पुनर्वसुः देवः । क पुष्यो देवः । ख आश्लेषा राक्षसः । घङ मघा राक्षसः । च पूर्वा मनुष्यः । छज उत्तरा मनुष्यः । झञ हस्तो देवः । ट चित्रा राक्षसः । ड स्वाती देवः । ढण विशाखा राक्षसः । तथद अनुराधा देवः । ध ज्येष्ठा राक्षसः । नपफ मूलं राक्षसः । ब पूर्वाषाढा मनुष्यः । भ उत्तराषाढा मनुष्यः । म श्रवणो देवः । यर धनिष्ठा राक्षसः । ल शतभिषक् राक्षसः । व श पूर्वाभाद्रपदा मनुष्यः । षसह उत्तराभाद्रपदा मनुष्यः । अंअः क्ष रेवती देवः । प्रादक्षिण्येन गणयेत्साधकाख्याक्षरात्सुधीः ॥ जन्म संपत् विपत् क्षेम प्रत्यरिः[1] साधको वधः । मैत्रं परममैत्रं च जन्मादीनि पुनःपुनः ॥ विपद् वधः प्रत्यरिश्च[2] परित्याज्या मनीषिभिः ॥ इति नक्षत्रमेलनम् ॥

---

१ प्रत्यरं । २ प्रत्यरं च ।

Scanned with CamScanner

अथ सुप्तप्रबोधकालः ॥ सुप्तप्रबोधकालोऽथ मन्त्राणामभिधीयते । [1]अग्निसोमात्मका मन्त्रा विज्ञेयाः क्रूरसौम्ययोः ॥ कर्मणो वह्नितारान्ता वियत्प्रायाः समीरिताः । आग्नेया मनवः सौम्या भूयिष्ठेन्द्वमृताक्षराः ॥ आग्नेयाः संप्रबुध्यन्ते प्राणे चरति दक्षिणे । भागेऽन्यस्मिंस्थिते प्राणे सौम्या बोधं प्रयान्ति च ॥ नाडीद्वयं गते प्राणे सर्वे बोधं प्रयान्ति ते । प्रयच्छन्ति फलं सर्वे प्रबुद्धा मन्त्रिणां सदा ॥ यद्वा—प्राणापानसमायोगाच्छिवशक्त्योस्तु मेलनम् । प्रबोधकालो विज्ञेयः स्वापकालस्ततः परः ॥ इति सुप्तप्रबोधकालः ॥

अथ शीघ्रमन्त्रसिद्ध्युपायः ॥ संपुटीकृत्य मन्त्रेण क्षान्तान्[2]नाद्यान्सबिन्दुकान् । पुनश्च स[3]विसर्गांस्तान्क्षकारं केवलं पठेत् ॥ एवं जप्त्वोपदिष्टश्च[4] प्रबुद्धः शीघ्रसिद्धिदः ॥ इति शीघ्रमन्त्रसिद्ध्युपायः ॥

अथ ऋणधनशोधनम् ॥ अथर्णधनशुद्धिश्च कथ्यते सिद्धिदायिनी ॥ इन्द्रर्क्षनेत्ररविपञ्चदशर्तुवेदवह्न्यायुधाष्टनवभिर्गुणितांश्च साध्यान् । दिग्भूगिरिश्रुतिगजाग्निमुनीषुवेदषड्ब्धिभिश्च गुणितानथ साधकार्णान् ॥ नामाक्षरादकठबाद्गजभक्तशेषं ज्ञात्वोभयोरधिकमूलयुतं ऋणं स्यात् ॥ अस्यार्थः—इन्द्राद्यङ्कैः स्वाराढ्यार्णान् स्वरव्यञ्जनरूपेण पृथक्पृथक् कृतान् गुणितान्कृत्वा तथा साधकनामाक्षराण्यपि दिगादिभिरङ्कैर्गुणयेत् । नामाक्षरादिति स्वरव्यञ्जनसमुदायात् । अकठबादिति वर्गचतुष्टयप्रभिन्नात् । अकारादिः अः अन्तः यस्य अइउऋऌएऐओऔअंअः

---

१ अग्नीषोमात्मका । २ वर्णान् । ३ विसर्गान्तान् । ४ क्षेत्प्रबुद्धः ।

एतद्रूपः अवर्गः । कादिष्टान्तः कवर्गः । ठादिः फान्तः ठवर्गः । बादिर्हान्तः बवर्गः । एते एकादशैकादशाक्षराश्चत्वारो वर्गाः । अस्मादकठबादष्टभिर्भागे हृते सति उभयोः साध्यसाधकवर्गयोः शेषस्याधिकरूपस्य ऋणत्वं, धनत्वं च न्यूनरूपस्य ज्ञात्वा मन्त्रं दद्यात् ॥ इति ऋणधनशोधनम् ॥

साध्याङ्काः											
१४	२७	२	१२	१५	६	४	३	८	८	९	ऋणं
अ	इ	उ	ऋ	ऌ	ए	ऐ	ओ	औ	अं	अः	
क	ख	ग	घ	ङ	च	छ	ज	झ	ञ	ट	
ठ	ड	ढ	ण	त	थ	द	ध	न	प	फ	
ब	भ	म	य	र	ल	व	श	ष	स	ह	
१०	१	७	४	८	३	७	५	४	६	३	धनं
	साधकाङ्काः										

अथ राशिशुद्धिः ॥ राशीनां शुद्धता ज्ञेया त्यजेच्छत्रुं मृतिं व्ययम् । स्वराशेर्मन्त्रराश्यन्तं गणनीयं विचक्षणैः ॥ लग्नं धनं भ्रातृबन्धुपुत्रशत्रुकलत्रकाः । मरणं धर्मकर्मार्थव्यया द्वादश राशयः ॥ इति राशिशुद्धिः ॥

---

१ ऋणं धनं च ज्ञात्वा ।

Scanned with CamScanner

अथ मन्त्रसंस्कारः ॥ अन्येऽपि मन्त्रदोषा ये ज्ञेया ग्रन्थान्तराद्बुधैः । लिख्यन्ते मन्त्रसंस्काराः शारदातिलकादृश ॥ जननं जीवनं पश्चात्ताडनं बोधनं तथा । अथाभिषेको विमलीकरणाप्यायने पुनः ॥ तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः । मन्त्राणां मातृकामध्यादुद्धारो जननं स्मृतम् ॥ प्रणवान्तरितान्कृत्वा मन्त्रवर्णाञ्जपेत्सुधीः । एतज्जीवनमित्याहुर्मन्त्रतन्त्रविशारदाः ॥ मन्त्रवर्णान्समालिख्य ताडयेच्चन्दनाम्भसा । प्रत्येकं वारिणा मन्त्री ताडनं तदुदाहृतम् ॥ विलिख्य मन्त्रं तन्मन्त्री प्रसूनैः करवीरजैः । तन्मन्त्राक्षरसंख्यातैर्हन्याद्धातेन[1] बोधनम् ॥ स्वतन्त्रोक्तविधानेन मन्त्री मन्त्रार्णसंख्यया । अश्वत्थपल्लवैर्मन्त्रमभिषिञ्चेद्विशुद्धये ॥ संचिन्त्य मनसा मन्त्रं ज्योतिर्मन्त्रेण निर्दहेत् । मन्त्रे मलत्रयं मन्त्री विमलीकरणं त्विदम् ॥ तारव्योमाग्निमनुयुग्दण्डी[2] ज्योतिर्मनुर्मतः । कुशोदकेन जप्तेन प्रत्यर्णं प्रोक्षणं मनोः ॥ तेन मन्त्रेण विधिवदेतदाप्यायनं स्मृतम् । मन्त्रेण वारिणा तत्र तर्पणं तर्पणं स्मृतम् ॥ तारमायारमायोगो[3] मनोर्दीपनमुच्यते । जप्यमानस्य मन्त्रस्य गोपनं त्वप्रकाशनम् ॥ इति मन्त्रसंस्कारः ॥

अथ मन्त्रोद्धारविधिः ॥ मन्त्रोद्धारमथाख्यास्ये मन्त्राणां राघवस्य तु । ब्रह्मकल्पादिषु प्रोक्तं साधकानां सुसिद्धिदम् ॥ वह्निस्थं शयनं विष्णोरर्धचन्द्रविभूषितम् । एकाक्षरो मनुः प्रोक्तो मन्त्रराजः सुरद्रुमः ॥ ब्रह्मा मुनिः स्याद्गायत्रं छन्दो रामोऽस्य देवता । दीर्घाढ्येन्दुयुजाङ्गानि कुर्याद्बह्व्यात्मना मनोः ॥ सरयूतीरमन्दारवेदिकापङ्कजासने । श्यामं वीरासनासीनं ज्ञानमुद्रोपशोभितम् ॥ वामोरुन्यस्ततद्धस्तं सीतालक्ष्मणसेवितम् ।

---

१ यान्तेन । २ दण्डी अनुस्वारः । ३ ॐ ह्रीं श्रीः ।

Scanned with CamScanner

अवेक्ष्यमाणमात्मानमात्मन्यमिततेजसम् ॥ शुद्धस्फटिकसंकाशं केवलं मोक्षकाङ्क्षया । चिन्तयन्परमात्मानं भानुलक्षं जपेन्मनुम् ॥ वह्निर्नारायणेनाढ्यो जाठरः केवलोऽपि च । द्व्यक्षरो मन्त्रराजोऽयं भुक्तिमुक्तिफलप्रदः ॥ एकाक्षरोक्तमृष्यादि स्यादाद्येन षडङ्गकम् । तार-माया-रमाऽनङ्ग-वाक्स्वबीजैस्तु षड्विधः ॥ त्र्यक्षरो मन्त्रराजः स्यात्सर्वाभीष्टफलप्रदः । द्व्यक्षरश्चन्द्रभद्रान्तो द्विविधश्चतुरक्षरः ॥ ऋष्यादि पूर्ववज्ज्ञेयमेतेषां तु विचक्षणैः । सप्रतिष्ठौ रमौ वायुर्हृत्पञ्चार्णो मनुः स्मृतः ॥ विश्वामित्रो मुनिः प्रोक्तः पङ्क्तिश्छन्दोऽस्य देवता । रामभद्रो बीजशक्ती प्रथमार्णानतिक्रमात् ॥ भ्रूमध्ये हृदि नाभ्यूर्वोः पादयोर्विन्यसेन्मनुम् ॥ षडङ्गं पूर्ववद्यद्वा पञ्चार्णैर्मनुनास्त्रकम् ॥ अथ ध्यानम्—मध्येवनं कल्पतरोर्मूले पुष्पलतासने । लक्ष्मणेन प्रगुणितमक्ष्णः कोणेन सायकम् ॥ अवेक्ष्यमाणं जानक्या कृतव्यजनमीश्वरम् । जटाभारलसच्छीर्षं श्यामं मुनिगणावृतम् ॥ लक्ष्मणेन धृतच्छत्रमथवा पुष्पकोपरि । दशास्यमथनं प्राग्वत्ससुग्रीवबिभीषणम् ॥—विजयार्थी विशेषेण वर्णलक्षं जपेन्मनुम् । स्व[1]-काम-शक्ति-वाग्लक्ष्मी-ताराद्यः पञ्चवर्णकः । षडक्षरः षड्विधः स्याच्चतुर्वर्गफलप्रदः ॥ पञ्चाशन्मातृकामन्त्रवर्णप्रत्येकपूर्वतः । लक्ष्मीवाङ्मन्मथादिश्च तारादिः स्यादनेकधा ॥ श्रीमायामन्मथैकैकबीजाद्यन्तर्गतो मनुः । चतुर्वर्णः स एव स्यात्षड्वर्णो वाञ्छितप्रदः ॥ स्वाहान्तो हुंफडन्तो वा नत्यन्तो वा भवेदणुः । ब्रह्मा संमोहनः शक्ति-

---

१ स्वः=एं । कामः=क्लीं । शक्तिः=ह्रीं । वाक्=ऐं । लक्ष्मीः=श्रीं । ताराः=ॐ ।

Scanned with CamScanner

र्दक्षिणामूर्तिरेव च ॥ अगस्तिः श्रीशिवः प्रोक्ता मुनयोऽत्र क्रमादिमे । छन्दो गायत्रसंज्ञं च श्रीरामश्चैव देवता ॥ अथवा कामबीजादेर्विश्वामित्रो मुनिर्मनोः । छन्दो दैव्यादि गायत्री रामभद्रोऽस्य देवता ॥ बीजशक्ती यथापूर्वं षड्वर्णान्विन्यसेत्ततः । ब्रह्मरन्ध्रे भ्रुवोर्मध्ये हृन्नाभ्यूरुषु पादयोः ॥ बीजैः षड्दीर्घयुक्तैर्वा मन्त्रार्णैर्वा षडङ्गकम् । ध्यायेत्कल्पतरोर्मूले सुवर्णमयमण्डपे ॥ पुष्पकाख्यविमानान्तः सिंहासनपरिच्छदे । पद्मे वस्त्रदले देवमिन्द्रनीलमणिप्रभम् ॥ वीरासनसमारूढं व्याख्यामुद्रोपशोभितम् । वामोरुन्यस्ततद्धस्तं सीतालक्ष्मणसेवितम् ॥ सर्वाभरणसंपन्नमृतुलक्षं जपेन्मनुम् । यद्वा स्मरादिमन्त्राणां जपाभं वा हरिं स्मरेत् ॥ रामश्च चन्द्रभद्रान्तो ङेन्तो नतियुतो द्विधा । तारादिसहितः सोपि मन्त्रस्त्वष्टाक्षरः स्मृतः ॥ ताराद्यन्तर्गतः सोपि नवार्णः स्यादनेकधा । तारं रामश्चतुर्थ्यन्तः क्रोधोऽस्त्रं वह्नितल्पगाः ॥ अष्टार्णोऽयं परो मन्त्र ऋष्यादिः स्यात्षडर्णवत् । गुणबीजं वदेन्मायां हृद्रामाय पुनश्च ताम् ॥ शिवोमाराममन्त्रोऽयं वस्वर्णस्तु वसुप्रदः । ऋषिः सदाशिवः प्रोक्तो गायत्रं छन्द उच्यते ॥ शिवोमारामचन्द्रोऽत्र देवता परिकीर्तिता । दीर्घया माययाङ्गानि तारपञ्चार्णयुक्तया ॥ रामं त्रिनेत्रं सोमार्धधारिणं शूलिनं वरम् । भस्मोद्धूलितसर्वाङ्गं कपर्दिनमुपास्महे ॥ सीताध्यानम् ॥ रामाभिरामां सौन्दर्यसीमां सोमावतंसिनीम् । पाशाङ्कुशधनुर्बाणधरां ध्यायेत्त्रिलोचनाम् ॥ ध्यायन्नेवं वर्णलक्षं जपेत्त्रिमधुराप्लुतैः ।

---

१ क्रोधः=हुं । अस्त्रं=फट् । वह्नितल्पं=स्वाहा । २ गुणबीजं=क्लीं । माया=ह्रीं । हृत=नमः । । ३ तां=ह्रीं ।

Scanned with CamScanner

बिल्वपत्रैः फलैः पुष्पैस्तिलैर्वा पङ्कजैर्हुनेत् ॥ स्वयमायान्ति निधयः सिद्धयश्च सुरेप्सिताः । जानकीवल्लभं ङेन्तं वह्निजायाहुमादिकम् ॥ दशाक्षरोऽयं मन्त्रः स्याद्वसिष्ठः स्यादृषिः स्वराट् । छन्दस्तु देवता रामः सीतापाणिपरिग्रहः ॥ आद्यो बीजं द्विढः शक्तिः कामेनाङ्गक्रिया मता । शिरोललाटभ्रूमध्यतालुकण्ठेषु हृद्यपि ॥ नाभ्यूरुजानुपादेषु दशार्णान्विन्यसेन्मनोः । अयोध्यानगरे रम्ये चित्रसौवर्णमण्डपे ॥ मन्दारपुष्पैराबद्धवितानेतोरणाञ्चिते । सिंहासनसमारूढं पुष्पकोपरि राघवम् ॥ रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतैः शुभैः । संस्तूयमानं मुनिभिः प्रह्वैश्च परिसेवितम् ॥ सीतालंकृतवामाङ्गं लक्ष्मणेनोपशोभितम् । श्यामं प्रसन्नवदनं सर्वाभरणभूषितम् ॥ ध्यायन्नेवं जपेन्मन्त्रं वर्णलक्षं विचक्षणः । रामं ङेन्तं धनुःपाणयेऽन्ते स्याद्वह्निसुन्दरी ॥ दशाक्षरोऽयं मन्त्रः स्यान्मुनिर्ब्रह्मा विराट् स्मृतम् । छन्दस्तु देवता प्रोक्ता रामो राक्षसमर्दनः ॥ आद्यो बीजं द्विढः शक्तिस्तेनैवाङ्गानि पूर्ववत् । वर्णन्यासं तथा ध्यानं पौरश्चरणिकं विधिम् ॥ दशाक्षरोक्तवत्कुर्याच्चापबाणधरं स्मरेत् । ॐ हृद्भगवते रामचन्द्रभद्रौ च ङेयुतौ ॥ अर्कार्णो द्विविधोऽप्यस्य ऋषिध्यानादि पूर्ववत् । श्रीपूर्वं जयमध्यस्थं तद्विधा रामनाम च ॥ त्रयोदशार्णो ऋष्यादि पूर्ववत्सर्वकामदः ॥ पदत्रयैर्द्विरावृत्तैरङ्गध्यानं दशार्णवत् । सतारं हृद्भगवते रामं ङेन्तं महा ततः ॥ पुरुषायपदं पश्चाद्वृदन्तोऽष्टादशाक्षरः । विश्वामित्रो मुनिश्छन्दो गायत्रं देवता मनोः ॥

---

१ वह्निजाया=स्वाहा । २ विराट् । ३ वह्निसुन्दरी=स्वाहा ।

Scanned with CamScanner

दशास्यदर्पदलनो रामभद्रः समीरितः । तारं बीजं नतिः शक्तिः षडङ्गं कल्पयेत्ततः ॥ मूलमन्त्रं कोसलेन्द्रं सत्यसन्धमनन्तरम् । रावणान्तकनामानं सर्वलोकहितं तथा ॥ चारुप्रसन्नवदनं चतुर्थ्या नमसा वदेत् । नन्दिग्रामस्योपवने भरतास्तृतवालुके[1] ॥ रम्यैः सुगन्धिपुष्पाढ्यैर्वृक्षखण्डैश्च मण्डिते । निःसाणभेरीपटहशङ्खतूर्यादिनिःस्वने । प्रवृत्तनृत्ते परितो जयमङ्गलभाषिते ॥ पाटीरघुसृणोशीरकर्पूरागरुगन्धिते । नानाकुसुमसौरभ्यवाहिगन्धवहाञ्चिते ॥ देवगन्धर्वनारीभिर्गायन्तीभिरलंकृते । सिंहासनसमारूढं पुष्पकोपरि राघवम् ॥ सौमित्रिसीतासहितं जटामुकुटशोभितम् । चापबाणधरं श्यामं ससुग्रीवविभीषणम् ॥ हत्वा रावणमायान्तं कृतत्रैलोक्यरक्षणम् । रामभद्रं हृदि ध्यायन्दशलक्षं जपेन्मनुम् ॥ रामभद्र महेपूर्व ष्वासाग्निद्यु ततः परम् । वीरनरोत्तमपदं दशास्यान्तक मां ततः ॥ ततो रक्ष ततो देहि पश्चाद्दापय मे श्रियम् । द्वात्रिंशदक्षरो मन्त्रो विश्वामित्रो मुनिर्मनोः ॥ छन्दोऽनुष्टुब्देवता च रामभद्रः प्रकीर्तितः । चतुःकरणवेदाब्धिवस्वन्त्यैरङ्गकल्पनम् ॥ मूर्ध्नि भाले दृशोः श्रोत्रे गण्डयुग्मे सनासिके । आस्ये दोःसंधिषु गले स्तनयोर्नाभिमण्डले ॥ कट्यां मेढ्रे पायुपादसंधिष्वर्णान्न्यसेन्मनोः । पूर्वोक्तं ध्यानमत्रापि त्रिलक्षं नियतं जपेत् ॥ पीतं वा चिन्तयेद्रामं धनार्थं[2] यो मनुं जपेत् । सतारं हृद्भगवते चतुर्थ्या रघुनन्दनम् ॥ रक्षोघ्ने विशदं[3] तद्वन्मधुरेति वदेत्ततः । प्रसन्नवदनं ङेन्तं वदेदमिततेजसे ॥ बलरामौ चतुर्थ्यन्तौ विष्णुर्ङेन्तो नतिस्ततः ।

---

१ भरतायतकौतुके । २ धनार्तो वा, धनार्थी वा । ३ विपदनाय ।

Scanned with CamScanner

प्रोक्तो मालामनुः सप्तचत्वारिंशद्भिरक्षरैः ॥ मुनिः पितामह-श्छन्दो भवेदनुष्टुब्देवता। राज्याभिषिक्तो रामश्च बीजशक्ती यथापुरा ॥ शिरस्याननवृत्ते च भ्रूमध्येऽक्ष्यिद्वयेऽपि[1] च। श्रोत्र-योर्घ्राणयोश्चैव गण्डयोरोष्ठयोरपि ॥ दन्तयोरास्यदेशे च दोःप-त्सन्ध्यग्रकेषु च। कण्ठे हृदि स्तनद्वन्द्वे पार्श्वयोः पृष्ठदेशतः ॥ जठरे नाभ्यधिष्ठाने गुह्ये वर्णान्प्रविन्यसेत्। सप्तर्तुसप्तदशषट्रु-द्रसंख्यैः षडङ्गकम् ॥ ध्यानं दशाक्षरं प्रोक्तं लक्षमेकं जपेन्मनुम्। बिल्वपत्रैः[2] प्रसूनैश्च फलैस्त्रिमधुसंयुतैः ॥ मधुत्रिततयुक्तेन पाय-सेनाथवाम्बुजैः। होमं दशांशतः कुर्यात्तथा सर्वत्र तर्पणम् ॥ सर्वेषु राममन्त्रेषु मन्त्रराजः षडक्षरः। एकधा च द्विधा त्रेधा चतुर्धा पञ्चधा तथा। षट्सप्तधाष्टधा चैव बहुधायं व्यवस्थितः ॥ राममन्त्रस्य भेदांस्तु शिवो जानाति तत्त्वतः।

अथ सीतामन्त्रः ॥ रमा सीता चतुर्थ्यन्ता स्वाहान्तोऽयं षडक्षरः ॥ सीतामन्त्रश्च कथितः स्वतन्त्रोऽङ्गपरोपि वा। जनको-ऽस्य ऋषिश्छन्दो गायत्रं देवता मनोः ॥ सीता भगवती प्रोक्ता श्रीबीजं शक्तिरन्तजौ। दीर्घस्वरयुजाद्येन षडङ्गानि प्रकल्पयेत् ॥ पूजयेद्वैष्णवे पीठे ध्यायेद्राघवसंयुताम्। सुवर्णाम्[3]म्बुजाकारां रामालोकनतत्पराम् ॥ वर्णलक्षं जपेन्मन्त्रमिष्टार्थान्साधयेत्ततः[4]।

अथ लक्ष्मणमन्त्रः ॥ मन्त्रराजमगस्त्योक्तं लक्ष्मणस्य प्रतन्यते ॥ रेफपूर्वं समुद्धृत्य सेन्दुं लक्ष्मणसंयुतम्। ज्ञेयोऽयं लक्ष्मणमनुर्नमसा च समन्वितः ॥ अगस्तिर्ऋषिरस्याथ गायत्रं

---

१ द्वयोपरि। २ बिल्वैः फलैः प्रस्सूनैश्च पत्रैस्त्रिमधु। ३ स्वर्णाभामम्बुजा-कारां। ४ मिष्टार्थं साधयेत्।

Scanned with CamScanner

छन्द उच्यते । लक्ष्मणो देवता प्रोक्ता लं बीजं शक्तिरस्य हि ॥ नमस्तु विनियोगो हि पुरुषार्थचतुष्टये । दीर्घभाजा स्वबीजेन षडङ्गानि प्रकल्पयेत् ॥ द्विभुजं स्वर्णरुचिरतनुं पद्मनिभेक्षणम् । धनुर्बाणकरं रामसेवासंसक्तमानसम् ॥ पूजापि वैष्णवे पीठे साङ्गावरणवर्जिता ॥ सप्तलक्षं पुरश्चर्या ततः सिद्धस्तु साधयेत् ॥ भरतस्यैवमेव स्याच्छत्रुघ्नस्याप्ययं विधिः । अङ्गत्वेनोदिता ह्येते प्राधान्येनापि संमताः ॥ आदौ वाप्यन्ततो वापि पूजायां राघवस्य तु । तेषामपि प्रकर्तव्या भुक्तिमुक्तिफलेप्सुभिः ॥ प्राधान्येन पृथक्त्वेन अङ्गत्वे रामपीठके । लक्ष्मणस्तु सदा पूज्यः प्राधान्येनैव नित्यशः ॥ यथा रामस्य पूजा स्यात्तथा तस्यापि नित्यशः । साफल्यं रामपूजायां यदीच्छेन्नियतव्रतः ॥ तेन यत्नेन कर्तव्या लक्ष्मणस्यापि विस्तरात् । श्रीराममन्त्रभेदास्तु बहवः सन्ति वै मुने ॥ तत्साधकैः सदा कार्या सौमित्रेरपि नित्यशः । अष्टोत्तरसहस्रं वा शतं वा सुसमाहितः ॥ लक्ष्मणस्य मनुर्जप्यो मुमुक्षुभिरतन्द्रितैः ॥ अजप्त्वा लक्ष्मणमनुं राममन्त्राञ्जपन्ति ये । तज्जपस्य फलं नैव प्रयान्ति कुशला अपि ॥ अरिमित्रविवेकोऽपि नैव कार्यो भवेदिह ॥ यो जपेल्लक्ष्मणमनुं नित्यमेकान्त आस्थितः । मुच्यते सर्वपापेभ्यः स कामानश्नुतेऽखिलान् ॥ प्रयोगायैव मन्त्रोऽयमुपदिष्टो हि शार्ङ्गिणा । अर्जुनस्य पुरा सम्यगनेनैव धनंजयः ॥ दिशो विजित्य सकलाः स कुरूनेक एव हि । प्रातिष्ठिपद्धर्मराजं पैतृके राज्य उत्तमे ॥ जपप्रधानमन्त्रोऽयं राज्यप्राप्त्येकसाधनम् ॥ यो जपेन्नियतो मन्त्रं लक्षमेकं समाहितः । सोऽचिरान्नष्टराज्यं स्वं प्राप्नोत्येव न

संशयः ॥ अभिषिक्तमयोध्यायां ध्यायेद्राममनन्यधीः । पञ्चायुतमिमं जप्त्वा नष्टराज्यमवाप्नुयात् ॥ नागपाशविनिर्मुक्तं ध्यायन्नेकान्त आस्थितः । अयुतं जपन्मुक्तः स्यान्निगडेभ्यस्तदैव हि ॥ आञ्जनेयसमानीतमहौषधिहृतव्यथम् । ध्यायन्नयुतजाप्येन सोऽपमृत्युं जयेन्नरः ॥ इन्द्रजित्प्राणहर्तारं ध्यायन्नेवं समाहितः । दुर्जयं चातिवेगेन जयेदरिकुलं बहु ॥ शूर्पणख्यास्तु नासाग्रच्छेदनोद्युक्तमानसम् । ध्यायन्सहस्रजाप्येन पुरुहूतादिकाञ्जयेत् ॥ रामपादाब्जसेवार्थं कृतद्वारमथ स्मरन् । जपन्नयुतमेकान्ते महारोगान्बहूनपि ॥ क्षयापस्मारकुष्ठादीन्नाशयत्येव तत्क्षणात् । त्रिमासान्नियताहारो जपेत्सप्तसहस्रकम् ॥ दिनेदिने विधानेन पूजयन्विजितेन्द्रियः । अष्टोत्तरशतैः पुष्पैर्निश्छिद्रैः शतपत्रकैः । पायसं शर्करोपेतं नैवेद्यं विधिवन्मुने ॥ घनसारसमायुक्तचन्दनेन विलिप्य च । देवोद्देशेन संपूज्य नित्यमेवं द्विजोत्तमः ॥ कुष्ठरोगात्प्रमुच्येत दुश्चिकित्स्यादनेकशः । त्वगोष्ठजा बहुविधा मण्डलादिप्रभेदतः ॥ ते सर्वे नाशमायान्ति दुश्चिकित्स्या अपि क्षणात् ॥ एकान्ते नियताहारः षण्मासं विजितेन्द्रियः । जपन्नेवं विधानेन क्षयरोगात्प्रमुच्यते ॥ माषापूपान्ननैवेद्यैर्जपन्मन्त्रं समाहितः । वातरोगात्प्रमुच्येत बहुभेदादपि क्षणात् ॥ अभिमन्त्र्य जलं नित्यं मन्त्रेण त्रिः समाहितः । पीत्वा संध्यासु भक्त्या वै मुच्यते सर्वरोगतः ॥ दारिद्र्यं नाशयित्वा तु श्रियमाप्नोति सुव्रतः । विषादिदोषसंस्पर्शो न भवेच्च कदाचन ॥ प्रक्षाल्यैव प्रतिदिनं मुखं भक्त्या समाहितः । मुखनेत्रादिसंभूताञ्जयेद्रो-

---

१ नीतौषधीभिश्च गतव्यथं । २ पूजयित्वा । ३ नित्यं च संपूज्यैवं ।

Scanned with CamScanner

गान्सुदारुणान् ॥ पीत्वाभिमन्त्रितजलं कुक्षिरोगाञ्जयेद्ध्रुवम् । देवस्य प्रतिमादानं कृत्वा भक्त्या विधानतः । सर्वेभ्यः पापरोगेभ्यो मुच्यते नात्र संशयः ॥ कन्यार्थी चोर्मिलापाणिग्रहणासक्तमानसम् । ध्यायँल्लक्ष्मं मनुं जप्त्वा हुत्वा लाजैर्दशांशकम् । ईप्सितां प्राप्नुयात्कन्यां शीघ्रमेव तपोधन ॥ दीक्षितं जृम्भणास्त्राणां मन्त्रेषु नियतव्रतः । संस्मरन्विधिवन्नित्यं मासत्रयमनन्यधीः ॥ पूजापुरःसरं सप्तसहस्रं विजितेन्द्रियः । जपन्नखिलविद्यानां तत्त्वज्ञो भवति ध्रुवम् ॥ विश्वामित्रक्रतुवरे कृताद्भुतपराक्रमम् । ध्यायन्नयुतजाप्येन पापेभ्यो मुच्यतेऽचिरात् ॥ त्रिकालं नियतो भूत्वा कृतनित्यविधिः स्वयम् । दीक्षायुक्तो यथान्यायं गुर्वनुज्ञापुरःसरम् ॥ मुच्यते सर्वपापेभ्यो याति विष्णोः परं पदम् । ऐहिकाननपेक्ष्यैव निष्कामो योऽर्चयेद्विभुम् ॥ दीक्षां प्राप्य विमानेन गुरोर्विगतकल्मषात् । स्वाचारनियताद्दान्ताद्गृहस्थाद्विजितेन्द्रियः ॥ तदनुज्ञानुसारेण पुरश्चर्यां यथाविधि । स सर्वान्दुष्टपापौघान्दग्ध्वा निर्मलमानसः । पुनरावृत्तिरहितं शाश्वतं पदमाप्नुयात् ॥ स कामं वाञ्छितं लब्ध्वा भुक्त्वा भोगान्मनोहरान् । जातिस्मरश्चिरं भूत्वा याति विष्णोः परं पदम् ॥ यथा श्रीराममन्त्राणां प्रयोक्तुः कामसंभवः । तथा नो लक्ष्मणमनोः किंतु याति परां गतिम् ॥ केचिन्मुक्त्यर्थमेव स्युः केचिद्दैहिकसाधनाः । भुक्तिमुक्तिप्रदश्चायमेको विज्ञायते परः ॥ इति राममन्त्रोद्धारः ॥

---

१ ग्रहणे सक्त । २ स्मरन् राघवं नित्यं । ३ पुण्यपापौघान् । ४ सकामो । ५ मुक्तिफलश्चायं । ६ परम् ।

Scanned with CamScanner

अथ हनुमन्मन्त्रोद्धारः ॥ आञ्जनेयमनुं वक्ष्ये भुक्तिमुक्त्येकसाधनम् । प्रकाशितं शंकरेण लोकानां हितमिच्छता ॥ भूतप्रेतपिशाचादिडाकिनीब्रह्मराक्षसाः । दृष्ट्वैव[1] प्रपलायन्ते मन्त्रानुष्ठानतत्परम् ॥ प्रधानश्चाङ्गभूतोऽयं मन्त्रराजो ह्यनुत्तमः । पूर्वं नमःपदं चोक्त्वा ततो भगवतः पदम् । आञ्जनेयपदं ङेन्तं महाबलपदं तथा ॥ वह्निजायान्त एव स्यान्मन्त्रो हनुमतः परः । सर्वसिद्धिकरः प्रोक्तो मन्त्रश्चाष्टादशाक्षरः ॥ मालाख्योऽपरमन्त्रोपि मारुतेः सर्वसिद्धिदः । प्रणवं पूर्वमुच्चार्य नमोहनुमते पदम् ॥ ङेन्तं प्रकटसंयुक्तं पराक्रमपदं तथा । तथाक्रान्तपदोपेतं दिङ्मण्डलमुदीरयेत् ॥ यशोवितानधवलीकृतजगत्त्रितयेत्यथ । वज्रदेहेति चोक्त्वा[2] रुद्रावतारपदं तथा ॥ संबुद्ध्यन्तं पदं लङ्कापुरीदहनमीरयेत् । उदधिलङ्घनं चापि दशग्रीवकृतान्तकम् ॥ सीताश्वासनेतिपदमञ्जनीगर्भसंभवम् । श्रीरामलक्ष्मणानन्दकारिकपिसैन्यप्राकारकम् । सुग्रीवसाधारणपदं पर्वतोत्पाटनं तथा । बालब्रह्मचारिपदं गम्भीरशब्दपदं तथा । सर्वग्रहविनाशन—सर्वज्वरच्छेदनेति च । डाकिनीध्वंसनपदं ततस्तारमुदीरयेत् । मायाह[3]त्रयमुच्चार्य ह[4]सावेहि वदेत्ततः ॥ सर्वं विषं हर परबलं क्षोभय मेति च । सर्वकार्याणि मे चोक्त्वा साधयेति द्विरुच्चरेत् ॥ हुंफट्स्वाहेति मन्त्रोऽयं मालाख्यः सर्वकामधुक् । ऋषिरीश्वर एव स्यादनुष्टुप् छन्द उच्यते ॥ हनुमान्देवता प्रोक्ता हंबीजं शक्तिरन्तजौ । कीलकं ह्त्रयं प्रोक्तं[5] वेधकं तु हसौ पुनः ॥ हनुमत्प्रीणनं चैव फलमाद्यमुदीरितम् । भगवते चाञ्जने-

---

१ दृष्ट्वा च । २ चेत्युक्त्वा शंकरस्य तनुं तथा । ३ मायाहात्रय । ४ भस्मन्येहि । ५ वेदकं ।

Scanned with CamScanner

यायद्वयमङ्गुष्ठयोर्न्यसेत्। रुद्रमूर्तय इत्येवं तर्जनीभ्यामनन्तरम्॥ वायुसुतायापि तथा मध्यमाभ्यामपि स्फुटम्। अग्निगर्भाय च तथानामिकाभ्यां च विन्यसेत्॥ रामदूताय च पुनः कनिष्ठाभ्यां विचक्षणः। ब्रह्मास्त्रनिवारणाय चास्त्रमन्त्रः समीरितः॥ एवं षडङ्गं च मुने कृत्वा ध्यायेदनन्यधीः। स्फटिकाभं स्वर्णकान्ति द्विभुजं च कृताञ्जलिम्॥ कुण्डलद्वयसंशोभि मुखाम्भोजं मुहुर्मुहुः। अयुतं तु पुरश्चर्या रामस्याग्रे शिवस्य वा॥ पूजा तु वैष्णवे पीठे शैवे वा विदधीत वै। आवृत्तिभिर्विना नित्यं नक्ताशी विजितेन्द्रियः॥ क्षुद्ररोगनिवृत्त्यर्थमष्टोत्तरशतं मुने। जप्त्वा त्रिदिनमेकान्ते तेभ्यो मुच्येत तत्क्षणात्॥ क्षुद्रभूतप्रशान्त्यर्थं शतमष्टोत्तरं पुनः। दिनत्रयमथो जप्त्वा भूतानां मुच्यते भयात्॥ भूतप्रेतपिशाचादिशान्तयेऽष्टोत्तरं शतम्। जप्त्वैवं तद्भयान्मुक्तो भवेदेव न संशयः॥ महारोगादिशान्त्यर्थमष्टोत्तरसहस्रकम्। जप्त्वा तस्मात्प्रमुच्येत[2] निश्चितं नियताशनः॥ जयाभिकाङ्क्षिणां राज्ञामस्मादन्यन्न विद्यते। ध्यायेद्राक्षसहन्तारमयुतं नियताशनः॥ जपन्नियतं[3]माश्चैव जयेद्दुर्जयमप्यरिम्। संधानाय तु सुग्रीवसंधिकारं स्मरन्नपि। अयुतेनैव बलिना संधिमाप्नोत्यसंशयम्॥ लङ्काया दाहकं ध्यायञ्जपन्नयुतमञ्जसा। शत्रुराष्ट्रं दहेदेव दुग्धाब्धिमपि चानघ॥ जयार्थं रिपुसंघानामस्मादन्यो न विद्यते। यस्तु गेहे हनूमन्तं सर्वदैव प्रपूजयेत्। तं वन्देत्तस्य मन्त्रेण तस्य लक्ष्मीरचञ्चला॥ दीर्घमायुर्लभेदेव सर्वतो विजयी भवेत्। मार्यादिभूतसंक्षो-

---

१ जपं कृत्वा। २ प्रमुच्यन्ते। ३ नियतवाक्चैव। ४ ध्यायेज्जपन्। ५ मायुर्भवेदेव।

Scanned with CamScanner

भस्तदेशे नैव जायते ॥ शत्रवः सर्वदा मित्रभावेनैवासते सदा। शैवानां वैष्णवानां च षट्कर्मात्र प्रदर्शितम् ॥ नान्यत्साधनमस्त्येवं मन्त्रादस्माद्धनूमतः। चोरव्याघ्रादिभीतानामयमेव परायणम् ॥ परापहृतराज्यानां धर्षितानां परैः पुनः। संनाहभाजां युद्धेषु रुद्धानां परसैनिकैः ॥ यात्राकाले हनूमन्तं स्मरन्यस्तु स्वकाद्गृहात्। निर्गच्छति स वेगेन स्वेष्टार्थमधिगच्छति ॥ स्वापकाले स्मरेन्नित्यं चोरभूतादिकाञ्जयेत्। यद्वयं(?) वासुदेवाद्यं हनूमन्तपदं ततः ॥ फलेति फलितपदं धगेति धगितेति वा। आयुखपरुडाहे(?)ति सद्यःप्रत्ययकारकः ॥ चतुर्विंशत्यक्षरको मन्त्रोऽयं प्लीहरोगहृत्। नागवल्लीदलं चैवमष्टप्रगुणितं शुभम् ॥ वंशजं शकलं स्थाप्यं क्रमात्प्लीहोदरोपरि। सप्तारण्योपलाग्नौ वै बदर्यष्टिं(?)प्रतापयेत् ॥ मन्त्रेणानेनाभिमन्त्र्य सप्तवारं तथा पुनः। तत्राभिमन्त्रयेदेवं सप्तभिस्तु विचक्षणः ॥ स्फोटद्वारा भवेत्प्लीहा भस्मीभूता न संशयः। कर्पूराद्यष्टगन्धेन पुच्छाकारे पटे लिखेत् ॥ कोकिलाक्षस्य लेखिन्या रूपं हनुमतो मनुम्। उद्धृत्याष्टादशार्णं तु मन्त्रमध्येऽभिधामरैः ॥ मूर्ध्नि बद्धेन तेनैव त्रैलोक्यं जयति ध्रुवम्। यद्वा सेनाजयेच्छायां पताकायां समालिखेत् ॥ चन्द्रसूर्यग्रहे जप्त्वा मातृका मोक्षणावधि। होमयेच्च दशांशेन त्रैलोक्यं जयति ध्रुवम्। युद्धकाले तां पताकां गजाश्वोपरि संस्थिताम्। दर्शयेत्परसैन्यस्य भङ्गो भवति निश्चितम् ॥ मालामन्त्रं जपेद्यस्तु हनुमन्तं स्मरन्रणे। वज्राङ्गो जायते युद्धे हनुमत्समविक्रमः ॥

---

१ भूतानां। २ आयुरथपरडाहेति। ३ तिलसर्षपकादिभिः। ४ तद्भङ्गः स्यात्सुनिश्चितं। ५ स्मरन्प्रभुम्।

Scanned with CamScanner

अथ रक्षां प्रवक्ष्यामि सर्वसिद्धिप्रदा[1]यिकाम् । स्तम्भिनीं सर्वसैन्यानां भूतानां च वशंकरीम् ॥ रोचनाकुङ्कुमाभ्यां च भूर्जपत्रे सुशोभने । सुवर्णमयलेखन्या यन्त्रमष्टदलं लिखेत् ॥ साध्यनाम च तन्मध्ये मूलमन्त्रं दलाष्टके । मालामन्त्रं च तद्बाह्ये त्रिधा ह्रींकारवेष्टितम् ॥ वेष्ट्य यन्त्रं त्रिलोहेन कटिबाहुशिरःस्वपि । धारयेद्य इमां रक्षां विघ्नस्तस्य न जायते ॥ रणे राजकुले द्यूते व्यवहारे पराभवे । शस्त्रं नाक्रमते तस्य वज्रदेहो महाबलः ॥ उपसर्गादिदोषाश्च विषं स्थावरजङ्गमम् । न भयं विद्यते तस्य स्त्रीणां चातीव वल्लभः ॥ तस्य पीडां न कुर्वन्ति ग्रहाश्चैव ह्युपग्रहाः । जलवह्निभयं नास्ति व्याघ्रतस्करजं तथा ॥ ज्वराः सर्वे विनश्यन्ति व्याहिकाद्या महाबलाः । ये क्षयादिमहारोगा यन्त्रराजविभावतः ॥ तारं हकारोऽग्निसखः षट्दीर्घः स्वरबिन्दुमान् । प्रणवान्तोऽष्टाक्षरको मूलमन्त्र उदाहृतः ॥ ताराद्यं वज्रकायेति वज्रचूडेति चोद्धरेत् । कपिल(:) पिङ्गल(:) प्रोक्त्वा ऊर्ध्वकेशो महाबलः ॥ रक्तमुखस्तडिज्जिह्व महारौद्रपदं ततः । दंष्ट्रोत्कटकहकहः करालिंश्चवदेत्ततः ॥ महादृढप्रहारिंश्च लंकेश्वरवधाय तु । महासेतुबन्धपदं महाशैलप्रवाह च ॥ गगन(ने)चर एह्येहि भगवंश्च महापदम् । बलपराक्रमपदं भैरव ज्ञापयेति च ॥ एह्येहि महारौद्र दीर्घपुच्छेन वेष्टय । वैरिणं भञ्जयपदं द्विरुक्तं हुंफडन्ततः ॥ पञ्चविंशत्या ह्यधिकः प्रोक्तो मन्त्रः शताक्षरः । मालाख्योऽयं ज्वरादीनां रोगाणामन्तकः स्मृतः ॥ इति श्रीहनुमन्मन्त्रोद्धारः ॥

---

१ प्रदायकां । स्तम्भनीं ।

Scanned with CamScanner

अथाङ्गदेवतामन्त्रोद्धारः ॥ गणेशादिचतुर्णां तु रामाङ्गत्वं प्रतीयते। सर्वे वेदाः[1] स्तुवन्तीति सामान्यश्रुतिचोदनात्। मन्त्रराजाङ्गता सर्वमन्त्राणां श्रुतिचोदिता[2]। ज्ञेया साक्षादनुक्तापि परब्रह्मत्वविग्रहात्। तस्याग्नेये गणेशानं सूर्यं नैर्ऋत्यकोणके। वायव्ये त्वम्बिकामीशमीशान्ये पूजयेत्क्रमात् ॥

[शम्भौ मध्यगते हरीनहरभूदेव्यो, हरे शंकरे-
भास्येनागसुता, रवौ हरगणेशाजाम्बिकाः स्थापिताः।
देव्यां विष्णुहरेभवक्रवयो, लम्बोदरेजेश्वरे-
नार्याः, शंकरभागतोऽतिसुखदा व्यस्तास्तु ते हानिदाः ॥]

(इति बोपदेवक्रमः)

शशिविसूगविशशिगसूशशिविगसूवि। सूगशव्यन्तरे तूक्तः क्रमः पञ्चसु वह्नितः। रविर्विनायको देवी विष्णुः शंकरपूजने। गणेशार्काम्बिकेशानास्तथा नारायणार्चने। विघ्नो हरिर्भवानी च शिवसूर्यार्चने क्रमात्। देव्यर्चने शिवो विघ्नः सूर्यो विष्णुस्तथैव च। शिवो रविर्भवानी च विष्णुर्विघ्नेश्वरार्चने। आग्नेयादिषु कोणेषु पूज्यास्त्वङ्गाङ्गिभावतः ॥ स्वस्थानरहिता देवा दुःखशोकभयप्रदाः। मुख्ये पुष्पाञ्जलिं दत्त्वा गणेशाद्यर्चनं भवेत् ॥ गणेश एव मुख्यश्चेत्तत्र सूर्यक्रमाद्भवेत्। तेषां त्वनेके मन्त्राः स्युर्ज्ञेया ग्रन्थान्तराद्बुधैः। संक्षेपेणेह कथ्यन्ते ग्रन्थविस्तरभीतितः ॥ तारं(ॐ)श्री(श्रीं)शक्ति(ह्रीं)स्मरभूः(क्लीं)स्वबीजं(ग्लौं) गणपतिं वदेत्। ङेन्तं वरान्ते वरदं सर्वयुक्तं जनं च मे ॥ वशं चेति वदेत्पश्चादानयेत्यग्निवल्लभाम्। अष्टाविंशत्यक्षरोऽयं महागणपतेर्मनुः ॥ गणकोऽस्य ऋषिश्छन्दो

१ देवाः। २ श्रुतिसूचिता। ३ काशीपुस्तकाद्गृहीतमिदं पद्यं.

Scanned with CamScanner

गायत्री निचृदन्विता । महागणपतिः प्रोक्तो देवो भुवनवन्दितः ॥ षष्ठबीजोन्तजौ शक्तिः श्रीर्मुखं हृदयं स्मरः[1] । सर्वाभीष्टफलप्राप्त्यै विनियोगोऽत्र कीर्तितः ॥ तारायादिस्वबीजेन दीर्घभाजाङ्गकल्पना ॥ [रत्नद्वीपे[2] स्वर्णभूमौ कल्पवृक्षस्य मूलके । रत्नसिंहासनं रम्यं चतुःसिंहास्यपादकम् ॥ महासिंहासने रम्ये त्रिषट्कोणान्तकर्णिके । मातृकाम्बुज आसीनं विराड्रूपं गणेश्वरम् ॥ नानासुरद्रुमाधःस्थलक्ष्मीबिल्वादिभिर्वृतम् । लम्बोदरं दशभुजमेकदंष्ट्रं गजाननम् ॥ उद्यत्कोट्यर्कसंकाशं त्रिनेत्रं सर्पभूषणम् । सिद्ध्यालिङ्गितवामाङ्गमेकदन्तविराजितम् ॥] बीजापूरगदेक्षुकार्मुकरु()जा चक्राब्जपाशोत्पलव्रीह्यग्रस्वविषाणरत्नकलशान्हस्तैर्वहन्तं भजे । हस्तीन्द्राननमिन्दुचूडमरुणच्छायं त्रिनेत्रं रसादाश्लिष्टं प्रियया सपद्मकरया स्वाङ्कस्थया सन्ततम् ॥ अग्रेऽथ बिल्वमभितश्च रमारमेशौ तद्दक्षिणे वटजुषौ गिरिजावृषाङ्कौ । पृष्ठे च पिप्पलजुषौ रतिपञ्चबाणौ[3] सव्ये प्रियङ्गुमभितस्तु महीवराहौ ॥ सव्यापसव्यभागेऽस्य ध्येयौ शङ्खपद्म[संज्ञ]निधी । मौक्तिकमाणिक्याभौ वर्षन्तौ धारया धनानि सदा ॥ निजपुष्करधृतकलशामृतमणिमुक्ताप्रवालवर्षेण । अविरतधारां विकिरन्नभितः साधकसमग्रसंपत्त्यै ॥ (सूर्यमन्त्रः) तारं घृणिः सूर्यपदमादित्यमिति चोद्धरेत् । एवमष्टाक्षरः सूर्यमन्त्रोऽयं समुदीरितः ॥ भार्गवोऽस्य ऋषिश्छन्दो गायत्री देवता मनोः । आदित्यो मुनिभिः प्रोक्तो दृष्टादृष्टफलप्रदः ॥ अङ्गमन्त्राः प्रदृश्यन्ते सत्याय हृदयं पुनः ।

---

१ स्मृतम् । २ धनुश्चिह्नान्तर्गतो भागः काशीपु. नास्ति । ३ पुष्पबाणौ ।

Scanned with CamScanner

ब्रह्मणे च शिरः प्रोक्तं विष्णवे च शिखा मता ॥ रुद्राय वर्म निर्दिष्टमग्नये नेत्रमीरितम् । शर्वायास्त्रं च विज्ञेयमिति स्यादङ्ग-कल्पना ॥ रक्ताब्जयुग्माभयदानहस्तं केयूरभूषाङ्गदकुण्डलाढ्यम्। माणिक्यमौलिं दिननाथमीडे बन्धूककान्तिं विलसत्त्रिनेत्रम् ॥ (प्रासादमन्त्रः) शान्तोऽनुग्रहसंयुक्तो बिन्दुभूषितमस्तकः। प्रासादाख्यो मनुः प्रोक्तो भक्तानां[1] सुरपादपः ॥ ऋषिः स्याद्वामदेवोऽस्य पङ्क्तिश्छन्दः समीरितम् । सदाशिवो देवता च हं बीजं शक्तिरौ स्मृता ॥ दीर्घस्वरयुजा मूलबीजेन स्यात्षडङ्गकम् ॥ मुक्ता-पीतपयोदमौक्तिकजपावर्णैर्मुखैः पञ्चभिरुद्यक्षैरर्चितमीशमिन्दुमु-कुटं पूर्णेन्दुकोटिप्रभम्। शूलं टङ्ककृपाणवज्रदहनं नागेन्द्रघण्टाङ्कु-शान्पाशाभीतिवरं दधानमसिताकल्पोज्ज्वलं चिन्तयेत् ॥ (नकु-लीमन्त्रः) नेकुलीशोऽग्निमारूढो वामनेत्रार्धचन्द्रवान्[2] । भुवनेशी समाख्याता भुक्तिमुक्त्येकसाधनम् ॥ ऋषिः शक्तिर्भवेच्छन्दो गा-यत्री देवता मनोः। हं बीजमीं शक्तिरस्य[3] इष्टार्थे विनियोजयेत् ॥ षट्दीर्घयुक्तबीजेन षडङ्गानि प्रकल्पयेत् । उद्यदादित्यसंकाशां त्र्यक्षां स्मेरमुखीं भजे । पाशाङ्कुशाभयवरान्दधतीं जगदम्बि-काम् ॥ सिद्धादिशोधना नैषामङ्गत्वे सति राजवत् । पूजाप्रकारः प्राधान्येनोक्तो नो ग्रन्थविस्तरात् ॥ इत्यङ्गदेवतामन्त्रोद्धारः ॥

अथ राममन्त्रमाहात्म्यम् ॥ अगस्त्योक्तं च माहात्म्यं प्राधान्यकारणं महत् । वक्ष्ये श्रीरामचन्द्रस्य[4] श्रुत्वा यद्यान्ति सद्गतिम् ॥ सर्वेषु मन्त्रवर्येषु श्रेष्ठं वैष्णवमुच्यते । गाणपत्येषु शैवेषु शाक्तसौरेष्वभीष्टदम् । वैष्णवेष्वपि सर्वेषु राममन्त्राः फलाधिकाः । गणपत्यादिमन्त्रेभ्यः कोटिकोटिगुणाधिकाः ॥

१ भक्ताभीष्टसुखप्रदः। २ लकुलाशः। ३ रस्येष्टार्थे च। ४ श्रीमन्त्रराजस्य।

Scanned with CamScanner

विनैव दीक्षां विप्रेन्द्र पुरश्चर्यां विनैव हि । विनैव न्यासविधिना जपमात्रेण सिद्धिदाः ॥ मन्त्रास्तेष्वप्यनायासफलदोऽयं षडक्षरः । सर्वाभीष्टकरः सद्यः सर्वाघौघनिवारणः ॥ मन्त्रराज इति प्रोक्तः सर्वेषामुत्तमोत्तमः । दैनंदिनं च दुरितं पक्षमासर्तुवर्षजम् ॥ सर्वं दहति निःशेषमूर्णाचलमिवानलः । ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च ॥ स्वर्णस्तेयसुरापानगुरुतल्पायुतानि च । कोटिकोटिसहस्राणि ह्युपपातकजान्यपि । सर्वाण्यपि प्रणश्यन्ति राममन्त्रानुकीर्तनात् ॥ इत्यादि । तथा च श्रुतिः—य एतत्तारकं ब्राह्मणो नित्यमधीते स पाप्मानं तरति स मृत्युं तरति स भ्रूणहत्यां तरति स वीरहत्यां तरति स सर्वहत्यां तरति स संसारं तरति स सर्वं तरति सोऽविमुक्तात्माश्रितो भवति सोऽमृतत्वं गच्छतीति ॥ अनेन सदृशो मन्त्रो जगत्स्वपि न विद्यते । अनेनाराधितो रामः प्रसीदत्येव सत्वरम् ॥ सामान्येनैव सर्वेषां मन्त्राणां राघवस्य तु । अनुष्ठानविधिर्ज्ञेयो विशेषस्तत्र तत्र वै ॥ इति राममन्त्रमाहात्म्यम् ॥

अथ राममन्त्रबीजार्थः ॥ श्रीराममन्त्रराजस्य सम्यगर्थोऽभिधीयते । संहितोपनिषन्मूलः सर्वकार्यार्थसिद्धिदः ॥ रकारो वह्निवचनः प्रकाशे पर्यवस्यति । सच्चिदानन्दरूपोऽस्य परमात्मार्थ उच्यते ॥ व्यञ्जनं निष्कलं ब्रह्म प्राणो मायेति च स्वरः । व्यञ्जनैः स्वरसंयोगो विद्धि तत्प्राणयोजनम् ॥ रेफे ज्योतिर्मये तस्मात्कृतमाकारयोजनम् । मकारोऽभ्युदयार्थत्वान्मायेति च कीर्त्यते ॥ अयमेवान्तमुत्सृज्याकारमेकाक्षरो मनुः । सोऽयं बीजस्य हेतुः स्यात्समायं ब्रह्म तूच्यते ॥ सबिन्दुः सोपि पुरुषः शिवसूर्येन्दुरूपवान् । ज्योतिस्तस्य शिखारूपं नादः

Scanned with CamScanner

सा प्रकृतिर्मता ॥ प्रकृतिः पुरुषश्चोभौ समायं ब्रह्मणस्त्वतः। बिन्दुनादात्मकं बीजं वह्निसोमलता[1] मता ॥ अग्नीषोमात्मकं विश्वं रामबीजे प्रतिष्ठितम् । यथैव वटबीजस्थः प्राकृतश्च महाद्रुमः । तथैव रामबीजस्थं जगदेतच्चराचरम् ॥ इति श्रीराममन्त्रबीजार्थः ॥

अथ राममन्त्रराजार्थः (मन्त्राक्षरार्थः) ॥ अक्षरार्थोऽधुनास्यैव विशदीक्रियते मनोः। बीजोक्तमुभयात्मत्वं रामनामनि दृश्यते ॥ बीजं मायाविनिर्मुक्तं परं ब्रह्मेति कीर्त्यते । मुक्तिदं साधकानां तन्मकारो भक्तिदो मतः ॥ मारूपत्वादतो रामो भुक्तिमुक्तिफलप्रदः॥ आद्यो वा तत्पदार्थः स्यान्मकारस्त्वंपदार्थवान्। तयोः संयोजनमसीत्यात्मतत्त्वविदो विदुः ॥ तत्त्वमस्यादिवाक्यं तु केवलं मुक्तिदं यतः । भुक्तिमुक्तिप्रदं चेदं तस्मादप्यतिरिच्यते ॥ रमन्ते योगिनो नित्यं यद्वा रमयति स्वकान्। निर्गुणं सच्चिदानन्दं सगुणं चेति कीर्त्यते ॥ जीववाचि नमोनाम चात्मारामेति गीयते । तदात्मिका या चतुर्थी सैव मायेति कथ्यते ॥ मन्त्रोऽयं वाचको रामो वाच्यः स्याद्योग एतयोः। फलदश्चैव सर्वेषां साधकानां न संशयः ॥ यथा नामवाचकेन नाम्नार्थोऽभिमुखो भवेत् ॥ तथा बीजात्मको मन्त्रो मन्त्रिणोऽभिमुखो भवेत् । चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः । उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना ॥ मननान्मन्त्रणान्मन्त्रो मन्त्रिणां कल्पभूरुहः। मूलत्वात्सर्वमन्त्राणां मूलाधारसमुद्भवात् ॥ मूलस्वरूपलिङ्गत्वान्मूलमन्त्र इति स्मृतः।

---

१ सोमकला मतिः।

Scanned with CamScanner

सप्तकोटिमहामन्त्रा उपमन्त्राश्च तादृशाः ॥ वर्णा मन्त्राः स्वराः सर्वे मूलमन्त्रात्समुत्थिताः ॥ तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् । मूलमन्त्रं विजानाति यो विद्वान्गुरुदर्शितम् ॥ मूलविज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः । अणिमादिकमैश्वर्यमचिरादेव जायते ॥ इति श्रीराममन्त्रराजार्थः ॥

अथाधिकारिनिर्णयः ॥ मनुष्वेतेषु सर्वेषामधिकारोस्ति देहिनाम् । मुमुक्षूणां विरक्तानां तथा चाश्रमिणां सदा ॥ रामो ध्येयः प्रणववद्यतीनां तु विशेषतः । श्रुत्युक्तत्वात्तारकत्वं मन्त्रराजस्य यत्स्फुटम् ॥ अमर्धमात्रा बिन्दुश्च नादो वर्णाः क्रमेण षट् । तारकत्वात्तारकं तत् श्रुत्युक्तादवधार्यताम् ॥ अथ हैनं भरद्वाजः पप्रच्छ याज्ञवल्क्यं—किं तारकं किं तारयतीति । स होवाच याज्ञवल्क्यः—तारकं दीर्घानलं बिन्दुपूर्वकं दीर्घानलं पुनः । रामाय नमः चन्द्राय नमो भद्राय नमो हसौंतत्सद्ब्रह्मात्मकः सच्चिदानन्दाख्य इत्युपासितव्यः । अकारः प्रथमाक्षरं भवति उकारो द्वितीयाक्षरं भवति मकारस्तृतीयाक्षरं भवति अर्धमात्रा चतुर्थाक्षरं भवति बिन्दुः पञ्चमाक्षरं नादः षष्ठाक्षरं भवति तारकत्वात्तारको भवति तदेव तारकं ब्रह्म त्वं विद्धीति श्रुतेः । [1]श्रीरामेति परं जाप्यं तारकं ब्रह्मसंज्ञितमिति तथाच—रामरामेतिरामेति एतत्तारकमुच्यते । इत्याद्याः श्रुतयः सन्ति स्मृतयश्च सहस्रशः । एतदेवाविमुक्ते श्रीरुद्रः कथयति स्वयम् । मुमूर्षोर्मणिकर्णिक्यामर्धोदयनिवासिनः । अहं दिशामि ते मन्त्रं तारकं ब्रह्मसंज्ञितम् । ब्रह्म त्वं जानकीनाथ इति पाद्मे शिवोक्तितः । रुद्रस्तु तारकं ब्रह्म व्याचष्टेति श्रुतेरपि ।

---

१ रामेति परमं जाप्यं ।

Scanned with CamScanner

सर्वेषामधिकारो वै ज्ञातव्यो देशिकोत्तमैः । अगस्त्यसंहितायां तु ह्येतदेवोपपादितम् । शुचिव्रततमाः शूद्रा धार्मिका द्विजसेवकाः । स्त्रियः पतिव्रताश्चान्ये प्रतिलोमानुलोमजाः । लोकाश्चाण्डालपर्यन्ताः सर्वेप्यत्राधिकारिणः । श्रुतिब्रह्माह षड्वर्णं श्रुतिवर्णद्वयात्मकम् । द्वयोर्विरोधः संप्राप्तो नश्यते तद्व्यवस्थया । श्रुतिस्मृतिविरोधे तु श्रुतिरेव बलीयसी । व्यवस्थाभावमाश्रित्य वाक्यमेतन्नियामकम् । षड्वर्णं ब्राह्मणादीनां त्रयाणां तु द्विवर्णकम् । अन्येषां दैशिकेन्द्रेण वक्तव्यं तारकं परम् । विना तु प्रणवं मन्त्रान् गायत्रीं श्रुतिवारणात् । सावित्रीं लक्ष्मीं यजुः प्रणवं यदि जानीयात्स्त्री शूद्रः स मृतोऽधो गच्छति । तस्मात्सर्वदानाचष्टे यद्याचष्टे स आचार्यस्तेनैव मृतो भवतीति तापनीयश्रुतिः । अन्येषां देशिकेन्द्रेण देयो मन्त्रः श्रुतिं विना ॥ तथाचाहागस्त्यः—मन्त्रोऽयमुपदेष्टव्यो ब्राह्मणाद्यनुरूपत इति ॥ न न्यूनव्यक्षरं वाच्यं नच पूर्णषडक्षरम् । ङेन्ताद्यपेक्षाहीनत्वाच्छ्रुतिरप्याह निर्भ्रमम् ॥ रमन्ते योगिनोऽनन्ते[1] सत्यानन्दे चिदात्मनि । इति रामपदेनासौ परं ब्रह्माभिधीयते ॥ इत्यधिकारिनिर्णयः ॥

अथ मन्त्रदीक्षाविधिः ॥ अभिषेकं प्रवक्ष्यामि दीक्षाविधिमनुत्तमम् । उपासनशतेनापि विना येन न सिद्ध्यति ॥

अथ तत्र मासशुद्धिः ॥ मधुमासे भवेद्दुःखं माधवे रत्नसंचयः । मरणं भवति ज्येष्ठे आषाढे बन्धुनाशनम् ॥ समृद्धिः श्रावणे नूनं भवेद्भाद्रपदे क्षयः । प्रजानामाश्विने मासि सर्वतः

१ नित्यं ।

शुभमेव हि ॥ ज्ञानं स्यात्कार्तिके सौख्यं मार्गशीर्षे भवत्यपि । पौषे ज्ञानक्षयो माघे भवेन्मेधाविवर्धनम् ॥ फाल्गुनेपि समृद्धिः स्यान्मलमासं परित्यजेत्[1] ॥ इति मासशुद्धिः ॥

अथ वारशुद्धिः ॥ रवौ गुरौ तथा सोमे कर्तव्यं बुधशुक्रयोः । इति वारशुद्धिः ॥

अथ नक्षत्रशुद्धिः ॥ अश्विनीरोहिणीस्वातीविशाखाहस्तभेषु च । ज्येष्ठोत्तरात्रयेष्वेवं कुर्यान्मन्त्राभिषेचनम् ॥ तथाच नारदतन्त्रे—रोहिणीश्रवणार्द्रा च धनिष्ठा चोत्तरात्रयम् । पुष्यः शतभिषश्चैव दीक्षानक्षत्रमुच्यते ॥ इति नक्षत्रशुद्धिः ॥

अथ तिथिशुद्धिः ॥ पूर्णिमा पञ्चमी चैव द्वितीया सप्तमी तथा । त्रयोदशी च दशमी प्रशस्ताः सर्वकामदाः ॥ मन्त्रसारसंग्रहे—द्वितीया पञ्चमी वापि षष्ठी चापि विशेषतः । द्वादश्यामपि कर्तव्यं त्रयोदश्यामथापि वा ॥ इति तिथिशुद्धिः॥

अथ कालशुद्धिः ॥ पञ्चाङ्गशुद्धिदिवसे सोदये शशितारयोः । गुरुशुक्रोदये शुद्धलग्ने द्वादशशोधिते ॥ चन्द्रतारानुकूल्यं च शस्यते सर्वकर्मसु ॥ इति कालशुद्धिः ॥

अथ मन्त्रग्रहे सूर्यपर्वप्रशंसा ॥ सूर्यग्रहणकाले तु नान्यदन्वेषितं भवेत् । सूर्यग्रहणकालेन समानो नास्ति कश्चन । तत्र यद्यत्कृतं सर्वमनन्तफलदं भवेत् ॥ न मासतिथिवारादि शोधनं सूर्यपर्वणि । ददातीष्टं गृहीतं यत्तस्मिन्काले गुरोर्नृषु ॥ सिद्धिर्भवति मन्त्रस्य विनायासेन वेगतः । अतस्तत्रैव रामस्य मन्त्रतीर्थाभिषेचनम् ॥ कर्तव्यं सर्वयत्नेन मन्त्रसिद्धिमभीप्सुभिः॥

---

१ विवर्जयेत् ।

Scanned with CamScanner

तथाच—सत्तीर्थेऽर्कविधुग्रासे तन्तुदामनपर्वणोः । मन्त्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोधयेत् ॥ इति मन्त्रग्रहे सूर्यपर्वप्रशंसा ॥

अथ दीक्षाग्रहणविधानम् ॥ उपासकस्तु शुद्धात्मा गुरुं यत्नेन तोषयेत् । स्ववित्तचित्तकायैश्च भक्तिश्रद्धासमन्वितः ॥ यथा ददाति संतुष्टः प्रसन्नो वरदो मनुम् । स्वयमेव तथा कुर्यादितिकर्तव्यताक्रमः ॥ गुरुर्विशुद्धः प्रागेव शुद्धाहात्प्रथमेऽहनि[1] । संकल्प्योपोष्य कर्तव्यमङ्कुरारोपणं शुभम् ॥ कुर्यान्नान्दीमुखं श्राद्धं पूर्वेद्युः स्वस्तिवाचनम् । स्वगृह्योक्तप्रकारेण तदेतद्विदधीत वै ॥ चतुर्भिर्वर्णकैः सम्यङ्नीलपीतसितासितैः । सर्वतोभद्रमालिख्य तत्र धान्याञ्जलिद्वयम् ॥ निधाय कलशं तत्र तीर्थतोयसुपूरितम् । वेष्टितं वस्त्रयुग्मेन पञ्चरत्नसमन्वितम् ॥ आम्राश्वत्थप्रसूनाढ्यं शाखाभिरुपशोभितम् । नारिकेलफलोपेतं मङ्गलैः परितोज्ज्वलम्[2] ॥ सर्वोत्सवसमायुक्तं कृत्वा तत्रार्चयेद्धरिम् । ऋग्यजुःसामसूक्तैश्च स्मार्तैः पौराणिकैरपि ॥ मन्त्रैरागमिकैश्चैव वैष्णवैर्देवमर्चयेत् । वरयेद्ब्राह्मणान्वासःकुण्डलाङ्गुलिभूषणैः ॥ श्रावयेत्तैस्तु सूक्तानि मन्त्रविध्युत्सवे शुभे । गुरुस्तन्त्रोक्तविधिना[3] भूतशुद्ध्याद्यथाचरेत् ॥ न्यासजालं च विन्यस्य विधिवत्तत्र पूजयेत् । पूजनीयैश्च पूर्वोक्तसाधनैः पुरुषोत्तमम् ॥ पूर्वोक्तनृत्यगीताद्यैरुत्सवं तत्र कारयेत् । पुण्यस्त्रीभ्यो गृहस्थेभ्यो दद्याद्बहु सुविस्तरम् ॥ गन्धपुष्पाम्बुताम्बूलसद्वासोभूषणादिकम् । भोजनं चान्नपानीयमन्येभ्योपि प्रदापयेत् ॥ एवं तत्रोत्सवं कृत्वा रात्रौ जागरणं चरेत् । एवं दिवा च रात्रौ च त्रिकालं पूजयेत्प्रभुम् ॥ षट्सहस्रं जपे-

१ सप्तमे । २ आर्षोत्र संधिः । ३ स्तत्कल्पविधिना ।

Scanned with CamScanner

त्र पूजान्तेऽहर्निशं गुरुः। परेऽहनि तथा प्रातः पूर्ववत्सर्वमाचरेत्॥ संपूज्य विधिवद्राममग्निकार्यं तथाचरेत्॥

अथ कुण्डलक्षणम्॥ वसिष्ठसंहितायां तु कुण्डलक्षणमीरितम्। गृहस्येशानभागे च मण्डपं कारयेद्बुधः॥ षड्द्वादशाष्टभिर्हस्तैः षोडशैर्वा समन्ततः। चतुर्द्वारसमायुक्तं तोरणाद्यैरलंकृतम्॥ कुण्डं तन्मध्यभागे तु कारयेच्चतुरस्रकम्। वितस्तिद्वयखातं तु कुण्डं सचतुरङ्गुलम्॥ विप्राणां क्षत्रियाणां तदङ्गुलत्रयसंयुतम्। वैश्यानां द्व्यङ्गुलाधिक्यं शूद्राणां हस्तमात्रकम्॥ प्रथमा मेखला तत्र द्वादशाङ्गुलविस्तृता। चतुर्भिरङ्गुलैस्तस्याश्चोन्नतं च समन्ततः॥ तस्याश्चोपरि वप्रः स्याच्चतुरङ्गुलमुन्नतः। अष्टाभिरङ्गुलैः सम्यग्विस्तीर्णं तु समन्ततः॥ तस्योपरि पुनः कार्यो वप्रश्चापि तृतीयकः। चतुरङ्गुलविस्तीर्णश्चोन्नतश्च तथाविधः॥ योनिस्तु पश्चिमे भागे प्राङ्मुखा मध्यतः[1] स्थिता। षडङ्गुलैश्च विस्तीर्णा चायता द्वादशाङ्गुलैः॥ पृष्ठोन्नता गजोष्ठाभा सच्छिद्रा मध्यतोन्नता। कण्ठोऽष्टयवमात्रश्च कुण्डे तु करमात्रके॥ कण्ठो यत्नेन कर्तव्यो भुक्तिमुक्तिफलेप्सुभिः। नाभिरप्यथवा कुण्डमेकमेखलकं भवेत्॥ एवंलक्षणसंयुक्तं कुण्डमिष्टार्थसिद्धिदम्। अनेकदोषदं कुण्डं यत्र न्यूनाधिकं भवेत्[2]॥ तस्मात्सम्यक्परीक्ष्यैव कर्तव्यं शुभमिच्छता। हस्तमात्रं[3] स्थण्डिलं वा संक्षिप्ते होमकर्मणि॥ इति कुण्डलक्षणम्॥

अथ वेदीलक्षणम्॥ वायव्ये वाथ ईशान्ये पूजावेदीं प्रकल्पयेत्। हस्तोन्नतां च विस्तीर्णां चतुरस्रां समन्ततः॥

---

१ मध्यसंस्थिता। २ यदि। ३ इषुमात्रं।

Scanned with CamScanner

शालितण्डुलचूर्णैश्च नीलपीतसितासितैः । रक्तारुणैर्धूम्रगौरैर्वर्णैर्यत्रं समालिखेत् ॥ राज्ञो दीक्षा यदान्यत्र वसुपत्रं निरूपितम् । आदौ रेखाश्चतुर्दिक्षु दश सप्त च कारयेत् ॥ (मध्ये[1] षोडशकोष्ठानि यत्रार्थं परिमार्जयेत् । ततः पङ्क्तिद्वयं मार्ज्यं दिक्षु कोणे धरागृहम् ॥ विदिक्षु च समा रेखास्तत्र द्वादश राशयः । कृत्वा पङ्क्तिद्वयं बाह्यं वल्लचर्थे मार्जयेत्ततः ॥ शेषपङ्क्तिद्वये षड्भिः कोष्ठैर्द्वाराः समन्ततः । शोभोपशोभा षट्कोष्ठैरर्धचन्द्रास्त्रिभिस्त्रिभिः ॥ पञ्चायतनदीक्षासु ह्येष साधारणः क्रमः ।) तत्राष्टपत्रं कमलं वृत्तत्रयपरीवृतम् ॥ सोमसूर्याग्निबिम्बानि तथा कुर्याद्विचक्षणः । चतुरस्रं बहिस्तस्य षट्कोणं कर्णिकान्तरे॥ पीतं पूर्वे सितं देयं पश्चिमे चोत्तरे तथा । रक्तं तु दक्षिणे कृष्णपाटलं वह्निसंस्थितम् ॥ नैर्ऋत्ये नीलवर्णं तु वायव्ये धूम्रवर्णकम् । ऐशे गौरं विनिर्दिष्टमष्टपत्रे त्वयं क्रमः ॥ शङ्खचक्रगदापद्मधनुर्बाणांश्च मण्डले । विलिख्य वर्णकैः सम्यक् तत्र रामं प्रपूजयेत् ॥ न्यायार्जितैः साधनैश्च दानहोमार्चनादिकम् । कुर्यान्न चेदधो याति भक्त्या कुर्वन्नपि द्विजः ॥ कुण्डान्तरेष्वेवमेवमाराध्य जुहुयान्मुने ॥ इति वेदिकालक्षणम् ॥

अथ स्रुक्स्रुवलक्षणम् ॥ स्रुचं बाहुप्रमाणेन होमार्थं विदधीत वै । चतुरस्रं विधायादौ सप्तपञ्चाङ्गुलं क्रमात् ॥ तृतीयांशेन गर्तः स्यात्तदन्तर्वृत्तशोभितम् । खात्वा समं तिर्यगूर्ध्वं तदधः शोधयेद्बहिः ॥ चतुर्थांशं चाङ्गुलस्य शेषाच्चार्धं तदन्ततः । रम्यां च मेखलां खाते शिष्टेनार्धेन कारयेत् ॥

---

१ धनुश्चिह्नगतो विषय एकस्मिन्पुस्तकेऽधिकोस्ति ।

Scanned with CamScanner

कुर्यात्त्रिभागविस्तारमङ्गुष्ठेन समायतम्। सार्धमङ्गुष्ठकं वा स्यात्तदग्रे तु मुखं भवेत्॥ चतुरङ्गुलविस्तारं पञ्चाङ्गुलमथापि वा। त्रिद्व्याङ्गुलिकं तस्य मध्यान्तं तु सुशोभनम्॥ सुषिरं कण्ठदेशस्य विशेद्यावत्कनीयसी। शेषं दण्डं तु कर्तव्यं यथारुचि विचित्रकम्। अष्ट(वश) केन(?) समायुक्तो हस्तमात्रः स्रुवो भवेत्॥ चषकं(?) शोभनं वृत्तं द्व्यङ्गुलं विदधीत वै। यथाल्पपङ्के गोष्पादो रुचिरो दृश्यते तथा॥ पालाशपत्रे निश्छिद्रे रुचि(रे)रौ स्रुक्स्रुवौ मुने। विदध्याद्वाश्वत्थपत्रे संक्षिप्ते होमकर्मणि॥ इति स्रुक्स्रुवलक्षणम्॥

अथाऽग्निमुखम्॥ ततः कुण्डस्थलं सम्यग्गोमयेनोपलिप्य च। आदौ वह्निमुखं कुर्यादुपविष्टः सुविष्टरे॥ प्राणानायम्य मनसा जपेन्मन्त्रमनन्यधीः। यावन्मनुः संचरति सर्वाङ्गेष्वपि निश्चलः॥ संकल्प्य स्थण्डिले कुण्डे कृत्वा रेखाश्च मध्यतः। तिस्रः पूर्वाग्रका उत्तराग्रास्तिस्रस्तथापराः॥ षट्कोणेऽथ त्रिकोणे[1] वा वह्निमन्त्रादधीत वै। प्रोक्ष्योपसार्य तत्पश्चाद्दत्वा विष्टरमादरात्॥ लक्ष्मीमृतुमतीं तत्र प्रभोर्नारायणस्य च। ग्राम्यधर्मेण संजातमग्निं तत्र विचिन्तयेत्॥ प्रमथ्य विधिनैवाग्निमाहिताग्नेर्गृहादपि। आनीय वादधीतात्र कुशैः प्रज्वाल्य यत्नतः॥ संप्रोक्ष्य यज्ञियैः काष्ठैः पुनः प्रज्वालयेदपि। प्राणायामं ततः कृत्वा परिस्तीर्य कुशाङ्कुरैः॥ स्वगृह्योक्तविधानेन वासुदेवादिभिर्मुने। पात्राण्यासाद्य विधिवदिध्ममस्त्रेण मन्त्रवित्॥ तान्यवोक्ष्य पवित्रेण चोत्तानानि विधाय च। पुनः प्रोक्ष्यानयेत्पात्रं परिपूर्य शुभाम्बुना॥ दत्वाक्षतान्पवित्रं च तत्रोत्पूय

१ षट्कोणं वा त्रिकोणं वा।

निधाय तत् । दिश्युत्तरस्यां तत्पात्रं प्रणीतेत्युच्यते बुधैः ॥ तत्रार्चयेत्प्रभुं विष्णुं ब्रह्माणं ब्राह्मणैर्युतम् । आज्यं संस्कृत्य विधिवत्सुक्स्रुवावोमिति भ्रुवन् ॥ गर्भाधानादिकं वह्नेर्विवाहान्तं समाचरेत् । गर्भधानं पुंसवनं सीमन्तोन्नयनं पुनः ॥ अनन्तरं जातकर्म स्यान्नामकरणं तथा । उपनिष्क्रमणं पश्चादन्नप्राशनमीरितम् ॥ चूडोपनयनं भूयो महानाम्नी महाव्रतम् । अथोपनिषदं पश्चाद्गोदानोद्वाहकौ मृतिः ॥ अष्टावष्टौ च तारेण चैकैकस्य तु कर्मणः । जुहुयादर्चिते वह्नौ वौषडन्तं समाप्य च ॥ कर्मान्तरं समारभ्य तदप्येवं समापयेत् । इध्माधानाद्यग्निमुखाज्यभागौ जुहुयात्पुनः ॥ (होमविधिः) ॥ एवमग्नौ तु संपन्ने वैष्णवं श्रपयेच्चरुम् । साङ्गावरणमन्त्राग्नौ पूजयेद्रघुनायकम् ॥ समिदाज्यचरूणां च प्रत्येकं षोडशाहुतीः । जुहुयान्मूलमन्त्रेण परिवारेभ्य एव च ॥ तिस्रो विनायकादिभ्यः सर्वेभ्योऽप्याहुतीर्मुने । द्वाराङ्गपरिवारेभ्यः सुरेभ्यो जुहुयात्पुनः ॥ हुत्वाज्येनाहुतीस्तत्र प्रदद्यात्तत्पदाप्तये[1] । तत्तद्द्रव्यैश्च जुहुयात्सर्वं चारु मनोहरैः ॥ द्वारपीठसुरेभ्यश्च हुत्वादौ जुहुयात्ततः । अङ्गादिवैष्णवान्तेभ्यस्तिस्र आज्याहुतीः पृथक् ॥ ततः स्विष्टकृतं हुत्वा घृतेन मुनिसत्तम । जलेन विधिना सम्यक् परिषिञ्चेत्[2]समन्ततः ॥ प्रणीतामार्जनं कृत्वा दद्याच्च ब्रह्मदक्षिणाम् । स्वस्ववित्तानुसारेण लोभमोहविवर्जितः ॥ ततो ब्रह्माणमुद्वास्य ब्राह्मणान्भोजयेदथ । अग्निमध्यगतं देवं पुनः स्वात्मनि योजयेत् ॥ एकीभूतं विचिन्त्यैवं वाचयेत्स्वस्तिवाचनम् । आशीर्वं

१ तत्तदाप्तये । २ परिषिच्य ।

चोभिर्विदुषामेधमानः सुखी भवेत् ॥ हुतशेषं ततः प्राश्य कु-
क्कुटाण्डप्रमाणकम् । मन्त्रितं रामगायत्र्या ततस्तस्मै बलिं हरेत् ॥
संनिधावपि देहस्य बाह्यान्तर्दिक्षु चान्धसा । नित्ये नैमित्तिके
काम्येऽप्येतदग्निमुखं स्मृतम् ॥ सर्वत्राभ्युदयश्राद्धमङ्कुरारो-
पणं तथा । आदावेव प्रकुर्वीत कर्मणोऽभ्युदयार्थतः ॥ इति
संक्षेपतोऽग्निमुखविधिः ॥

अथाभिषेकादि ॥ कलशस्थाय रामाय दद्यात्पुष्पाञ्जलिं
पुनः । गुरुः शिष्यमुपानीय भक्तिनम्रमकल्मषम् ॥ प्राणा-
नायम्य विधिवद्भूतशुद्धिं विधाय च । सुरास्त्वामिति मन्त्रैश्च
बहुभिर्ब्राह्मणैः सह । अभिषिञ्चेच्च तं मूर्ध्नि तदैतत्कल-
शोदकैः ॥ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः । वासु-
देवो जगन्नाथस्तथा संकर्षणो विभुः ॥ प्रद्युम्नश्चानिरुद्धश्च
भवन्तु विजयाय ते । आखण्डलोऽग्निर्भगवान्यमो वै निर्ऋति-
स्तथा ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथाश्विनौ । ब्रह्मणा
सहिता ह्येते दिक्पालाः पान्तु ते सदा ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा
पुष्टिः श्रद्धा क्रिया मतिः । बुद्धिर्लज्जा वपुः शान्तिर्माया
निद्रा च भावना ॥ एतास्त्वामभिषिञ्चन्तु तुष्टिः कान्तिः
क्षमा तथा । आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः । देवदानवगन्धर्वा
यक्षराक्षसपन्नगाः ॥ ऋषयो मनवो गावो देवमातर एव च ।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥ अस्त्राणि
चैव शस्त्राणि राजानो वाहनानि च । औषधानि च रत्नानि

---

१ कुक्कुराण्ड । २ ततः शिष्यं । ३ विभवाय ते । ४ पान्तु वः । ५ पूजिताः ।
६ मुनयो गावो ।

Scanned with CamScanner

कालस्यावयवाश्च ये ॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः । एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥ इति वसिष्ठसंहितायामभिषेकमन्त्राः ॥ नारायणः स्वयं रामः शिष्ये संनिदधातु वै । सर्वगः सर्वतोऽप्यस्ति प्रसीदतु दयानिधिः । इति संस्मृत्य संस्मृत्य तज्जलैरभिषेचयेत् ॥ इत्यभिषेकः ॥

अथ मन्त्रदीक्षोपदेशप्रकारः ॥ परिधाय सुवासश्च चन्दनाद्यवलिप्य च ॥ कुण्डले चाङ्गुलीयं च धारयित्वा न्यसेत्ततः । वैष्णवीं मातृकां चैव तत्त्वन्यासं विशारदः ॥ तन्मूर्तिपञ्जरन्यासमृष्यादिन्यासमेव च । पूर्ववद्विधिवच्छिष्यतनावेवं प्रविन्यसेत् ॥ ततस्तच्छिरसि स्वस्य हस्तं दत्त्वा मनुं जपेत् । अष्टोत्तरशतं मन्त्रं दद्यादुदकपूर्वकम् ॥ आवयोस्तुल्यफलदो भवत्वेवमुदीरयेत् । प्रसन्नवदनस्तस्मै शिष्याय मुनिपुङ्गवः ॥ स्वतो ज्योतिर्मयीं विद्यां गच्छन्तीं भावयेद्गुरुः । आगतां भावयेच्छिष्यो धन्योऽस्मीति विशेषतः ॥ कृतकृत्यस्तदा शिष्यः सर्वं तस्मै निवेदयेत् । यच्च यावच्च तद्भक्त्या गुरवे हृष्टचेतनः ॥ गोभूहिरण्यविपिनगृहक्षेत्रादिकं बहु । न चेदर्धं तदर्धं वा तद्दशांशमथापि वा ॥ अक्लेशादन्नवस्त्रादि दद्याद्वित्तानुसारतः ॥ तथाच श्रीभागवते—इयदेव हि सच्छिष्यैः कर्तव्या[1] गुरुनिष्कृतिः । यद्वै विशुद्धभावेन सर्वार्थात्मार्पणं गुरौ ॥ इति । प्रकारान्तरमालम्ब्य गुरुं यत्नेन तोषयेत् । गुरुपुत्रकलत्रादींस्तोषयेत्कनकादिभिः ॥ अर्हणाभिश्च बहुधा भक्त्याच्छादनभूषणैः । एवमुक्तप्रकारेण गुरवे दत्तदक्षिणः ॥ कृतकृत्यं तथात्मानं मत्वा विप्रांश्च भोजयेत् । तेभ्योऽपि दक्षिणां दत्वा

1 कर्तव्यं गुरुनिष्कृतं ।

Scanned with CamScanner

सर्वं तत्परिपूजयेत् ॥ ब्राह्मणाशीर्वचोभिश्च गुर्वाशीर्भिः समेधितः । विसर्जयेच्च गुर्वादींस्ततो भुञ्जीत मन्त्रवित् ॥ एवं लब्धमनुर्विप्रः कृतार्थः स्यान्न संशयः ॥ इति दीक्षाप्रकारः ॥

अथ संक्षेपदीक्षाप्रकारः ॥ दीक्षां वक्ष्येऽथ संक्षिप्तामशक्तावार्यसंमताम् । यदैवेच्छा तदा दीक्षा गुरोराज्ञानुरूपतः ॥ न तिथिर्नार्चनं होमो न स्नानं न जपक्रिया ॥ दीक्षायाः कारणं किंतु स्वेच्छावाप्ते तु सद्गुराविति ॥ तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव । विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥ इति दीक्षासामान्यकालः ॥ मुहूर्ते सर्वतोभद्रे[1] नवं कुम्भं निधाय च । सोदकं गन्धपुष्पाभ्यामर्चितं वस्त्रसंवृतम् ॥ सर्वौषधीपञ्चरत्नपञ्चपल्लवसंयुतम् । ततो देवार्चनं कृत्वा हुनेदष्टोत्तरं शतम् ॥ शिष्यं स्वलंकृतं वेद्यामुपाग्निमुपवेशयेत् । मन्त्रितं प्रोक्षणीतोयैः शान्तिकुम्भजलैस्तथा ॥ मूलमन्त्रेणाष्टशतं मन्त्रितैरभिषेचयेत् । अथ संपादयेन्मन्त्रं हस्तं शिरसि धारयन् ॥ समोस्त्वित्यक्षतान्दद्यादथ शिष्योऽर्चयेद्गुरुम् ॥ इति संक्षेपदीक्षा ॥

अथात्यन्ताशक्तदीक्षा ॥ अत्राप्यशक्तः कश्चिच्चेत्कुम्भमभ्यर्च्य साक्षतम् । तदम्बुनाभिषिच्याष्टवारं मूलेन [2]के करम् । निधायेष्टं जपेत्कर्णे उपदेशे त्वयं विधिः [3]॥ चन्द्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये । मन्त्रमात्रस्य कथनमुपदेशः स उच्यते ॥ इत्यत्यन्ताशक्तोपदेशविधिः ॥

अथोपासनचिन्ता ॥ द्विविधं स्याल्लब्धमनोर्बाह्यान्तरमुपासनम् । न्यासिनां चान्तरं प्रोक्तमन्येषामुभयं तथा ॥ पञ्चवर्णात्मिका शक्तिर्विद्याख्या समुदाहृता । नादात्मके शिवे

---

१ सर्वतोभद्रप्रकारोऽग्रे ५ पटले द्रष्टव्यः । २ के मूर्धनि । ३ निधायासुं ।

Scanned with CamScanner

षष्ठे संहृत्यात्मानुचिन्तनम् ॥ आत्मनस्तत्त्वचिन्ता तु स्याद्ध्यात्मानुचिन्तनम् । उभयोरैक्यचिन्ता तु तद्भावान्तकमान्तरम् ॥ द्रव्याद्याराधनं बाह्यं गृहस्थस्य तदप्यथ । तदेवोक्तं संहितायां शम्भुना शाम्भवीं प्रति ॥ न गृही ज्ञातमात्रेण परत्रेह च मङ्गलम् । प्राप्नोति चन्द्रवदने दानहोमादिभिर्विना ॥ गृहस्थो यदि दानादि दद्यान्न जुहुयादपि । पूजयेद्विधिना नैव कः कुर्यादेतदन्वहम् ॥ न ब्रह्मचारिणे दातुमधिकारोऽस्ति भामिनि । गुरुभ्योऽन्यत्र सर्वेभ्यः को वा दास्यत्यपेक्षितम् ॥ नारण्यवासिनां शक्तिर्न ते सन्ति कलौ युगे । परिव्राट् ज्ञानमात्रेण दानहोमादिभिर्विना । सर्वदुःखपिशाचेभ्यो मुक्तो भवति नान्यथा ॥ परिव्राडविरक्तश्च विरक्तश्च गृही तथा । कुम्भीपाके निमज्जेते तावुभौ कमलानने ॥ पुण्याः स्त्रियो गृहस्थाश्च मङ्गलैर्मङ्गलार्थिनः । पूजोपकरणैः कुर्युर्दद्युर्दानानि वार्हणम् ॥ वानप्रस्थाश्च यतयो यद्येवं कुर्युरन्वहम् । संसारान्न निवर्तन्ते विध्यतिक्रमदोषतः ॥ आरूढपतिता ह्येते भवेयुर्दुःखभाजनम् । अहिंसा परमो धर्मस्तेषामेषा न पद्धतिः ॥ न हिंसाव्यतिरेकेण लभ्यन्ते तानि तानि वै । भावनाकल्पितैः पूजासाधनैरेव पूज्यते ॥ न बहिर्योगयुक्तानामन्तस्तेषां प्रशस्यते । आत्मानं सततं रामं संभाव्य विहरन्ति ये । न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था न चापदः ॥ यतिभिर्भावितैर्द्रव्यैः पूज्यो रामोऽन्वहं ततः । संभावितैर्गृहस्थैश्च स एव क्रम उच्यते ॥ इत्युपासनचिन्ता ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्मुकुन्दवनश्रीचरणशिष्यानन्दवन-
विरचितायां श्रीरामार्चनचन्द्रिकायां प्रथमः पटलः ॥

Scanned with CamScanner

अथ द्वितीयः पटलः।

अथ भक्तेर्दार्ढ्यकथनम् ॥ वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमव्ययम् । ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ यच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया। पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया ॥ अतः पुम्भिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः । स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणम् ॥ तस्मादेकेन मनसा भगवान्सात्वतां पतिः । श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा[1] ॥ अव्यक्तब्रह्मसेवीह निर्विघ्नेन परं व्रजेत् । दुर्जयो ह्यरिषड्वर्गो मूर्तं ब्रह्म ततो भवेत् ॥ इति भक्तेर्दार्ढ्यम् ॥

अथ स्वधर्मनिष्ठा ॥ विना स्वधर्मं यत्किंचिद्देवताराधनादिकम् । सद्यो नश्येत्कृतं यस्मात्क्षणात्सैकतहर्म्यवत् ॥ इति स्वधर्मनिष्ठा ॥

अथ प्रातःस्मरणम् ॥ ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेद्रघुनन्दनम् । रामरामेतिरामेति तारकाख्यं शुभं परम् । श्रीपूर्वं जयमध्यस्थं द्विर्जयान्तं विचक्षणः ॥ प्रातः स्मरामि दिननायकवंशभूषं वेदान्तवेद्यमभयं कृतराजवेषम् । वैदेहिलक्ष्मणयुतं स्वजनाभिरामं संसारसर्पगरलोपशमाय रामम् ॥१॥ प्रातर्गृणामि चरितं दुरितं निहन्तुं रामस्य तस्य पलभक्षकृतान्तकस्य । यः सिन्धुबन्धकथया भवबन्धहन्ता राज्यं तनोति च विभीषणराज्यरत्या ॥२॥ प्रातः करोमि कलिकल्मषनाशकर्म तच्छर्मदं भवतु भक्तिकरं परं मे । अन्तःस्थितेन सुखभानुचिदात्मकेन

---

१ नित्यशः, सर्वदा ।

रामेण बाह्यगुरुदेहवता नियुक्तः ॥३॥ श्लोकत्रयं यः पठति प्रभाते श्रीरामचन्द्रार्पितचित्तवृत्तिः । आयुः श्रियं कीर्तिमनन्तसौख्यं लब्ध्वा चिरं रामपदं समेति ॥४॥ गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः पाणिस्पर्शाक्षमाभ्यां मृजितपथरुजो यो हरीन्द्रानुजाभ्याम् । वैरूप्याच्छूर्पणख्याः प्रियविरहरुषा रोपितभ्रूविजृम्भत्रस्ताब्धिर्बद्धसेतुः खलदवदहनः कोसलेन्द्रोऽवतान्नः ॥५॥ इति प्रातःस्मरणम् ॥

अथ मूत्रपुरीषोत्सर्गविधिः ॥ संध्यासूदङ्मुखोऽहन्यपि निशि तु पुनर्दक्षिणास्यो निवीती कुर्यान्मूत्रादिशौचं बहिरथ सलिलात्तत्र लिङ्गे मृदेका । पञ्चापानेऽथ हस्ते दश पुनरुभयोः सप्त चैतद्गृहस्थे द्वैगुण्यादिक्रमात्तद्व्रति-वनि-यतिषु स्यात्तदर्धं निशायाम् ॥ इति मूत्रपुरीषोत्सर्गविधिः ॥

अथाचमनविधिः ॥ कृत्वालं पादशौचं विमलमथ जलं त्रिः पिबेदुन्मृजेद्द्विर्देशिन्यङ्गुष्ठकाभ्यां[1] सजलमभिमृशेन्नासिकारन्ध्रयुग्मम् । अङ्गुष्ठानामिकाभ्यां नयनयुगमथो कर्णयुग्मं कनिष्ठाङ्गुष्ठाभ्यां नाभिदेशं हृदयमथ तलेनाङ्गुलीभिः शिरोंसौ[2] ॥ इत्याचमनविधिः ॥

अथ दन्तोल्लेखनविधिः ॥ दन्तोल्लेखे वितस्त्या भवति परिमितादायुरित्यादिमन्त्रात्प्रातः क्षीर्यादिकाष्ठैर्वटखदिरपलाशैर्विनाम्रार्कबिल्वैः । मुक्त्वा गण्डूषषट्कान्द्विरपि कुशमृते देशिनीमङ्गुलीभिर्नन्दाभूताष्टपर्वण्यपि न खलु नवम्यर्कसंक्रान्तिपाते ॥ अन्नाद्याय व्यूहध्वं ॐ सोमो राजा यमागमत् । स मे मुखं प्रमार्क्ष्यते[3] यशसा च भगेन च ॥ इति दन्तधावनमन्त्रः ॥

---

१ न्यङ्गुष्ठयुग्मात्स । २ शिरोंसं । ३ प्रमार्ज्येत ।

Scanned with CamScanner

अथ भावनास्वरूपम् ॥ सर्वाणि खानि संशोध्य शुचिर्भूत्वा विचक्षणः । स्वस्तिकाद्यासने ध्यायेद्राघवं स्वस्वरूपिणम् ॥ अहं रामो न चान्योस्मि ब्रह्मैवाहं न शोकभाक् । सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान् ॥ इति भावनास्वरूपम् ॥

अथ भगवत्प्रार्थनम् ॥ त्रैलोक्यचैतन्यमयादिदेव श्रीनाथ विष्णो भवदाज्ञयैव । प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये ॥ जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः । केनापि देवेन हृदि स्थितेन यथा नियुक्तोस्मि तथा करोमि ॥ इति प्रार्थनाविधिः ॥

अथ स्नानविधिः ॥ शुचौ देशे विधानेन कृतं यद्ब्रह्मसूत्रकम् । यज्ञोपवीतमिति तन्मन्त्रेण धारयेच्छुभम् ॥ दक्षिणाभिमुखो नोर्ध्वं कुर्यात्केशप्रसाधनम् । स्मृत्वोङ्कारं च गायत्रीं निबध्नीयाच्छिखां ततः ॥ धौताम्बराणि दर्भांश्च गृहीत्वा मृत्तिकां तथा । नद्यास्तीरं[1] समागत्य स्नायात्स्वस्वविधानवत् ॥ अधौतेन च वस्त्रेण नित्यनैमित्तिकीं क्रियाम् । कुर्वन्फलं नचाप्नोति कृतं भवति निष्फलम् ॥ धौताङ्घ्रिपाणिराचान्तः कुर्यात्संकल्पमादृतः । रामार्चाङ्गतया स्नानं करिष्येऽहं तदाज्ञया ॥ स्नानं स्याद्वारुणादि ह्रदसरसि समुद्रे तु दर्शेऽवगाहैर्भूत्या वा गोरजोभिर्भवति विपदि तत्केवलैर्वापि मन्त्रैः । स्यात्पञ्चोद्धृत्य पिण्डान्परपयसि सरित्सूत्तमं तास्तु वर्ज्याः सिंहात्प्राक्कर्कटाच्चोपरि जलधिगतास्तीरजिष्ठाश्च[2] मुक्त्वा ॥ स्वस्थितं पुण्डरीकाक्षं मन्त्रमूर्तिं प्रभुं स्मरेत् । अनन्तादित्यसंकाशं वासुदेवं चतुर्भुजम् ।

---

१ नद्यादितीरमागत्य । २ स्तीरनिष्ठांश्च मुक्त्वा ।

Scanned with CamScanner

शङ्खचक्रगदापद्ममुकुटं वनमालिनम् । श्यामलं शान्तवदनं प्रसन्नं विश्वरूपिणम् ॥ शैवागमे—मनसा मूलमन्त्रेण प्राणायामपुरःसरम् । कुर्वीत मानसं स्नानं सर्वत्र विहितं च तत् ॥ दिव्यचन्दनलिप्ताङ्गं चारुहासं शुभेक्षणम् । नारदाद्यैः सेव्यमानं भास्वद्विपुलकङ्कणम् ॥ सकिङ्किणीककेयूरहारिणं मणिनूपुरम् । ध्वजवज्राङ्कुशालक्ष्यपादपङ्केरुहद्वयम् ॥ तत्पादोदकजां धारां निपतन्तीं स्वमूर्धनि । चिन्तयेद्ब्रह्मरन्ध्रेण प्रविशन्तीं स्वकां तनुम् ॥ तया संक्षालयेत्सर्वमन्तर्देहगतं मलम् । तत्क्षणाद्विरजा मन्त्री जायते स्फटिकोपमः ॥ इदं मात्रं वरं स्नानं सहस्रादधिकं स्मृतम् । कृत्वादौ वैदिकं स्नानं ततस्तान्त्रिकमाचरेत् ॥ विन्यस्याङ्गे षडङ्गानि प्राणायामपुरःसरम् । श्रीसूर्यमण्डलात्तीर्थमाकृष्याङ्कुशमुद्रया ॥ वमित्यनेन चाप्लाव्य कवचेनावगुण्ठयेत् । संरक्ष्यास्त्रेण मूलेन मन्त्रयेद्वुद्रसंख्यया ॥ वारिक्षेपं ततः कुर्यादस्त्रेणाथार्कसंख्यया ॥ निमज्य तस्मिन्ध्यायेच्छ्रीरामं शक्त्या जपन्मनुम् ॥ उन्मज्य कुम्भमुद्रां च बध्वा स्नायाद्विषट् ततः । सिसृक्षोर्निखिलं विश्वं मुहुः शुक्रं प्रजापतेः । मातरः सर्वभूतानामापोदेव्यः पुनन्तु माम् ॥१॥ अलक्ष्मीं मलरूपां च सर्वभूतेषु संस्थिताम् । क्षालयन्ति निजस्पर्शादापोदेव्यः पुनन्तु माम् । आयुरारोग्यमैश्वर्यमरिपक्षक्षयं सुखम् ॥२॥ यन्मे केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि । ललाटे कर्णयोरक्ष्णोरापस्तद् घ्नन्तु वो नमः। संतोषः क्षान्तिरास्तिक्यं विद्या भवतु वो नमः ॥३॥ इत्यभिषिञ्चेत् । शालग्रामशिलातोयं तुलसीगन्धमिश्रितम् । कृत्वा शङ्खे भ्रामयंस्त्रिः प्रक्षिपेन्निजमूर्धनि ॥ शालग्रामशिलातोयमपीत्वा यस्तु मस्तके । प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते ॥ वि-

Scanned with CamScanner

ष्णुपादोदकात्पूर्वं विप्रपादोदकं क्षिपेत् । विरुद्धमाचरन्मोहादात्महा स निगद्यते ॥ पृथिव्यां यानि तीर्थानि तानि तिष्ठन्ति सागरे । ससागराणि तीर्थानि पदे विप्रस्य दक्षिणे ॥ ततः संक्षेपतो देवान्मनुष्यांस्तर्पयेत्पितॄन् । पीडयित्वाम्बरं चारु[1] प्रक्षाल्याचम्य यत्नतः ॥ धारयेद्वाससी शुद्धे परिधानोत्तरीयके । अच्छिन्ने सदृशे शुक्ले आचामेत्पीठसंस्थितः ॥ बह्वृचपरिशिष्टे—यतीनामासनं श्लक्ष्णं कूर्माकारं तु कारयेत् । अन्येषां तु चतुष्पादं चतुरस्रं च कारयेत् ॥ गोशकृन्मृन्मयं भिन्नं तथा पालाशपैप्पलम् । लोहबद्धं सदैवार्कं वर्जयेदासनं बुधः ॥ दानमाचमनं होमं भोजनं देवतार्चनम् । प्रौढपादो न कुर्वीत स्वाध्यायं चैव तर्पणम् ॥ आसनारूढपादस्तु जानुनोर्वाथ जङ्घयोः । कृत्वा ससक्थिको यश्च प्रौढपादः स उच्यते ॥ इति स्नानविधिः ॥

अथाचमनविधिः ॥ केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ । द्वाभ्यामोष्ठौ च संमृज्य द्वाभ्यामुन्मार्जनं तथा ॥ एकेन हस्तं प्रक्षाल्य पादावपि तथैकतः । संप्रोक्ष्यैकेन मूर्धानं ततः संकर्षणादिभिः ॥ आस्यनासाक्षिकर्णांश्च नाभ्युरः कं भुजौ स्पृशेत् । एवमाचमनं कृत्वा साक्षान्नारायणो भवेत् ॥ केशवादिकृष्णपर्यन्तं चतुर्विंशतिभिश्चतुर्थ्यन्तैः प्रणवादिभिर्नमोन्तैर्नामभिराचामेत् ॥ इति वैष्णवमाचमनम् ॥

अथ तिलकधारणम् ॥ ललाटे केशवं विद्यान्नारायण[2]मथोदरे । माधवं हृदये ध्यायेद्गोविन्दं कण्ठ[3]कूपके ॥ उदरे दक्षिणे पार्श्वे विष्णुं व्याप्तं विचिन्तयेत् । तत्पार्श्वे बाहुमूले तु

---

१ चोरु । २ ध्यायेन्नारायण । ३ कूबरे ।

Scanned with CamScanner

चिन्तयेन्मधुसूदनम् ॥ त्रिविक्रमं च तत्स्कन्धे वामपार्श्वे तु वामनम् । श्रीधरं बाहुके वामे हृषीकेशं तु कन्धरे ॥ अधरे पद्मनाभं[1] च स्यात्ककुदामोदरं न्यसेत् । तत्प्रक्षालनतोयेन वासुदेवेति मूर्धनि ॥ इति तिलकधारणम् ॥

अथ मुद्राधारणप्रकारः ॥ दक्षिणे तु करे विप्रो बिभृयाद्वै सुदर्शनम् । पद्मं मत्स्यं चापरेऽथ शङ्खं कूर्मं गदां तथा ॥ ललाटे तु गदा धार्या मूर्ध्नि चापं शरं तथा । नन्दकं चैव हृन्मध्ये शङ्खचक्रे भुजद्वये ॥ शङ्खचक्राङ्कितो विप्रः सशाने म्रियतेपि चेत् । प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य नारद ॥ इति तिलकधारणम् ॥

अथ संध्याप्रकारः ॥ निष्पीडयित्वा वस्त्रं तु पश्चात्संध्यां समाचरेत् । अन्यथा कुरुते यस्तु स्नानं तस्याफलं भवेत् ॥ वस्त्रं त्रिगुणितं यस्तु निष्पीडयति मूढधीः । वृथा स्नानं भवेत्तस्य निष्पीडयति चाम्बुनि ॥ रामात्मानं गुरुं नत्वा रामसंध्यामथाचरेत् । सायं प्रातश्च मध्याह्ने रामं ध्यात्वा मनुं जपेत् ॥ जलमस्त्रेण संशोध्य कवचेनावगुण्ठ्य वै । चक्रीकृत्य जलं सम्यग्दर्भमूलेन मन्त्रयेत् ॥ आवाहनादिमुद्राभिस्तीर्थमावाह्य पूजयेत् । ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे । तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धो कावेरि जलेऽस्मिन्सन्निधिं कुरु । एवमावाह्य चाराध्य विधिवत्तज्जलं मुने । आदायाञ्जलिना सम्यग् जपेन्मालामनुं सकृत् ॥ जलं दक्षिणहस्तस्थं सव्यहस्ते विनिक्षिपेत् । तन्निःसृताम्बुना मूर्ध्नि सिञ्चेन्मालामनुं स्मरन् ॥ दशाक्षरेण तच्छेष-

[1] पद्मनाभः स्यत् ।

Scanned with CamScanner

मभिमन्त्र्य जलं पिबेत् । पुनरञ्जलिनादाय जलं मूर्ध्नि त्रिरुत्क्षिपेत् ॥ मण्डलस्थाय रामाय नमोऽर्घ्यं कल्पयाम्यहम् । ततो रामोऽहमस्मीति गायत्रीं नियतो जपेत् ॥ जन्मप्रभृति तत्पापं दशभिर्याति संचितम् । पुरोक्तेन शतेनैव सहस्रेण जपेन वा ॥ वन्दे दशरथायेति विह्महेति पदं ततः । सीतापदं समुद्धृत्य वल्लभाय ततो वदेत् ॥ धीमहीत्यपि तन्नोऽथ रामश्चापि प्रचोदयात् । [अगस्त्योऽस्या मुनिश्छन्दो गायत्री देवता मनोः ॥ श्रीरामचन्द्रो भगवानर्घ्यार्थाङ्गानि युज्यते । भूतत्रिपञ्चवेदाधिकरणैरङ्गकल्पनम् । गायत्र्यार्घ्यत्रयं दत्वा जलमादाय तीरगः ॥ सूर्यमण्डलमध्यस्थं रामं सीतासमन्वितम् । नमामि पुण्डरीकाक्षमाञ्जनेयगुरुं परम् ॥ इति ध्यात्वा परात्मानं मण्डले पुरुषोत्तमम् । आदित्याभिमुखो भूत्वा स्वात्मानं भावयेद्धरिम् ॥] एषा स्याद्रामगायत्री भक्तानां भुक्तिमुक्तिदा ॥ पुरश्चरणमस्याश्च चतुर्लक्षजपावधि । यच्च यावच्च पूजादि सर्वं पूर्ववदाचरेत् ॥ ॐमादिरेषा गायत्री मुक्तिमेव प्रयच्छति । मायादिरपि वैदुष्यं रमादिश्च श्रियं मुने ॥ मदनेनापि संयुक्ता संमोहयति मेदिनीम् । अनयाराधितो रामः सर्वाभीष्टं प्रयच्छति ॥ तर्पयेच्च ततो मूलमन्त्रोच्चारणपूर्वकम् । रामं तर्पयामि नमः पीठदेवादिपूर्वकम् ॥ चत्वारिंशद्वारं चादौ सीतादींश्च चतुः क्रमात् । हृदादींस्तर्पयेत्पश्चान्मध्ये मध्ये रघूद्वहम् ॥ नाममन्त्रैर्भवेदेवं चत्वारिंशच्छतद्वयम् ॥ नमस्ते रामदेवाय ज्योतिषां पतये नमः । साक्षिणे सर्वभूतानामत्यन्तानन्दमूर्तये ॥ रघुनाथाय दीप्ताय (?) महाकारुणिकाय च । नमोस्तु कौशिकानन्ददायिने ब्रह्मरूपिणे ।

Scanned with CamScanner

स्तुवंश्च प्रणमेद्रामं यथाशक्त्या मुनीश्वर ॥ कृत्वैतत्प्रत्यहं सम्यक् त्रिसन्ध्यं च यथाविधि । कृतकृत्यो भवेन्मन्त्री सत्यं सत्यं च नान्यथा ॥ इति सन्ध्या संपूर्णा ॥

अजपाजपः ॥ ॐहंसः पूर्वमुच्चार्य सोहमित्यजपां जपेत् । ऋषिर्हंसोऽव्ययं छन्दः परमात्मा(त्र)स्य देवता । सूर्यात्मने इति हृदयं । सोमात्मने इति शिरः । निरञ्जनायेति शिखा । निराभासायेति कवचम् । अतनुः सूक्ष्मः नेत्रत्रयं । प्रचोदयादित्यस्त्रम् ॥ द्यौर्मूर्धानं यस्य विप्रा वदन्ति खं वै नाभिं[1] चक्षुषी चन्द्रसूर्यौ । दिशः श्रोत्रे यस्य पादौ क्षितिश्च ध्यातव्योऽसौ सर्वभूतान्तरात्मा ॥ एकविंशतिसाहस्रं श्वासोच्छ्वासजपेन षट् । शताधिकेन श्रीरामः प्रीतोस्त्विति विसर्जयेत् ॥ इत्यजपाजपसमर्पणम् ॥

अथ होमसमर्पणादि ॥ रामं नत्वा गुरून्ज्येष्ठान्कुशाम्भःपुष्पधारकान् । मुक्त्वा तथैव पाखण्डान् रामं स्मृत्वा गृहं विशेत् ॥ ऊर्ध्वं प्राग्वोदयाद्धोमो रवेरग्नौ दिवा निशि । भवेत्तूष्णीं द्वितीयो वै द्रव्यैर्व्रीह्यादिभिर्यथा ॥ देवपूजां ततः कुर्यान्नाममन्त्रैः सकृत्सकृत् । दद्याद्दानं यथाशक्ति पात्रे रामपरे तथा ॥ इति दिनाद्यभागकृत्यविधिः ॥

अथ दिनद्वितीयभागकृत्यम् ॥ दिवसस्य द्वितीयेंशे वेदस्याभ्यसनं चरेत् । मीमांसातर्कधर्मार्थशास्त्रादीनामपि द्विजः ॥ सालंकारः ससुमनाः संपश्येन्मङ्गलाष्टकम् । गोभूविप्राम्बुहेमद्युमणिस्नेहनृपानिह ॥ इति दिनद्वितीयभागकृत्यविधिः ॥

अथ दिनतृतीयभागकृत्यम् ॥ विभागेऽह्नस्तृतीये तु पोष्यवर्गान्[2]प्रपोषितुम् । देशशास्त्रा[3]विरोधेन द्रविणं कर्मणार्जयेत् ॥

---

१ नाभौ चन्द्रसूर्यौ च नेत्रे । २ पोष्यवर्गं तु । ३ विरुद्धेन ।

ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा । सत्यामृताभ्यामपि वा न श्ववृत्त्या कदाचन । ऋतमुञ्छशिलं प्रोक्तममृतं यदयाचितम् ॥ मृतं तु नित्ययाञ्चा स्यात्प्रमृतं कर्षणं स्मृतम् । सत्यानृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनम् ॥ सेवा श्ववृत्तिर्यैरुक्ता न सम्यक् तैरुदाहृतम् । स्वच्छन्दचरितः क्व श्वा विक्रीतासुः क्व सेवकः ॥ (ऋषिभिः पशवो बद्धाः कन्यकाश्च रजस्वलाः । देवताश्च सनिर्माल्या घ्नन्ति पुण्यं पुराकृतम् ॥) पणीकृत्यात्मनः प्राणान्ये वर्तन्ते द्विजाधमाः । तेषां दुरात्मनामन्नं भुक्त्वा चान्द्रायणं चरेत् ॥ अनपेक्षश्च द्वौ भागौ तिष्ठेन्मन्त्री जपेन्मनुम् । रामाज्ञाकृतविश्वासो दाता सर्वेश्वरो यतः ॥ इति दिनतृतीयभागकृत्यम् ॥

अथ दिनचतुर्थभागकृत्यम् ॥ अष्टधाह्नो विभक्तस्य चतुर्थांशो यदा द्विजः । कुर्यान्माध्याह्निकं स्नानं जपदेवार्चनादि च ॥ मृद्रोमयांशुककुशासनमुद्रिकादिपुष्पाक्षतातिलकमण्डलुचन्दनादि । नीता जलान्तिकमथेह समाक्षिकं च स्मृत्वार्थयेत्सकलतीर्थपवित्रकीर्तिम् ॥ स्वगृह्योक्तैर्मन्त्रवरैः स्नात्वा सन्ध्यां विधाय च । श्वेतकर्बुरकृष्णैश्च देवादींस्तर्पयेत्तिलैः ॥ तथैव भुवनेशस्य स्नानं सन्ध्यां च तर्पणम् । पूर्ववद्वाचरेन्मन्त्री रामं नत्वा विसर्जयेत् ॥ ततो देवालयं गत्वा न्यासान्कृत्वार्चयेद्धरिम् । लब्धानुज्ञो विशेन्मन्त्री मन्दिरं सुन्दरं स्वकम् ॥ इति दिनचतुर्थभागकृत्यम् ॥

अथ दिनपञ्चमभागकृत्यम् ॥ तत्रादौ द्वारपूजाविधिः ॥ गृहागतोऽर्चयेद्रामं पञ्चमे दिवसांशके । प्रक्षाल्य

---

१ इदं पद्यं न काशी पु० । २ श्वेद्वौ भागौ । ३ चतुर्थेशे यथा । ४ वदाचरेत् ।

Scanned with CamScanner

पादावाचम्य दद्यादर्घ्यं रवेर्बहिः ॥ यो देवः पूजकश्चाथ पूजाद्रव्याणि तत्फलम् । प्राणबुद्ध्यादिकं सर्वं तस्मै रामात्मने नमः ॥ अनेन मनुना नत्वा द्वारदेवान्प्रपूजयेत् । अगस्त्यसंहितायां यत्पूजनं तत्क्रमेण तु । अनुष्ठानं क्रमेणातस्तदेवोद्धृत्य लिख्यते ॥ ॐनमो रामभद्राय गं गणेशाय ते नमः । सं सवित्रे हौं शिवाय ऐंह्रींश्रीं परशक्तये ॥ ॐदीं दीपनाथाय क्षं क्षेत्रपतये नमः । पुष्पाक्षतादिभिः पूज्याः श्रीरामद्वारदेवताः । षड्द्वारपुरतः स्वस्मिन्प्रथमामर्चयेत्सुधीः । द्वारश्रियै नमश्चोर्ध्वं देहल्यै तदधस्ततः । द्वारस्य शोभनस्याथ शाखयोर्दक्षवामयोः । धात्रे विधात्रे गङ्गायै यमुनायै च पूर्वतः । ॐभद्राय सुभद्राय गोदां कृष्णां च दक्षिणे । ॐचण्डाय प्रचण्डाय रेवां तापीं च पश्चिमे । शङ्खाय पद्मनिधये वेणीं वेणां तथोत्तरे । चतुर्द्वारं सुसंपूज्य गृहोपरि ततोर्चयेत् । गृहेशाय गृहायाथ कुलदेव्यै नमोस्त्विति । नमः सशरशार्ङ्गाय विनायकाय फण्नमः । आभ्यामन्तर्गतं पुष्पं शरयोगेन वामतः । निःसार्य विघ्नसङ्घं त्रिः पार्ष्णिघातं समभ्यसेत् । देहलीमस्पृशन्दक्षपादपूर्वं प्रविश्य च । शेषाय विद्यापीठाय वास्तुपुंसे नमोऽर्चयेत् ॥ इति द्वारपूजा ॥

आसनविचारः ॥ वंशाश्मदारुधरणीतृणपल्लवनिर्मितम् । वर्जयेदासनं धीमान्दारिद्र्याध्यादिदुःखदम् । कृष्णाजिनं व्याघ्रचर्म कौशेयं वेत्रनिर्मितम् । वस्त्राजिनं कम्बलं च कल्पयेदासनं मृदु । निवेश्य तस्मिन्नादौ तु ॥ इत्यासनम् ॥

पात्रासादनादि ॥ पात्रासादनमारभेत् । संपाद्य विविधैः पुष्पैःपुरतः पुष्पडालिकाम्।तुलसीपद्मजात्याद्यैर्माल्यैर्बहुविधैरपि।

Scanned with CamScanner

संपाद्य विविधैः पुष्पैः पुरतः पुष्पडालिकाम् । तुलसीपद्मजात्याद्यैर्माल्यैर्बहुविधैरपि । स्वपुरो दक्षिणे तीर्थशुद्धवारिसुपूरितम्[1] । कलशं स्वपुरो वामभागे तु विनियोजयेत् । अन्यानि पूजाद्रव्याणि पुरस्तादेव निक्षिपेत् । आत्मनः पुरतः शङ्खं पात्राण्यासादयेत्[2]ततः । पश्चात्करक्षालनार्थं पात्रं संस्थापयेदपि । यथास्वं दर्पणच्छत्रचामरादीनि विन्यसेत् । तैलदीपं वामभागे घृतदीपं तु दक्षिणे ॥

अथ मालाधारणविचारः ॥ तुलसीकाष्ठघटितै रुद्राक्षाकारकारितैः । शङ्खचक्रगदापद्मपादुकाकारकारितैः । निर्मितां मालिकां कण्ठे निधायार्चनमारभेत् । तथामलकमालां च सम्यक्पुष्करमालिकाम् । निर्माल्यतुलसीमालां शिरस्यपि निधाय चै । निर्माल्यचन्दनेनाङ्गमङ्कयेत्तस्य नामभिः । शालग्रामशिलालग्न चन्दनं धारयेत्सदा । सर्वाङ्गेषु महापापशुद्धये कमलासन । इति ब्राह्मे भगवतोक्तत्वात् । मौक्तिकं च प्रवालं च रुद्राक्षं तुलसीमणिम् । जपपूजनवेलायां धारयेद्यः स वैदिकः । धारयेदक्षमालां च पद्माक्षं वाथ धारयेत् । कुर्यादाराधनं विष्णोर्देवदेवस्य चक्रिणः । तस्यायुधानि बाह्वोश्च तेनैव द्विजसत्तम । पापिष्ठो वाप्यपापिष्ठः सर्वज्ञोऽप्यज्ञ एव च । भवेदेवाधिकार्यत्र पूजाकर्मण्यसंशयः । भूषणाद्यैरलंकृत्य दुकूलादींश्च धारयेत् ॥ इति निर्माल्यगन्धमालाधारणम् ॥

अथ सिद्धचतुष्टयम् ॥ पुष्पाक्षतादिद्रव्याणां कुर्याज्जन्त्वादिशोधनम् । क्षालनेनानुलेपाद्यैर्मूर्तिशुद्धिं समाचरेत् ॥ अव्यग्रत्वे-

---

१ भागे तीर्थवारि । २ पात्राणि सादयेत् ।

Scanned with CamScanner

नात्मशुद्धिं क्षितिशुद्धिं ततश्चरेत्। विलिप्य वेदिकां सम्यङ्मण्डलं तत्र कारयेत्॥ रक्तैस्तन्दुलवर्णैश्च[1] नीलपीतैः सितासितैः। लिखेदष्टदलं पद्मं चतुरस्रं समावृतम्॥ षट्कोणकर्णिकामध्यकोणाग्रैरुपशोभितम्[2]। साध्यमेवं ततः शोभारेखाभिरुपशोभितम्॥ संपूज्य मण्डलं चैवं[3] तत्र सिंहासनं न्यसेत्। चन्द्रातपपताकैश्च तोरणैरपि सर्वतः॥ चित्रितं तत्रतत्रापि भित्तिस्तम्भस्थलादिषु। अणुमात्रं तु यः कुर्यान्मण्डलं राघवाग्रतः। मृद्रोमयैर्धातुभिर्वा सोऽनन्तफलमश्नुते। इति सिद्धचतुष्टयम्॥

॥ अथासनम्॥ कुशाजिनाम्बरैर्भव्यैः कल्पयेदासनं मृदु। पद्मस्वस्तिकभद्रादिरूपेणाकुञ्च्य पङ्कयम्। पृथ्वि त्वयेति मन्त्रेण कल्पयेदासनं[4] बुधः। पद्मस्वस्तिकवीरादि विष्वक्सेनसमाश्रितः। जपार्चनादिकं कुर्यादन्यथा निष्फलं भवेत्। ऊर्वोरुपरि विन्यस्य सम्यक्पादतले उभे। अङ्गुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमात्ततः। पद्मासनमिति प्रोक्तं योगिनां हृदयंगमम्। जानूर्वोर्हृदये सम्यक्कृत्वा पादतले उभे। ऋजुकायो विशेद्योगी स्वस्तिकं तत्प्रचक्षते। एकपादमधः कृत्वा विन्यस्योरौ तथोत्तरम्। वीरासनमिति प्रोक्तं सिद्धानां सिद्धमेव वा। जपस्थानं त्रिवारं मूलमन्त्रेण प्रोक्ष्य तत्रासनं स्थापयेत्। अथासनमन्त्रः। तत्रादौ भूमिप्रार्थना। पृथ्वि त्वयेति मन्त्रस्य मेरुपृष्ठ ऋषिः। कूर्मो देवता। सुतलं छन्दः। आसनस्थापने विनियोगः। ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्। ॐ भूर्भुवःस्वः अनन्तासनाय नमः। कूर्मासनाय नमः।

---

१ शालितण्डुल। २ कोणाग्रे वृत्त। ३ चैतत्तत्र। ४ स्थापयेदासनं।

Scanned with CamScanner

आधारशक्तये नमः। दुष्टविद्रावणाय नृसिंहाय नमः। इत्यासनोपरि संपूज्य। आसने अक्षतान्दर्भांश्च संस्थाप्य। तत्रोपविश्य। ॐ ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभोजने। तिष्ठ देवि शिखाबन्धे चामुण्डे ह्यपराजिते। इति शिखाबन्धं कृत्वा। पार्ष्णिघातत्रयं कृत्वा मन्त्रेणानेन मन्त्रवित्। भूतसंघान्समुत्सार्य संविशेदासने बुधः॥ ॐ रश्चास्त्रायफट् प्रोक्त्वा दिक्षु बन्धं चतुर्ष्वपि। करास्फालनतो दिक्षु ततो गुर्वादिसंनतिः॥ इति॥

अथ भूतोत्सारणम्॥ ततो भूतापसारणं यथा—त्रिः पार्ष्णिघातैर्भौमान् सामान्यजलेनान्तरिक्षान् स्वदृष्ट्यावलोकनेन दिव्यानुत्सारयेत्। तत्र मन्त्रः। अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते गच्छन्तु ममाज्ञया। इति पार्ष्णिघातत्रयं कृत्वा इति भूतापसारणम्। अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम्। सर्वेषामवरोधेन जपकर्म समारभे। तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम। भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि। इति। भूतसङ्घं समुत्सार्य संविशेदासनं बुधः। ॐ शार्ङ्गाय सशराय सुदर्शनाय अस्त्राय फट्। प्रोच्य करास्फालनतश्चतुर्ष्वपि दिक्षु दिग्बन्धं कुर्यात्। इति भूतोत्सारणम्॥

अथ गुर्वादिसंनतिः॥ ततो गुर्वादिसंनतिः। विनायकं नमस्कृत्य सव्यांसे च सरस्वतीम्। दक्षिणांसे पूर्ववच्च दुर्गां च क्षेत्रपं तथा। ततं आदित आरभ्य जपेद्गुरुपरम्पराम्। नमोस्त्वनन्ताय नमोस्तु वेधसे नमो वसिष्ठाय नमोस्तु शक्तये। पराशरायाथ नमोस्तु शाश्वते नमोस्तु ते सत्यवतीसुताय॥ योगीन्द्र-

१ ततश्चानन्तमारभ्य। २ नमस्ततः।

Scanned with CamScanner

चर्यपादांश्च गौडपादांश्चिदात्मकान्। भगवत्पूज्यगोविन्दपादान्वन्दे ततस्त्वहम्। श्रीमच्छ्रीशङ्कराचार्यान्विश्वरूपान्सुरेश्वरान्। बृहद्व्रतान्ब्रह्मरूपान्ब्रह्मविद्याप्रवर्तकान्। माधवान्वासुदेवाह्वान्सर्वयज्ञकृतस्तथा। गङ्गाधरान्नागदेवान् श्रीभट्टान्शार्ङ्गपण्डितान्। परमानन्दराजाह्वाञ्शारदाङ्गाभिधांस्तथा[1]। निम्बादित्यान्महासिद्धान्मार्गोत्तरदृशः प्रभून्। श्रीमद्विष्णुस्वामिराजान्विष्णुभक्तिप्रवर्तकान्। वन्देहं प्रभुराजांश्च विष्णुस्वामिकुमारकान्। नमो गुरुभ्यो गुरुपादुकाभ्यो नमः परेभ्यः परपादुकाभ्यः। आचार्यसिद्धेश्वरपादुकाभ्यो नमोस्तु सीतापतिपादुकाभ्यः। इति गुरुसंनतिः॥

अथ जीवस्थापनम्॥ ततो देवं नमस्कृत्य कुर्यात्तालत्रयं पुनः। ॐरश्चास्त्रायफट् प्रोक्ता भ्रामयेद्दक्षिणं करम्। कालं स्मृत्वा करिष्येऽहं श्रीरामप्रीतयेऽर्चनम्। संकल्प्यैवं ततो न्यासस्थानान्मात्रां तु संहरेत्। प्रातिलोम्येन क्षलयो ळकारे ळो हकारके। हलयश्च सकारेऽथ सलयश्च षकारके। क्रमेणैवमपर्यन्तं लयमुत्पाद्य यत्नतः। अ ओमिति ब्रह्मरन्ध्रे सहस्राब्जे नियोजयेत्। इति मातृकोपसंहारः॥ तत्प्रकारश्चेत्थम्। ॐ क्षकारं ळकारे संहरामि। ळकारं हकारे संहरामि। एवं अकारमोंकारे संहरामि। ॐकारं सहस्राब्जे नियोजयामि इति। ततस्तु चिन्तयेदन्तर्देवं स्थानत्रयान्तरे। ज्योतिर्मयमनुस्यूतं सत्वं ज्ञानसुखात्मकम्। आत्मनः परितो वह्निप्राकारं प्राणनाय च। भूतप्रेतपिशाचेभ्यो विधाय तदनन्तरम्। अद्भिः पुष्पाक्षतैश्चैव

---

१ नृदोगलीशाभिधांस्तथा।

Scanned with CamScanner

वह्निबीजास्त्रमन्त्रितैः। प्रक्षिपेत्परितो मन्त्री भयविघ्ननिवृत्तये। ततस्तु चिन्तयेदन्तर्देवं स्थानत्रयान्तरे। ज्योतिर्मयमनुस्यूतं सत्यज्ञानसुखात्मकम्। हृदम्बुजे ब्रह्मकन्दसंभूते ज्ञाननालके। ऐश्वर्याष्टदलोपेते स्थितो वैराग्यकर्णिके। आराग्रमात्रो[1] जीवस्तु चिन्तनीयो मनीषिभिः। नेतव्यो हंसमन्त्रेण द्वादशारे[2] स्थितः परः। तेन संयोज्य विधिवद्भूतशुद्धिमथाचरेत्। अस्यार्थः—ततो जीवात्मानं हृदयकमले स्थितं विभाव्य गुरूपदिष्टमार्गेण हुंकारेण मूलाधारात्कुण्डलिनीमुत्थाप्य रविकरसहस्रप्रभाभासुरां बिसतन्तुरूपां सुषुम्णामार्गेण हृदयगतां तां विभाव्य ततो जीवं प्रदीपकलिकाकारं मुखे गृहीत्वा सहस्रारं गतं विभाव्य तत्र सर्वभूतानां कारणे परमात्मनि जीवात्मानं हंसमन्त्रेण संयोज्य भूतशुद्धिमथाचरेत्। इति जीवस्थापनम्॥

अथ भूतोपसंहारः॥ पादाद्याजान्वम्बुजान्तां पीतां द्रुहिणदैवताम्। चतुरस्रां पञ्च[3]गुणां ग्लौं ह्रां ह्रः फट् भुवं जले। जान्वाद्यानाभिपद्मान्तश्चैतदर्धेन्दु वैष्णवम्। रसरूपस्पर्शशब्दं वं ह्रीं ह्रः फट् जलं शुचौ। नाभ्या हृदन्तं प्राद्युम्नं त्रिकोणं स्वस्तिकारुणम्। वह्निं रूपरसस्पर्श(शब्दं) रं ह्रूं ह्रः फट् समीरणे। भ्रूपर्यन्तं हृदो वायोः षड्बिन्दु स्पर्शशब्दवत्। वृत्तं सांकर्षणं धूम्रं यं ह्रैं ह्रः फट् विहायसि। भ्रूमध्याद्ब्रह्मरन्ध्रान्तं वासुदेवं सशब्दखम्। हं ह्रौं ह्रः फडहंकारेऽहं महत्तत्त्वके च तत्। प्रकृतौ तां च रामाख्ये परे ब्रह्मणि संहरेत्॥ इति भूतशुद्धिः॥ ॐ अस्य पञ्चमहाभूतन्यासस्य अत्रिभरद्वाजावृषी। त्रिष्टुबनुष्टुब्बृहतीपङ्क्तिर्जगत्य-

---

१ दीपाग्रमात्रो इति पाठः। २ द्वादशान्ते इति पाठः। ३ पञ्चवर्णां इति पाठः।

Scanned with CamScanner

इछन्दांसि । समीरणोऽग्निर्वरुणः पृथिवी आकाशो देवताः । शोषणदहनप्लावनपिण्डीकरणस्थापनान्यहं करिष्ये । तद्यथा-पार्थिवमन्त्रस्य ब्रह्मा ऋषिः । सोमो देवता । गायत्री छन्दः । पार्थिवाख्यभूतशुद्ध्यर्थे जपे विनियोगः । पादादिजानुपर्यन्तं पृथिवीस्थानं तत्र पार्थिवमण्डलं चतुरस्रं चतुर्दिक्षु वज्रलाञ्छितं पीतवर्णं शब्दस्पर्शरूपरसगन्धपञ्चगुणांस्तत्र पादादिगमनक्रिया-गन्तव्यगन्धघ्राणपृथिवीब्रह्मनिवृत्तिसमानवायून्संस्मृत्य ॐ ह्रां पृथिव्यधिपतये निवृत्तिकालात्मने ॐ ग्लौं ह्रं ह्रः हुं फट् स्वाहेति मन्त्रं षड्वारमुच्चार्य षड्घातप्रयोगेणाप्सु पृथिवीं संहरामि । तत्स्थाने हस्तं दत्वा षड्वारं जपेत् । अयमेव षड्घातशब्दार्थः । स्योना पृथिवी काण्वो मेधातिथिर्भूमिर्गायत्री जपे विनियोगः ॥ ॐ स्योनापृथिवि भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथः ॥ वारुणमन्त्रस्य गौतम ऋषिः वरुणो देवता अनुष्टुप्छन्दः । वारुणाख्यभूजान्वादिनाभिपर्यन्तमपां स्थानं शुक्लवर्णं अर्धच-न्द्राकारं जलमण्डलं हस्तदानादातव्यरसरसनाजलविष्णुप्रतिष्ठो-दानान्स्मृत्वा । ॐ वं ह्रीं विष्णवे जलाधिपतये प्रतिष्ठाकलात्मने शब्दस्पर्शरूपरसेति चतुर्गुणा आपः पञ्चोद्घातप्रयोगेण ॐ वं ह्रीं ह्रः हुं फट् स्वाहा इति मन्त्रं पञ्चवारमुच्चार्यापोग्नौ प्रविलाप्य-तामिति संहरेत् । ॐ यदो भवते गृहेऽमृतस्य निधिर्हितः । ततो नो धेहि जीवसे ततो नो धेहि भेषजम् ॥ आग्नेयमन्त्रस्य कश्यपऋषिः अग्निर्देवता जगतीच्छन्दः । आग्नेयाख्यं नाभ्या-दिहृदयपर्यन्तमग्निस्थानं तत्र त्रिकोणं वह्निमण्डलं कोणत्रयस्व-स्तिकोपेतं रक्तवर्णाङ्कितं तत्र पायुविसर्गविसर्जनरूपचक्षुस्तेजोरुद्र-

Scanned with CamScanner

ध्यानान्संस्मृत्य ॐ रं ह्रौं रुद्राय तेजोधिपतये विद्याकलात्मने प्रद्युम्नप्रतिष्ठिते शब्दस्पर्शरूपेति त्रिगुणं ॐ हूं ह्रौं ह्रः हुंफट्स्वाहा इति मन्त्रं चतुर्वारमुच्चार्याग्निं वायौ प्रविलाप्य तामिति संहरामि। जातवेदसे मारीचः कश्यपो दुर्गा त्रिष्टुप्। ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । स नः पर्षदतिदुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ वायव्यमन्त्रस्य किष्किन्ध ऋषिः वायुर्देवता बृहतीछन्दः वाय्वाख्यभूतं हृदयादिभ्रूमध्यपर्यन्तं वायुस्थानं तत्र वर्तुलं षट्कोणं वायुमण्डलं षड्बिन्दुलाञ्छितं यंबीजं संकर्षणदैवत्यं धूम्रवर्णं शब्दस्पर्शेति द्विगुणं ॐ ह्रौं ईशानाय वाय्वधिपतये शान्तिकलात्मने ॐ यं ह्रौं ह्रः हुं फट् । इमं मन्त्रं त्रिवारमुच्चार्य वायुमाकाशे प्रविलाप्य तां संहरामि । ॐ आ वात वाहि भेषजं विवात वाहि यद्रपः । त्वं हि विश्वभेषजो देवानाँ दूत ईयसे ॥ आकाशमन्त्रस्य ब्रह्मा ऋषिः सोमो दवता गायत्रीछन्दः आकाश आकाशाख्यभूत भ्रूमध्यादिब्रह्मरन्ध्रपर्यन्तं आकाशस्थानं नभोमण्डलं ध्वजलाञ्छितं नीलवर्णं सदाशिवदैवत्यं शब्दगुणं तेन सप्तशिवायाकाशाधिपतये शान्त्यतीतकलात्मने ॐ हं ह्रौं ह्रः हुं फट् इमं मन्त्रं द्विवारमुच्चार्य तमाकाशमहंकारे संहरामि ॐ इति पठेत् । ॐ अहंकारं महत्तत्त्वे तन्महत्तत्त्वं मातृकासंज्ञकशब्दब्रह्मस्वरूपायां हल्लेखार्थभूतायां प्रकृतौ प्रविलापयामीति प्रविलाप्य तां तथाविधां नित्यशुद्धबुद्धस्वभावे स्वप्रकाशे सत्यज्ञानानन्तानन्दलक्षणे परमकारणे परब्रह्मणि प्रविलाप्य तां संहरामि । इति भूतोपसंहारः ॥

Scanned with CamScanner

अथ भूतशुद्धिः ॥ शरीराकारभूतानां भूतानां यद्विशोधनम्। अव्यक्तब्रह्मसंपर्काद्भूतशुद्धिरियं मता ॥ तत्र नित्यशुद्धबुद्धस्वभावं सच्चिदानन्दस्वरूपं परिपूर्णं ब्रह्मैवाहमस्मीति चिरं भावयित्वा। मूलाज्ञानं ततः पापं जन्मादिदुःखदं च यत्। स्ववामकुक्षौ पापपुरुषं विचिन्त्य ॥ ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयम्। सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम् ॥ तत्संसर्गपदद्वन्द्वमङ्गप्रत्यङ्गपातकम्। उपपातकरोमाणं रक्तश्मश्रुविलोचनम्। अचेतनमधोवक्त्रं गाधं पातकसन्निभम्। खड्गचर्मधरं कृष्णं कुक्षौ पापं विचिन्तयेत् ॥ [प्राणापानौ निरुध्याथ तस्य रूपे विचिन्तयेत्। महापातकपञ्चाङ्गं पातकोपाङ्गसंश्रयम्। उपपातकरोमाणं कृष्णं क्रूरातिभीषणम्।] नाभौ षड्बिन्दुसहिते सहस्रामितवर्तुले। वामया पूरिते वायौ ॐ यं ॐ ३२ एतेन पूरयेत् ॥ हृदि त्रिकोणनिर्गच्छत्स्वस्तिके रक्ततेजसि। वह्निना कुम्भिते वायौ ॐ रं ॐ ६४ संहरामि तम्। बीजं चन्द्रसहस्राभे मस्तकाब्जे स्थितं सितम्। ॐ वं ॐ १६ स्रुतपीयूषेणाप्लाव्य तेन रेचयेत्। वाग्बीजभूतसंहारमध्यास्याप्लावनं ततः। कृत्वैवं तु सहस्राब्जे रामोऽहमिति चिन्तयेत्। पूजावास्यै ततो भक्त्या स्वदेहं भावयेत्पुनः। द्वादशारस्थितपरमात्मना सह स्थितमात्मानं चिरं भावयित्वा। ध्यायेद्दुर्वात्ममन्त्रैक्यशुद्धमङ्गं सुशोभनम्। मूलाधारोत्थया सूक्ष्मभासा सौषुम्नमार्गतः। ॐ हुं फट् ५ इति संयम्य प्राणान्विन्यस्य मूर्धनि। अखण्डाद्ब्रह्मणो रामात्प्रेरकः पुरुषस्ततः। प्रकृतिः प्रकृतेर्महांस्ततोऽहं त्रिगुणात्मकः।

---

१ अव्ययब्रह्म इति पाठः।

Scanned with CamScanner

तस्माद्वा एतस्मादात्मन आकाशः संभूतः । अकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नं । अन्नाद्रेतः । रेतसः पुरुषः । स वा एष पुरुषोऽन्नरसमयः । ॐ ग्लौमिति पृथ्वीबीजे तं च संघतां नयेत् । ॐ हमित्याकाशबीजेनावयवीकरणं भावयेत् । ततो नादान्तःस्थितामण्वीं परब्रह्मणा सहैकीभूतां जीवकलां चिरं ध्यात्वा ब्रह्मरन्ध्रेण सुषुम्नामार्गेण हृदि सोहंमन्त्रेणानयेत् । सैषा मुख्या भावनाख्या भूतशुद्धिः ॥ इति भूतशुद्धिः ॥ भूतशुद्धिं विना कर्तुर्जपहोमार्चनक्रियाः । भवन्ति निष्फलाः सर्वाः प्रकारेणाप्यनुष्ठिताः ॥ भूतशुद्धिविहीनेन कृता पूजाभिचारवत् । विपरीतं फलं दद्यादभक्त्या वार्चनं यथा ॥ निर्ऋतिर्विधिहीनानां फलं हन्तीह कर्मणाम् । निशाचराधिपत्यं हि कुरुते शंकराज्ञया ॥ इति भूतशुद्धिः ॥

अथ प्राणप्रतिष्ठा ॥ हृदि हस्तं निधाय । ॐ अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः । ऋग्यजुःसामानि छन्दांसि । अतिच्छन्दो वा छन्दः । क्रियामयवपुःप्राणाख्या[1] देवता । आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । स्वस्य शरीरे प्राणप्रतिष्ठायां विनियोगः । ॐ ब्रह्मविष्णुरुद्रेभ्य ऋषिभ्यो नमः शिरसि । ऋग्यजुःसामभ्यश्छन्दोभ्यो नमः मुखे । क्रियामयवपुःप्राणाख्यदेवतायै हृदि । आंबीजाय गुह्ये । ह्रींशक्तये पादयोः । क्रों कीलकाय लिङ्गे । आंह्रींक्रों ॐ अंकंखंगंघंङंआं पृथिव्यग्नेजोवाय्वाकाशात्मने अङ्गुष्ठाभ्यां हृदयाय नमः । ॐ इंचंछंजंझंञंईं

---

१ क्रियाशक्तिमयी इति पाठः ।

Scanned with CamScanner

शब्दस्पर्शरूपरसगन्धात्मने तर्जनीभ्यां शिरसेस्वाहा। ॐ उंटंठंडं-ढंणंऊं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने मध्यमाभ्यां शिखायै वषट्। ॐ एंतंथंदंधंनंऐं वाक्पाणिपादपायूपस्थात्मने अनामिकाभ्यां कवचायहुम्। ॐ ओंपंफंबंभंमंऔं वक्तव्यादानगमनविसर्गान-न्दात्मने कनिष्ठिकाभ्यां नेत्रत्रयाय वौषट्। ॐ अंयंरंलंवंशंषंसं-हंळंक्षंअः मनोबुद्ध्यहंकारचित्तात्मने करतलकरपृष्ठाभ्यां अस्त्राय फट्। ॐ आं नाभेरधः। ॐ ह्रीं हृदयादिनाभिपर्यन्तम्। ॐ क्रों मस्तकादिहृदयपर्यन्तम्। ॐ यं त्वगात्मने नमः हृदि। ॐ रंअसृगात्मने दक्षदोर्मूले। ॐ लं मांसात्मने ककुदि। ॐ वं मेदआत्मने वामांसे। ॐ शं अस्थ्यात्मने हृदयादिपाणि-युगुले। ॐ षं मज्जात्मने हृदयादिपादयुगुले। ॐ सं शुक्रात्मने जठरे। ॐ हं प्राणात्मने आनने। ॐ ळं जीवात्मने व्यापकम्। [ॐ क्षं परमात्मने हृदयादिमस्तके॥] अथ ध्यानम्॥ रक्ता-म्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः पाशं कोदण्ड-मिक्षूद्भवमथ गुणमप्यङ्कुशं पञ्चबाणान्। बिभ्राणाऽसृक्कपालं त्रि-नयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु शुभकरी प्राणशक्तिः परा नः॥ इति ध्यानं। अथ प्राणमन्त्रः। ॐ आं-ह्रींक्रों यंरंलंवंशंषंसंहंळंक्षंहंसःसोहं मम प्राणा इह प्राणाः। पुनस्ता-न्येव बीजान्युच्चार्य ॐ आंह्रींक्रों यं० मम जीव इहस्थितः। ॐ आंह्रींक्रों यं० मम सर्वेन्द्रियाणि। ॐ आंह्रींक्रों० यं० मम वा-ङ्मनस्त्वक्चक्षुर्जिह्वाश्रोत्रघ्राणप्राणाः सर्वे इहागत्य स्वस्तये चिरं सुखेन तिष्ठन्तु स्वाहा इति प्राणमन्त्र एवं त्रिवारं पठेत्। हृदि हस्तं

१ दक्षिणांसे।

Scanned with CamScanner

निधाय ॥ ततो जन्मादिषोडशसंस्कारार्थं षोडशवारं प्रणवं जप्त्वा परां शक्तिं स्मरेत् । भगवन्नामोच्चारणं च कुर्यात् । यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् । ॐ चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥ इति प्राणप्रतिष्ठा ॥

अथान्तर्मातृकान्यासः ॥ इडया पूरयेत्प्राणं स्वरैः स्पर्शैश्च कुम्भयेत् । रेचयेत् यादिकैर्वर्णैस्ततः पिङ्गलया पुनः ॥ तथैव पूरणं वायोः कुम्भके रेचनं पुनः । इडया स्यात्ततो द्वाभ्यां पूरणादित्रयं पुनः ॥ प्राणायामत्रयं ह्येवं कृत्वा व्यापकमारभेत् । अकाराद्यैः क्षान्तवर्णैरापादतलमस्तकम् ॥ अस्य श्रीमातृकान्यासस्य ब्रह्मा ऋषिः । गायत्री छन्दः । मातृकासरस्वती देवता । हलो बीजानि । स्वराः शक्तयः । बिन्दवः कीलकं । अनुष्ठीयमानश्रीराममन्त्रराजाङ्गत्वेन न्यासे वि० । ब्रह्मणऋषये नमः शिरसि । गायत्रीछन्दसे मुखे । मातृकासरस्वतीदेवतायै हृदये । हलभ्यो बीजेभ्यो गुह्ये । स्वरेभ्यः शक्तिभ्यः पादयोः । बिन्दुभ्यः कीलकेभ्यः सर्वाङ्गे । इति ऋषादि ॥ कराङ्गुलीनां रेखासु स्वरैकैकं प्रविन्यसेत् । विन्यसेत्प्रणवं पाणितलयोः पृष्ठयोरपि ॥ तद्यथा ॥ ॐ अंआं दक्षिणतर्जनीरेखयोः । ॐ इंईं मध्यमारेखयोः । ॐ उंऊं अनामिकारेखयोः । ॐ ऋंॠंकनिष्ठिकारेखयोः । एवं वामहस्ते । प्रणवं करतलकरपृष्ठयोर्न्यसेत् ॥ अथ न्यासः । ॐ अंकंखंगंघंङं-आं अङ्गुष्ठाभ्यां नमः । ॐ इंचंछंजंझंञंईं तर्जनीभ्यां नमः । ॐ उं-टंठंडंढंणंऊं मध्यमाभ्यां ० । ॐ एंतंथंदंधंनंऐं अनामिकाभ्यां० ।

Scanned with CamScanner

ॐ ओंपंफंबंभंमंऔं कनिष्ठिकाभ्यां ०। ॐ अंयंरंलंवंशंषंसंहंळंक्षंअः करतलकरपृष्ठाभ्यां नमः । एवं हृदयादिषडङ्गः ॥ अथ ध्यानं । पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादहृत्कुक्षिवक्षोदेशां भास्वत्कपर्दाकलितशशिकलामिन्दुकुन्दावदाताम् । अक्षस्रक्कुम्भचिन्तालिखितवरकरां त्रीक्षणां पद्मसंस्थामच्छाकल्पामतुच्छस्तनभरनमितां भारतीं तां नमामि ॥ इति ध्यानम् ॥ मातृकान्यासक्रमः ॥ आधारे लिङ्गनाभौ हृदयसरसिजे तालुमूले ललाटे द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्धे चतुष्के । वासान्ते बालमध्ये डफकठसहिते कण्ठदेशे स्वराणां हंक्षं तत्त्वार्थयुक्तं सकलदलगतं वर्णरूपं नमामि ॥ एकैकं वर्णमेकैकपत्रान्ते बिन्दुयुङ्न्यसेत् । एवमन्तः प्रविन्यस्य मनसाथो बहिर्न्यसेत् । कण्ठे षोडशदले ॐ अआइईउऊऋॠऌॡएऐओऔअंअः १६ नमः इति षोडश स्वराः । हृदये द्वादशदले ॐ कंखंगंघंङंचंछंजंझंञंटंठं १२ नमः । नाभौ दशदले ॐ डंढंणंतंथंदंधंनंपंफं १० नमः । लिङ्गे षड्दले बंभंमंयंरंलं ६ नमः । पायौ चतुर्दले वंशंषंसं ४ नमः । भ्रूमध्ये द्विदले हंक्षं २ नमः । इत्यन्तर्मातृकाः ॥

अथ बहिर्मातृकान्यासक्रमः[2]। ॐ अं मौलौ। ॐ आं मुखवृत्ते। ॐ इं दक्षिणनेत्रे। ॐ ईं वामनेत्रे । ॐ उं दक्षिणकर्णे। ॐ ऊं वामकर्णे । ॐ ऋं दक्षिणनासापुटे । ॐ ॠं वामनासापुटे । ॐ ऌं दक्षिणकपोले । ॐ ॡं वामकपोले । ॐ एं ऊर्ध्वोष्ठे । ॐ ऐं अधरोष्ठे । ॐ ओं ऊर्ध्वदन्तपङ्क्तौ । ॐ औं अधोदन्तपङ्क्तौ । ॐ

---

१ स्तनजघनभरां इति पाठः । २ अस्यापि विनियोगादिकं सर्वमन्तर्मातृकान्यासादावुक्तमेव ।

Scanned with CamScanner

अं मूर्ध्नि । ॐ अः मुखमध्ये जिह्वायां । कं दक्षबाहुमूले । खं कूर्परे । गं मणिबन्धे । घं अङ्गुलिमूले । ङं अङ्गुल्यग्रे । एवं वामकरे । चं छं जं झं ञं टं दक्षपादमूले । ठं जानौ । डं गुल्फे । ढं अङ्गुलिमूले । णं अङ्गुल्यग्रे । एवं वामपादे । तं थं दं धं नं दक्षपार्श्वे । पं दक्षपार्श्वे । फं वामपार्श्वे । बं पृष्ठे । भं नाभौ । मं उदरे । यं त्वगात्मने नमः हृदि । रं असृगात्मने नमः दक्षदोर्मूले । लं मांसात्मने नमः ककुदि । वं मेदआत्मने नमः वामबाहुमूले । शं अस्थ्यात्मने नमः हृदादिदक्षकरे । षं मज्जात्मने नमः हृदादिवामकरे । सं शुक्रात्मने नमः हृदादिदक्षिणचरणे । हं प्राणात्मने नमः हृदादिवामचरणे । ळं शक्त्यात्मने नमः जठरे । क्षं क्रोधात्मने नमः मुखे । इति बहिर्मातृकान्यासः ॥

अथ केवलमातृकान्यासः ॥ शिरोवदनवृत्तेऽपि चक्षुःश्रोत्रयुगे तथा । नासाकपोलयुगुले तथोष्ठाधरयोरपि ॥ ऊर्ध्वाधोदन्तपङ्क्तौ तु मूर्ध्न्यास्ये षोडशस्वरान् । कचवर्गद्वयं बाह्वोः पञ्चसंधिस्थले न्यसेत् ॥ टतवर्गद्वयं पादसंध्यग्रेषु तथा न्यसेत् । पवर्गं पार्श्वयुगुले पृष्ठनाभ्युदरेषु च ॥ हृद्दोर्मूलककुत्कुक्षिहृदादिचरणद्वये । जठराननयोश्चैव व्यापकं विनियोजयेत् ॥ अ्माद्यन्तो नमोन्तो वा सबिन्दुर्बिन्दुवर्जितः । पञ्चाशदक्षरन्यासः क्रमेणैव विधीयते ॥ इति केवलमातृकान्यासः ॥

अथ सबिन्दुककलान्यासः ॥ ततः सबिन्दुकन्यासे ऋषिश्छन्दश्च पूर्ववत् । संहारशारदादेव्यङ्गानि बिन्दुयुतैः स्वरैः ॥ अक्षस्रजं हरिणपोतमुदग्रटङ्कं विद्यां करैरविरतं दधतीं त्रिनेत्राम् ।

Scanned with CamScanner

अर्धेन्दुमौलिमरुणामरविन्दसंस्थां वर्णेश्वरीं प्रणमत स्तनभारनम्राम् ॥ इति सबिन्दुकमातृकाध्यानम् ॥

अथ संहारमातृकान्यासः ॥ बिन्दुयुक्तां मातृकां तु विन्यसेच्च विलोमतः । यद्यथा । क्षं क्रोधात्मने नमः आनने न्यसेत् । ळंशक्त्यात्मने० जठरे० इत्यादि अं मौलौ इत्यन्तं न्यसेत् ॥ इति संहारमातृकान्यासः ॥

पञ्चाशत्कलान्यासः॥ अकारादिक्षकारान्तं सविसर्गं न्यसेदिति ॥ स्थितिन्यासस्तु–बिन्दुविसर्गयुक्तान् डादिक्षान्तान् पुनरकारादिढान्तान्यथास्थानं विन्यसेदिति। स्थानेष्वेतेष्वथ पुनर्मातृकायाः कला न्यसेत् ॥ अस्य श्रीकलान्यासस्य प्रजापतिर्ऋषिः । गायत्रीछन्दः । कलासरस्वतीदेवता। इष्टार्थे न्यासे विनियोगः । ॐ अंआं हृदयायनमः। इंईं शिरसेस्वाहा। उंऊं शिखायैवषट्। एंऐं कवचायहुम् । ओंऔं नेत्रत्रयाय वौषट् । अंअः अस्त्राय फट् । एवं करतलान्तं विन्यसेत्। अथ ध्यानम्। हस्तैः पद्मं रथाङ्गं गुणमथ हरिणं पुस्तकं वर्णमालां कण्ठं शूलं कपालं दरममृतलसद्धेमकुम्भं वहन्तीम् । मुक्ताविद्युत्पयोदस्फटिकनवजपाबन्धुरैः पञ्चवक्त्रैस्त्रयक्षैर्वक्षोजनम्रां सकलशशिनिभां शारदां तां नमामि ॥ इति ध्यानम्। ॐ अं निवृत्त्यै नमः । आं प्रतिष्ठायै० । इं विद्यायै० । ईं ईशानायै० । उं इन्धिकायै० । ऊं दीपिकायै० । ऋं रेचिकायै० । ॠं मोचिकायै० । ऌं परायै० । ॡं सूक्ष्मायै० । एं मृडायै० । ऐं ज्ञानायै० । ओं आप्यायिन्यै० । औं व्यापिन्यै० । अं व्योमरूपायै० । अः अनन्तायै० । कं सृष्ट्यै० । खं ऋद्ध्यै० । गं स्मृत्यै० । घं मेधायै० । ङं कान्त्यै० । चं लक्ष्म्यै० । छं द्यु-

Scanned with CamScanner

त्यै० । जं स्थिरायै० । झं स्थित्यै० । ञं सिद्ध्यै० । टं जरायै० । ठं पालिन्यै० । डं शान्त्यै० । ढं ऐश्वर्यै० । णं रत्यै० । तं कामिकायै० । थं वरदायै० । दं प्रह्लादिन्यै० । धं प्रीत्यै० । नं दीर्घायै० । पं तीक्ष्णायै० । फं रौद्रायै० । बं अभयायै० । भं निद्रायै० । मं तन्द्रायै० । यं क्षुधायै० । रं क्रोधिन्यै० । लं क्रियायै० । वं उल्कायै० । शं मृत्यवे० । षं पीतायै० । सं श्वेतायै० । हं अरुणायै० । ळं असितायै० । क्षं अनन्तायै० । इति मन्त्रान्पूर्वोक्तमातृकास्थानेष्वेव न्यसेत् । इति पञ्चाशत्कलान्यासः ॥

अथाष्टत्रिंशत्कलान्यासः ॥ अं अमृतायै० । आं आनन्दायै० । इं पूषायै० । ईं तुष्ट्यै० । उं पुष्ट्यै० । ऊं रत्यै० । ऋं धृत्यै० । ॠं शशिन्यै० । ऌं चन्द्रिकायै० । ॡं कान्त्यै० । एं ज्योत्स्नायै० । ऐं श्रियै० । ओं प्रीत्यै० । औं अङ्गदायै० । अं पूर्णायै० । अः पूर्णामृतायै० । इति स्वरस्थानेषु विन्यस्य । कं भं तापिन्यै० । खं बं तापिन्यै० । गं फं धूम्रायै० । घं पं मरीच्यै० । ङं तं ज्वालिन्यै० । चं धं रुच्यै० । छं दं सुषुम्णायै० । जं थं भोगदायै० । झं तं विश्वायै० । ञं णं बोधिन्यै० । टं ढं धारिण्यै० । ठं डं क्षमायै० । यं धूम्रार्चिषे० । रं ऊष्मायै० । लं ज्वालिन्यै० । वं ज्वालामालिन्यै० । शं विस्फुलिङ्गिन्यै० । षं सुश्रियै० । सं सुरूपायै० । हं कपिलायै० । ळं हव्यवाहायै नम इति मस्तके । क्षं कव्यवाहायै नम इति व्यापकं । तपिन्यादिमन्त्रान् करचरणद्वयसंधिविंशतिस्थानेषु मस्तके सर्वाङ्गव्यापकं चेति न्यसेत् । इत्यष्टत्रिंशत्कलादिन्यासः ॥

Scanned with CamScanner

अथ केशवादिमातृकान्यासः ॥ मायाद्यैः पुटितान्वर्णान्केशवादीनथादरात् । सशक्तिकान्न्यसेद्यत्नान्मस्तकादिक्रमेण च ॥ अस्य श्रीकेशवादिमातृकान्यासस्य साध्यनारायण ऋषिः। दैवीगायत्रीछन्दः। श्रीमहालक्ष्मीनारायणो देवता। हलो बीजं। स्वराः शक्तिः। इष्टार्थे न्यासे विनियोगः। ॐ श्रीं ॐ नमोनारायणाय हंसःसोहं अंकंखंगंघंङंआंह्रींसोहंहंसः। ॐ नमोनारायणाय क्रुद्धोल्काय स्वाहा। श्रीदेव्यै हृदयाय नमः। इति हृदये। ॐ श्रीं ॐ नमोनारायणाय हंसःसोहंइंचंछंजंझंञंईह्रींसोहंहंसः ॐ नमो नारायणाय महोल्काय स्वाहा श्रीं पद्मिन्यै नमः शिरसे स्वाहा इति शिरसि। ॐ श्रीं ॐ नमो नारायणाय हंसः सोहं उंटंठंडंढंणंऊंह्रीं सोहं हंसः ॐ नमो० वीरोल्काय स्वाहा श्रूं विष्णुपत्न्यै० शिखायै वषट्०। इति शिखायां। ॐ श्रीं ॐ नमो नारायणाय हंसः सोहं एंतंथंदंधंनं ऐं ह्रीं सोहं हंसः ॐ नमो विद्युदुल्काय स्वाहा। ॐ श्रैं वरदायै कवचाय हुं। ॐ श्रीं ॐ नमो नारायणाय हंसःसोहं ॐ ओं पंफंबंभंमं औं हां सोहंहंसः ॐ नमो नारा० सहस्रोल्कायस्वाहा श्रौं कमलरूपायैनेत्रत्रयाय०। ॐ श्रीं ॐ नमोनारायणाय हंसःसोहं अं यंरंलंवंशंषंसंहंळंक्षंअः ह्रीं सोहं हंसः ॐ नमो नारायणाय० अनन्तोल्कायस्वाहा श्रः शूलिन्यै नमः अस्त्राय फट्। इति षडङ्गः॥ अथ केशवादिमातृकाध्यानम् ॥ विद्यारविन्दमुकुरामृतकुम्भपद्मकौमोदकीदरसुदर्शनशोभिहस्तम् । सौदामिनीमुकुरकान्तिविकासिलक्ष्मीनारायणात्मकमखण्डितमादिमूर्तिम् ॥ ॐ ह्रीं श्रीं क्लीं अंक्लींश्रींह्रीं केशवायकीर्त्यै नमः मौलौ इत्यादि मातृकास्थानेष्वेव न्यसेत् । एवं

Scanned with CamScanner

बीजत्रयसंपुटः सर्वत्र। आं नारायणाय कान्त्यै०। इं माधवाय तुष्ट्यै०। ईं गोविन्दाय पुष्ट्यै०। उं विष्णवे धृत्यै०। ऊं मधुसूदनाय क्षान्त्यै०। ऋं त्रिविक्रमाय क्रियायै०। ॠं वामनाय दयायै। ऌं श्रीधराय मेधायै०। ॡं हृषीकेशाय हर्षायै०। एं पद्मनाभाय श्रद्धायै०। ऐं दामोदराय लज्जायै०। ओं संकर्षणाय सरस्वत्यै०। औं वासुदेवाय लक्ष्म्यै०। अं प्रद्युम्नाय प्रीत्यै०। अः अनिरुद्धाय रत्यै०। कं चक्रिणे जयायै०। खं गदिने दुर्गायै०। गं शार्ङ्गिणे प्रभायै०। घं खड्गिने सत्यायै०। ङं शङ्खिने चण्डायै०। चं हलिने वाण्यै०। छं मुसलिने विलासिन्यै०। जं शूलिने विजयायै०। झं पाशिने विरजायै०। ञं अङ्कुशिने विश्वायै०। टं मुकुन्दाय विमदायै०। ठं नन्दजाय सुनन्दायै०। डं नन्दाय स्मृत्यै०। ढं नादाय ऋद्ध्यै०। णं नरकजिते समृद्ध्यै०। तं हरये शुद्ध्यै०। थं कृष्णाय भुक्त्यै०। दं सत्याय मुक्त्यै०। धं सात्वताय मत्यै०। नं शौरिणे क्षमायै०। पं शूराय परमायै०। फं जनार्दनाय उमायै०। बं भूधराय क्लेदिन्यै०। भं विश्वमूर्तये क्लिन्नायै०। मं वैकुण्ठाय वसुदेवायै०। यं त्वगात्मने पुरुषोत्तमायवसुधायै०। रं असृगात्मने बलिनेपरायै०। लं मांसात्मने बलानुजायपरायणायै०। वं मेदआत्मने बलायसूक्ष्मायै०। शं अस्थ्यात्मनेवृषघ्नायसंध्यायै०। षं मज्जात्मनेवृषायप्रज्ञायै०। सं शुक्रात्मनेहंसाय प्रभायै०। हं प्राणात्मने वराहायनिशायै०। ळं क्रियाशक्त्यात्मने विमलाय अमोघायै०। ॐ ह्रीं श्रीं क्लीं क्लीं श्रीं ह्रीं ॐ क्षं परमात्मने नृसिंहाय विद्युतायैनमः॥ केशवादिरयं न्यासो न्यासमात्रेण देहिनाम्। अच्युतत्वं ददात्येव सत्यं सत्यं नचान्यथा॥ इति केशवादिमातृकान्यासः॥

---

१ बुध्यै इति पाठः। २ शुक्रात्मने इति पाठः। ३ न संशय इति पाठः। ५ रा. चं.

Scanned with CamScanner

अथ कण्ठादिमातृकान्यासः ॥ वाङ्मायामादिकान्वर्णान्मातृकायाः सबिन्दुकान् । श्रीकण्ठादीनथादित्यान्न्यसेत्स्थानेषु तेषु हि ॥ ॐ अस्य श्रीकण्ठादिमातृकान्यासस्य अम्बरीष ऋषिः । अनुष्टुप्छन्दः । अर्धनारीश्वरो देवता । हलो बीजानि । स्वराः शक्तयः । ज्ञानविज्ञानार्थे न्यासे विनियोगः । ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं आं अङ्गुष्ठाभ्यां नमः (हृदयायनमः) । ॐ ऐं ह्रीं श्रीं इं चं छं जं झं ञं ईं तर्जनीभ्यां० (शिरसेस्वाहा) । ॐ ऐं ह्रीं श्रीं उं टं ठं डं ढं णं ऊं मध्यमाभ्यांनमः (शिखायै वषट्) । ॐ ऐं ह्रीं श्रीं एं तं थं दं धं नं ऐं अनामिकाभ्यांनमः (कवचायहुम्) । ॐ ऐं श्रीं ह्रीं ओं पं फं बं भं मं औं कनिष्ठिकाभ्यां नम (नेत्रत्रयायवौषट्) । ॐ ऐं ह्रीं श्रीं अं यं रं लं वं शं षं सं हं ळं क्षं अः करतलकरपृष्ठाभ्यांनमः ॥ एतैरेव च हृदयादिन्यास इत्येवमादिः षडङ्गः ॥ ध्यानम् ॥ सिन्दूरकाञ्चनसमोभयभागमर्धनारीश्वरं गिरिसुताहरभूषचिह्नम् । पाशाभयाक्षवलयेष्टदहस्तमीशं स्मृत्वा न्यसेत्सकलवाञ्छितवस्तुसिद्ध्यै ॥ ॐ ऐं ह्रीं श्रीं अं श्रीकण्ठेशपूर्णोदरीभ्यांनमः । स्थानं पूर्वोक्तमेव । बीजत्रयं सर्वत्र । आं अनन्तेशविरजाभ्यांनमः । आननवृत्तइत्यादिस्थानेषु न्यसेत् । इं सूक्ष्मेशशाल्मलिभ्यां० । ईं त्रिमूर्तीशलोलाक्षीभ्यां० । उं अमरेश्वरवर्तुलाक्षीभ्यां० । ऊं अर्धीशदीर्घघोणाभ्यां० । ऋं भारभूतेशदीर्घमुखीभ्यां० । ॠं अतिथीशगोमुखीभ्यां० । ऌं स्थाण्वीशदीर्घजिह्वाभ्यां० । ॡं हरेशकुण्डोदरीभ्यां० । एं झिंटीशोर्ध्वकेशिनीभ्यां० । ऐं भौतिकेशविकृतमुखीभ्यां० । ओं सद्योजातेशज्वालामुखीभ्यां० । औं अनुग्रहेशोल्कामुखीभ्यां० ।

Scanned with CamScanner

अं क्रूरेशश्रीमुखीभ्यां० । अः महासेनेशविद्यामुखीभ्यां० । कं क्रोधीशमहाकालीभ्यां० । खं चण्डेशसरस्वतीभ्यां० । गं पंचान्तकेशगौरीभ्यां० । घं शिवोत्तमेशत्रैलोक्यविद्याभ्यां० । ङं एकरुद्रेशमन्त्रशक्तिभ्यां० । चं कूर्मेशात्मशक्तिभ्यां० । छं एकनेत्रेशभूतमातृभ्यां० । जं चतुराननेशलम्बोदरीभ्यां० । झं अजेशद्राविणीभ्यां० । ञं सर्वेशनागरीभ्यां० । टं सोमेश्वरेशखेचरीभ्यां० । ठं लाङ्गलीशमञ्जरीभ्यां० । डं दारुकेशरूपिणीभ्यां० । ढं अर्धनारीश्वरेशवीरिणीभ्यां० । णं उमाकान्तेशवृकोदरीभ्यां० । तं आषाढीशपूतनाभ्यां० । थं दण्डीशभद्रकालीभ्यां० । दं अत्रीशयोगिनीभ्यां० । धं मीनेशशङ्खिनीभ्यां० । नं मेषेशगर्जिनीभ्यां० । पं लोहितेशकालरात्रिभ्यां० । फं शिखीशकुण्डिनीभ्यां० । बं बगलेशकपर्दिनीभ्यां० । भं द्विरदेशजयाभ्यां० । मं महाकालेशजयाभ्यां० । यं त्वगात्मनेवालीशसुमुखेश्वरीभ्यां० । रं असृगात्मनेधुजङ्घेशरेवतीभ्यां० । लं मांसात्मनेपिनाकीशमाधवीभ्यां० । वं मेदआत्मनेखड्गीशवारुणीभ्यां० । शं अस्थ्यात्मनेबकेशवायवीभ्यां० । षं मज्जात्मनेश्वेतेशरक्षोवधारिणीभ्यां० । सं शुक्रात्मनेभृग्वीशसहजाभ्यां० । हं प्राणात्मनेनकुलीशलक्ष्मीभ्यां० । ळंशक्त्यात्मनेशिवेशव्यापिनीभ्यां० । क्षं क्रोधात्मनेसंवर्तकेशमहामायाभ्यां० । इति श्रीकण्ठादिमातृकान्यासः॥ शुद्धासबिन्दुकायुक्ता कलादिः केशवादिभिः । श्रीकण्ठमातृका चात्र न्यासेऽङ्गे पञ्चमी स्मृता ॥ रुद्रैर्युक्तां केवलां वा मनूनां कर्मारम्भे मातृकां विन्यसेद्यः । मन्त्राः सर्वे कुर्वते तस्य सिद्धिं दोषैः सार्धं याति नाशं जरा च ॥ इति कण्ठादिमातृकान्यासः ॥

Scanned with CamScanner

अथ बृहत्तत्त्वन्यासः ॥ अथ तत्त्वं प्रवक्ष्यामि तत्त्वन्यासं तदर्थिनाम्। यत्तत्त्वन्यासमात्रेण तत्त्वमेव प्रजायते। ॐ मंनमः पराय जीवात्मनेनमः। ॐभंनमः पराय प्राणात्मनेनमः। एतद्द्वयं सर्वाङ्गे। ॐ बंनमः पराय बुद्ध्यात्मनेनमः। ॐ फंनमः पराय अहंकारात्मने०। ॐ पंनमः पराय मनआत्मने०। एतत्त्रयं हृदये। ॐ नंपराय शब्दात्मने मूर्ध्नि। ॐ धंनमः पराय स्पर्शात्मने मुखे। ॐ दंनमः पराय रूपात्मने हृदये। ॐ थंनमः पराय रसात्मने उपस्थे। ॐ तंनमः पराय गन्धात्मने पादयोः। ॐ णंनमः पराय श्रोत्रात्मने श्रोत्रयोः। ॐ ढंनमः पराय त्वगात्मने त्वचि। ॐ डंनमः पराय चक्षुरात्मने चक्षुषोः। ॐ ठंनमः पराय जिह्वात्मने जिह्वायां। ॐ टं नमः पराय घ्राणात्मने घ्राणे। ॐ ञं नमः पराय वागात्मने वाचि। ॐ झं नमः पराय पाण्यात्मने पाण्योः। ॐ जं नमः पराय पाय्वात्मने पायौ। ॐ छं नमः पराय पादात्मने पादयोः। ॐ चं नमः पराय उपस्थात्मने उपस्थे। ॐ ङं नमः पराय आकाशात्मने मूर्ध्नि। ॐ घं नमः पराय वाय्वात्मने मुखे। ॐ गं नमः पराय तेजआत्मने हृदये। ॐ खंनमः परायसलिलात्मने गुह्ये। ॐ कं नमः पराय पृथिव्यात्मने पादयोः। ॐ शं नमः पराय हृत्पुण्डरीकात्मने गुह्ये। ॐ हं नमः पराय सोममण्डलात्मने षोडशकलात्मने। ॐ सं नमः पराय सूर्यमण्डलाय द्वादशकलात्मने। ॐ रंनमः परायवह्निमण्डलाय दशकलात्मने। एतच्चतुष्टयं हृदि। ॐ पंनमः परायपरमेष्ठ्यात्मने वासुदेवायमूर्ध्नि। ॐ यंनमः परायपुरुषात्मने संकर्षणाय मुखे। ॐ वंनमः परायविश्वात्मने प्रद्युम्नायहृदये। ॐ लंनमः पराय

Scanned with CamScanner

निवृत्त्यात्मने अनिरुद्धाय गुह्ये । ॐ क्षंनमः परायसर्वात्मने नारायणायनमः पादयोः । ॐ क्षोंनमः परायकोपात्मने नृसिंहायनमः इति व्यापकम् ॥ अतत्त्वस्याप्यरूपस्य[1] तत्प्राप्तेर्हेतुना पुनः । तत्त्वन्यासमिति प्राहुर्न्यासं तत्त्वविदो बुधाः । यः कुर्यात्तत्त्वविन्यासं स पूतो भवति ध्रुवम् । तदात्मनानुप्रविश्य[2] भगवानिह तिष्ठति । यतः स एव तत्त्वानि सर्वं तस्मिन्प्रतिष्ठितम् । मातृकादेवतयोः अन्ते नमःपदं दातव्यम् । इति बृहत्तत्त्वन्यासः ॥

अथ मूर्तिपञ्जरन्यासः ॥ तन्मूर्तिपञ्जरन्यासं कथयिष्येऽधुना परम् । यस्मात्फलान्तरं नास्ति पुंसस्तन्मूर्तिसिद्धये ॥ ॐ अं ॐ रांकेशवायधात्रेनमः ललाटे । ॐ आं नं रां नारायणायार्यम्णेनमः नाभौ । ॐ इं मों मां माधवायमित्रायनमः हृदये । ॐ ईं भं यं गोविन्दायवरुणायनमः कण्ठे । ॐ उं गं नं विष्णवेअंशवेनमः दक्षिणपार्श्वे । ॐ ऊं वं मं मधुसूदनायभगायनमः दक्षिणांसे । ॐ एं तं रां त्रिविक्रमायविवस्वतेनमः दक्षिणकन्धरे । ॐ ऐं वां रां वामनायइन्द्रायनमः वामपार्श्वे । ॐ ओं सुं मां श्रीधरायपूष्णेनमः वामांसे । ॐ औं दें यं हृषीकेशायपर्जन्यायनमः वामकन्धरे । ॐ अं वां नं पद्मनाभायत्वष्ट्रेनमः पृष्ठे । ॐ अः यं तं दामोदरायविष्णवेनमः ककुदि । ॐ नमोभगवतेवासुदेवायमूर्ध्नि ॥ तन्मूर्तिपञ्जरन्यासोऽभिहितः परमेष्ठिना । सकृन्न्यासाद्भवेन्मन्त्री राममूर्तिरनुत्तमः ॥ इति मूर्तिपञ्जरन्यासः ॥

---

१ प्यपूज्यस्य इति पाठः । २ प्रविष्टो इति पाठः ।

Scanned with CamScanner

अथ किरीटन्यासः । ॐ किरीटहारकेयूरमकरकुण्डलचक्रशङ्खगदाम्बुजहस्तपीताम्बरधरश्रीवत्साङ्कितवक्षस्थलश्रीभूमिसहितात्मज्योतिर्द्वयदीप्तिकरसहस्रादित्यतेजसेनमः इति मन्त्रं स्वशरीरे परतेजोव्याप्तिं स्मरन् किरीटमुद्रया मूर्ध्नि विन्यसेत् । इति किरीटन्यासः ॥

अथ इन्द्रियन्यासः ॥ वक्ष्येऽहमिन्द्रियन्यासमिन्द्रियाणां विशुद्धये । यथा संप्राप्यते रामो देशिकेन्द्रेण धीमता । ॐ दिग्भ्यो नमः श्रोत्रयोः । ॐ वायवे नमः त्वचि । ॐ आदित्याय नमश्चक्षुषोः । ॐ वरुणायनमो जिह्वायां । ॐ अश्विभ्यांनमः घ्राणे । ॐ अग्नयेनमः वाचि । ॐ इन्द्रायनमः पाण्योः । ॐ विष्णवेनमः पादयोः । ॐ मित्रायनमः पायौ । ॐ प्रजापतयेनमः उपस्थे । ॐ चन्द्रमसेनमः मनसि । ॐ ब्रह्मणेनमः बुद्धौ । ॐ रुद्रायनमः अहंकारे । ॐ क्षेत्रज्ञायनमः चित्ते । ॐ अंईश्वरायनमः मनसि[1] । इति इन्द्रियन्यासः ॥

अथ ऋष्यादिन्यासः ॥ न्यासमस्य प्रवक्ष्यामि मनोः सर्वफलप्रदम् । न्यासं विना जपं प्राहुरासुरं विफलं बुधाः ॥ ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्रं छन्द उच्यते । रामाख्यं वैष्णवं धाम देवता परिकीर्तिता ॥ आद्यं बीजं नतिः शक्तौ रामायेति च कीलकम् ॥ ऋषिर्गुरुत्वाच्छिरसैव धार्यश्छन्दोक्षरत्वाद्रसनागतं[2] स्यात् । धियावगन्तव्यतया सदैव हृदि प्रतिष्ठा मनुदेवतायाः ॥ बीजं सुगुह्यं भवतीति गुह्ये शक्तिः पदोर्माधवसंश्रितत्वात् । अथवा बीजशक्ती स्तः स्तनयोर्हृदि कीलकम् ॥ अस्यायमर्थः ।

---

१ शिरसि इति पाठः । २ द्रसनां गत इति पाठः ।

Scanned with CamScanner

ॐ ऋषये ब्रह्मणेनमः शिरसि । ॐ गायत्रीछन्दसेनमः मुखे । ॐ श्रीरामचन्द्रपरमात्मनेनमः हृदि । ॐ रांबीजायनमः गुह्ये । ॐ नमःशक्तयेनमः पादयोः । इति ऋष्यादिन्यासः ॥

अथाङ्गुलिन्यास-हृदयादिन्यास-अक्षरन्यास-पद-न्यासाः ॥ ॐ रां अङ्गुष्ठाभ्यांनमः । ॐ रीं तर्जनीभ्यां० । ॐ रूं मध्यमाभ्यां० । ॐ रैं अनामिकाभ्यां० । ॐ रौं कनिष्ठिकाभ्यां० । ॐ रः करतलकरपृष्ठाभ्यांनमः ॥ ॐ रां नमः हृदयाय० । ॐ रीं शिरसेस्वाहा । ॐ रूं शिखायैवषट् । ॐ रैं कवचायहुं । ॐ रौं नेत्रत्रयाय वौषट् । ॐ रः अस्त्राय फट् ॥ व्यस्तैः षड्वर्णैर्वा न्यासः । इत्यङ्गुलिन्यासः हृदयादिन्यासश्च ॥ शिरोभ्रूमध्यहृदयनाभिगुह्यपदस्थले । मूलमन्त्राक्षरैर्न्यासस्त्वक्षरन्यास उच्यते ॥ इत्यक्षरन्यासः ॥ अथ पदन्यासः ॥ ॐ रांनमः शिरसि । ॐ रामायनमो नाभौ । नमोनमः पादयोः । इति पदन्यासः ॥

अथ व्यापकन्यासः ॥ ॐ मण्डूकायनमः आधारे । ॐ कालाग्निरुद्रायनमः स्वाधिष्ठाने । ॐ कच्छपायनमः नाभौ । ॐ आधारशक्तयेनमः हृदये । ॐ धर्मायनमः दक्षिणस्कन्धे । ॐ ज्ञानायनमः वामस्कन्धे । ॐ वैराग्यायनमः वामपादमूले । ॐ ऐश्वर्यायनमः दक्षिणपादमूले । ॐ अधर्मायनमः वक्त्रे । ॐ अज्ञानायनमः लिङ्गमूले । ॐ अवैराग्यायनमः दक्षिणपार्श्वे । ॐ अनैश्वर्यायनमः वामपार्श्वे । ॐ सप्ततिवलयोपेतायसहस्रफणायानन्तायनमः इति हृदयकमलमध्येन्यसेत् ॥ तन्मध्ये फणोपरि ॐ आनन्दकन्दायनमः । ॐ संविन्नालायनमः । ॐ सर्वतत्त्वकमलायनमः । ॐ प्रकृतिपत्रेभ्योनमः । ॐ विकारमयकेसरेभ्योनमः । ॐ पञ्चाशद्वर्णाढ्यकर्णिकायैनमः । ॐअंअर्कमण्डलाय

Scanned with CamScanner

द्वादशकलात्मनेनमः । ॐ संसोममण्डलाय षोडशकलात्मने नमः । ॐ रं वह्निमण्डलायदशकलात्मनेनमः । ॐ सं सत्वाय प्रबोधात्मनेनमः । ॐ रं रजसे प्रवृत्त्यात्मने० । ॐ तं तमसे मोहात्मने० । ॐ आं आत्मनेनमः इति तस्यदक्षिणे । ॐ अन्तरात्मनेनमःइतितस्यपश्चिमे । ॐ परमात्मनेनमःइतितस्यउत्तरे । ॐ ज्ञानात्मनेनमःइतितस्यपूर्वे । ॐ मायातत्त्वायनमः । ॐ कलातत्त्वायनमः । ॐ विद्यातत्त्वायनमः । ॐ परमतत्त्वायनमः । इत्येककैकोपरि प्रणवादिसर्वमन्त्रान्संन्यस्य प्रागादिदलेषु मध्येच नवशक्तीर्न्यसेत् ॥ तथाहि ॐ विं विमलायैनमः । ॐ उं उत्कर्षिण्यैनमः । ॐ ज्ञां ज्ञानायैनमः । ॐ क्रिं क्रियायैनमः । ॐ यों योगायै० । ॐ प्रं प्रह्वयै० । ॐ सं सत्वायै० । ॐ ईं ईशानायै० । ॐ अं नुग्रहायै० । ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपद्मपीठात्मनेनमः इति मध्ये विन्यसेत् । तस्मिन्पीठे सहस्रादित्यसंकाशंमन्त्रं ध्यात्वा श्वासमार्गेणांजलावानीय व्यापकं न्यसेत् । इति व्यापकन्यासः ॥

द्वितीयपटलोपसंहारः ॥ एवं विन्यस्य विधिवत्साक्षान्नारायणो भवेत् । ज्वररोगाभिचाराद्याः प्रलयं यान्ति नान्यथा ॥ भूतप्रेतपिशाचाश्च तथैव ब्रह्मराक्षसाः । कूष्माण्डाश्चैव डाकिन्यो नैव द्रष्टुमपि क्षमाः ॥ य एवं विन्यसेद्धीमान् रामः साक्षात्स्वयं भवेत् । नातः परतरं किंचित्पावनं पुण्यमस्ति हि ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमन्मुकुन्दवनशिष्यानन्दवनविरचितायां रामार्चनचन्द्रिकायां द्वितीयः पटलः ॥ २ ॥

Scanned with CamScanner

तृतीयः पटलः ३

अथ पूजाविधिः ॥ तत्रादौ ध्यानम् ॥ अयोध्यानगरे रम्ये रत्नमण्डपमध्यगे। ध्यायेत्कल्पतरोर्मूले रत्नसिंहासनं शुभम् ॥ तन्मध्येऽष्टदलं पद्मं नानारत्नप्रवेष्टितम्। तत्र श्रीरामचन्द्राख्यं ध्यायेत्तेजः परात्परम् ॥ प्रकृत्या सीतया श्यामं स्थित्युत्पत्त्यप्ययापहम्। देवासुरमुनीन्द्रैश्च योगिवृन्दैश्च सेवितम् ॥ चतुर्भुजं शङ्खचक्रगदापङ्कजधारिणम्। किरीटहारकेयूररत्नकुण्डलशोभितम् ॥ देवतागुरुमन्त्राणां भावयेदैक्यमात्मना। गदारिशङ्खाब्जधरं भवारिं सद्यो ध्यायेन्मोक्षमाप्नोति सर्वः इति श्रुतेः। एवं ध्यात्वा जपेन्मन्त्रं षट्सहस्रं दिने दिने। वाचःश्रियः पतिर्भूत्वा कविर्भवति वत्सरात् ॥ ऐहिकानखिलान्भोगान्भुक्त्वा चान्ते परं व्रजेत् ॥ यद्वा सिंहासने तस्मिन्वीरासनसमाश्रितम्। सम्यग्ज्ञानमयीं मुद्रां दधानं दक्षिणे करे ॥ तेजःप्रकाशनं वामजानु मूर्धनि चापरम्। जानकीवल्लभं देवमिन्द्रनीलमणिप्रभम् ॥ व्याख्याननिरतं देवं द्विभुजं रघुनन्दनम्। वसिष्ठवामदेवादिमुनिभिः परिसेवितम् ॥ वामभागे समासीनां सीतां काञ्चनसन्निभाम्। भजतां कामदां नित्यं रक्तोत्पलकराम्बुजाम् ॥ लक्ष्मणं पश्चिमे भागे धृतच्छत्रं सचामरम्। पार्श्वे भरतशत्रुघ्नौ तालवृन्तधरावुभौ ॥ एवं ध्यात्वा जपेन्मन्त्रं ज्ञानलक्ष्म्योः स भाजनम्। जपतां मन्त्रिणामेवं ध्यानयोगेन धीमताम् ॥ पुरश्चरणकृत्येन विनापि फलदो मनुः ॥ इति ॥ वक्ष्यमाणे महाचक्रे कर्णिकायां निरञ्जनम्। सर्वं संव्याप्य सकलं सच्चिदानन्दविग्रहम् ॥ चतुष्पाद्ब्रह्मणो रूपं राम-

Scanned with CamScanner

स्याद्भुतकर्मणः। सेवन्ते योगिनो नित्यं सोहंभावेन तद्धियः॥ तथाच श्रुतिः—अथैते श्लोका भवन्ति—अकाराक्षरसंभूतः सौमित्रिर्विश्वंभावनः। उकाराक्षरसंभूतः शत्रुघ्नस्तैजसात्मकः॥ प्रज्ञात्मकस्तु भरतो मकाराक्षरसंभवः। अर्धमात्रात्मको रामो ब्रह्मानन्दैकविग्रहः॥ श्रीरामसान्निध्यवशाज्जगदानन्दकारिणी। उत्पत्तिस्थितिसंहारकारिणी सर्वदेहिनाम्॥ सीता भगवती ज्ञेया मूलप्रकृतिसंस्थिता। प्रणवत्वात्प्रकृतिरिति वदन्ति ब्रह्मवादिनः॥ इति॥ ॐमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भव्यं भवद्भविष्यदिति सर्वमोङ्कार एव यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पाज्जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः, स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः, यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तं सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् तेजोमुखः प्राज्ञस्तृतीयः पादः, एष सर्वेश्वर एष सर्वज्ञ एषोन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानां, नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमैकात्म्यप्रत्ययसारं प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा विज्ञेयः सदोज्ज्वलो विद्यातत्कार्यहीनः स्वात्मबन्धरहित आनन्दरूपः सर्वाधिष्ठानः सन्मात्रो निरस्ताविद्यातमोमोहोऽहमेवेति संभाव्याहमों

---

१ विश्वधर्धन इति पाठः।

Scanned with CamScanner

तत्सत्परं ब्रह्म रामचन्द्रश्चिदात्मकः सोहमों तद्रामभद्रः परंज्योती रसोहमित्यात्मानमद्वयं मनसा ब्रह्मणैकीकुर्यात् । सदा रामोहमित्येतत्तत्त्वतः प्रवदन्ति ये । न ते संसारिणो नूनं राम एव न संशयः । इत्युपनिषत् । य एवं वेद स मुक्तो भवतीति याज्ञवल्क्य इति ॥ एतदेव परं ध्यानमेतदेव परं तपः । एतदेव परं रामपूजनं भवकृन्तनम् ॥ अश्वमेधसहस्राणि वाजपेयशतानि च । एकस्य ध्यानयोगस्य कलां नार्हन्ति षोडशीम् ॥ इति ध्यानम् ॥

अथार्घ्यपात्रासादनम् ॥ ततः सामान्यार्घ्योदकेन चतुरस्रं षट्कोणं त्रिकोणं मण्डलं कृत्वा शङ्खमुद्रयावष्टभ्य पुष्पाक्षतैराग्नेयनैर्ऋत्यवायव्येशानेषु हृदयशिरःशिखाकवचानि मध्ये नेत्रं पूर्वादिदिक्षु चास्त्रं संपूज्याधारं मूलमन्त्रेण प्रक्षाल्य ॐ अं अग्निमण्डलाय दशकलात्मने श्रीरामार्घ्यपात्रासनाय नम इत्याधारं प्रतिष्ठाप्य पूर्वाद्यष्टदिक्षु उपर्यधश्चाग्रे दश कलाः पूजयेत् । तथाहि । ॐ यं धूम्रायैनमः । ॐ रं नीलरक्तायैनमः ॐ लं कपिलायैनमः । ॐ वं विस्फुलिङ्गिन्यैनमः । ॐ शं ज्वालायै नमः । ॐ षं निष्पत्तिकायैनमः । ॐ सं हव्यवाहिन्यैनमः । ॐ हं कव्यवाहिन्यैनमः । ॐ ळं रौद्र्यैनमः । ॐ क्षं संहारिण्यैनमः । इति सर्वत्राधारोपरि एताः कलाः पूजयेत् । अथ शङ्खप्रतिष्ठा ॥ ततः शङ्खमन्त्रेण संशोध्य ॐ सं सूर्यमण्डलाय द्वादशकलात्मने श्रीरामार्घ्यपात्रायनमः इति पात्रमाधारे निधाय तत्र सूर्यस्य द्वादशकलाः संपूजयेत् । ॐ कं भं तपिन्यैनमः । ॐ खं बं तापिन्यै० । ॐ गं फं संधिन्यै० । घं पं बोधिन्यै० । ङं नं कालिन्यै० ।

---

१ त्मानमादाय इति पाठः । २ पात्रं सदाधारे इति पाठः ।

Scanned with CamScanner

चं धं शोषिण्यै० । छं दं वरेण्यै० । जं थं आकर्षिण्यै० । झं तं वैष्णव्यै० । ञं णं विष्णुविद्यायै० । टं ढं ज्योत्स्नायै० । ठं डं हिरण्यायै० । इति सर्वत्रैताः शङ्खे संपूज्य । ततो मातृकाः प्रतिलोम्येनोच्चरन् शुद्धोदकेन तं शङ्खं संपूर्य । ॐ सों सोममण्डलाय षोडशकलात्मने श्रीरामार्घ्यामृतायनमः इति संपूज्य । तत्रैव चन्द्रमसः षोडशकलाः पूजयेत् । तथाहि । ॐ अं अमृतायैनमः । आं मानदायैनमः । इं तुष्ट्यैनमः । ईं पुष्ट्यै० । उं प्रीत्यै० । ऊं रत्यै० । ऋं लज्जायै० । ॠं श्रियै० । ऌं स्वधायै० । ॡं रात्र्यै० । एं ज्योत्स्नायै० । ऐं हंसवत्यै० । ओं छायायै० । औं पूरिण्यै० । अं वामायै० । अः अमायै० । इत्येताः सर्वत्र जले प्रपूजयेत् ॥ इत्यर्घ्यपात्रासादनादि ॥

अथ कलासंग्रहश्लोकाः ॥ धूम्रा च नीलरक्ता च कपिला विस्फुलिङ्गिनी । ज्वालानिष्पत्तिका चैव हव्यवाहनिका तथा ॥ कव्यवाहनिका रौद्री संहारिण्यः कला दश ॥ तापिनी तापिनी चैव संधिनी बोधिनी तथा । कालिनी शोषिणी चाथ वारुण्याकर्षणी च वै ॥ वैष्णवी विष्णुविद्या च ज्योत्स्ना हिरण्या तथैव च । सूर्यस्य सूर्यसंख्याकाः कलाः प्रोक्तास्तु सूरिभिः ॥ अमृता मानसा तुष्टिः पुष्टिः प्रीती रतिर्हिका । श्रीः स्वधा रात्रिर्ज्योत्स्ना हंसवती छाया च पूरणी ॥ माया विश्वावती हेमा प्रभानाम्नी तथैव च । इति पाठान्तरम् ॥ नित्या अमा च चन्द्रस्य कलाः षोडशकान्विताः ॥ इति वसिष्ठसंहितायां कलाः ॥

---

१ रामार्घ्यपात्रामृताय । २ पूर्णिमायै । ३ निःपत्तिका इति पाठः । ४ वरेण्याकर्षिणी इति पाठः । ५ मानदा इति पाठः । ६ पूर्णिमा इति पाठः ।

Scanned with CamScanner

अथ शङ्खप्रतिष्ठा ॥ ततस्तस्मिन् शङ्खजले गङ्गेति मन्त्रमुच्चरन् । तीर्थमावाहयेच्छुद्धं गन्धाद्यैरर्चयेत्ततः ॥ शङ्खे पाणितलं दत्त्वा जपेन्मन्त्रं षडक्षरम् । चिन्मयं चिन्तयेत्तीर्थमानीयाङ्कुशमुद्रया ॥ ब्रह्माण्डोदरतीर्थेभ्यो धेनुमुद्रां प्रदर्श्य च । शङ्खमुद्रां चक्रमुद्रां गरुडाख्यां च दर्शयेत् ॥ परमीकृत्य यत्नेन पावनं तद्विचिन्तयेत् । करावेकत्र संयोज्यावारार्तिकमिव[1] प्रिये ॥ परमीकरणं नाम मुद्रेयं सर्वकामदा । देवस्य मूर्ध्नि तत्सिचेत्पूजाद्रव्येषु चात्मनः ॥ अवेक्षणं प्रोक्षणं च वीक्षणं ताडनं तथा । अर्चनं चैव सर्वेषां पावनं तत्प्रकल्पयेत् ॥ पूतमेवाखिलं पूजायोग्यं भवति सार्थकम् ॥ इति शङ्खप्रतिष्ठा ॥

अथार्घ्यपात्राणि ॥ पात्राणि ताम्रहेमादिनिर्मितानि जलान्तरे । जलजानि विचित्राणि प्रभवन्त्यर्हणादिषु[2] ॥ पाद्यार्थमर्घ्यदानार्थं[3] मधुपर्कार्थमप्यथ । तथैवाचमनीयार्थं न्यसेत्पात्रचतुष्टयम् ॥ आत्मनः पुरतः शङ्खं पूर्वतः सादयेत्ततः । अर्घ्यपाद्यादिपात्रेषु संपूर्य सलिलं शुभम् ॥ तत्रार्घ्यपात्रे दातव्या गन्धपुष्पयवाक्षताः । कुशाग्रतिलदूर्वाश्च सर्षपाश्चार्घ्यसिद्धये ॥ पाद्यपात्रेपि दातव्यं श्यामाकं पूर्वमेव च । अब्जं च विष्णुक्रान्तां च पाद्यसिद्ध्यै प्रयोजयेत् ॥ तथाचमनपात्रेपि दद्याज्जातीफलं मुने । लवङ्गमपि कङ्कोलं शस्तमाचमनीयके ॥ दध्ना च मधुसर्पिर्भ्यां मधुपर्को भविष्यति । एकस्मिन्नथ वा पात्रे पाद्यार्घ्यादीनि कल्पयेत् ॥ सर्वोपचारवस्तूनामलाभे भावनैव हि ॥ निर्मलेनोदकेनैव पूर्णतेत्याह नारदः ॥ पात्राणि चैवमासाद्य ततोन्तर्यागमाचरेत् ॥

---

१ तारात्रिकमिव इति पाठः । २ भवन्ति ह्यर्हणादिषु । ३ अर्घ्यपाद्यप्रदानार्थं ।

Scanned with CamScanner

अथान्तर्यागः ॥ तथाहि–धर्मकन्दसमुद्भूतं ज्ञाननालं सुशोभनम् । ऐश्वर्याष्टदलं पद्मं परं वैराग्यकर्णिकम् ॥ तस्मिन्पीठे चिदात्मानं रामचन्द्रस्वरूपिणम् । ध्यात्वा यजेच्चन्दनाद्यैर्मानसैर्धूपदीपकैः ॥ भोजनावसरे किंचिज्जपं कृत्वा निवेदयेत् । गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ स्वाधिष्ठानगते कुण्डे त्रिकोणे वह्निमुज्ज्वलेत् । चिद्रूपं प्रणवेनाथ तत्राहन्तादिकं हुनेत् ॥ पूजाहोमादिकं देव कृतं यत्त्वदनुग्रहात् । तेन प्रीतो भव त्वं भोः शुद्धं मे मानसं कुरु ॥ निवेदयामि चात्मानं त्वं गतिः परमेश्वर । श्वासमार्गगतं तेज इत्युक्त्वात्मानमर्पयेत् ॥ तन्मयः सच्चिदानन्दो भूत्वा तिष्ठेत्कियत्क्षणम् ॥ इत्यन्तर्यागः ॥ मानसैः कुसुमैरर्चा सात्विकी सा शुभा मता । अनिर्माल्या परा शुद्धा मोक्षदा सिद्धिदा शुभा ॥ तस्मात्सर्वप्रयत्नेन मानसं यजनं ध्रुवम् । आदौ चैव प्रकर्तव्यं पश्चाद्द्रव्यैः सविस्तरैः ॥

अथ बहिर्यागः ॥ अथात्मानं चिन्मयं च ध्यात्वा[1] गन्धादिभिर्यजेत् । ॐ आत्मतत्त्वाय नमः । ॐ कलातत्त्वाय नमः । ॐ विद्यातत्त्वाय नमः । ॐ रागतत्त्वाय नमः । इत्यात्मानमभ्यर्च्य बहिर्यागं कुर्यात् ॥

अथ श्रीराममहायन्त्रम् ॥ ततो लिखेद्यन्त्रराजं रघुनन्दनविग्रहम् । कामक्रोधादिदोषोत्थदीर्घदुःखनियन्त्रणात् ॥ यन्त्रमित्याहुरेतस्मिन्रामः प्रीणाति पूजितः । यन्त्रं मन्त्रमयं प्रोक्तं मन्त्रात्मा देवतेति च ॥ देहात्मनोर्यथा भेदो मन्त्रदेवतयोस्तथा । तस्मात्पीठे यन्त्रराजं लिखित्वा तत्र पूजयेत् ॥ सौवर्णे राजते

१ दात्वयि स्थिरा । २ पृथग्गन्धादिभिः कृतैः ।

Scanned with CamScanner

ताम्रे पीठे भूर्जेऽथवा भुवि । विना यत्नेन चेत्पूजा देवता न प्रसीदति ॥ श्रीरामः पूजितो यत्र सीतया सह यत्रितः । यद्दिष्टं तत्करोत्येव तत्तन्मन्त्रवराद्दते ॥ तापनीयोपनिषदि श्रुत्युक्तं यत्नायकम् । उच्यते कामदं नृणां मोक्षदं धारणादपि ॥ त्रिरेखापुटमालिख्य मध्ये तारद्वयं लिखेत् । तन्मध्ये बीजमालिख्य तदधः साध्यमालिखेत् ॥ द्वितीयान्तं च तस्योर्ध्वं षष्ठ्यन्तं साधकं तथा । कुरुद्वयं च तत्पार्श्वे लिखेद्बीजान्तरे रमाम् ॥ तत्सर्वं प्रणवाभ्यां च वेष्टयेच्छुचिबुद्धिमान् । दीर्घभाजि षडश्रेषु लिखेद्बीजं हृदादिभिः ॥ कोणपार्श्वे रमामाये तदग्रेऽनङ्गमालिखेत् । क्रोधं कोणाग्रान्तरे तु लिखेन्मन्त्रमितो गिरम् ॥ वृत्तत्रयं साष्टपत्रं सरोजे विलिखेत्स्वरान् । केसरे चाष्टपत्रे च वर्गाष्टकमथालिखेत् ॥ तेषु मालामनोर्वर्णान्विलिखेदूर्मिसंख्यया । अन्ते पञ्चाक्षराण्येवं पुनरष्टदलं लिखेत् ॥ तेषु नारायणार्ष्टाणाँल्लिखेत्तत्केसरे रमाम् ॥ तद्बहिर्द्वादशदलं विलिखेद्द्वादशाक्षरम् ॥ तथोन्नमो भगवते वासुदेवाय इत्ययम् ॥ आदिक्षान्तान्केसरेषु वृत्ताकारेण संलिखेत् । तद्बहिः षोडशदलं लिखेत्तत्केसरे ह्रियम् ॥ वर्मास्त्रनतिसंयुक्तं दलेषु द्वादशाक्षरम् ॥ तत्सन्धिष्विरजादीनां मन्त्रान्मन्त्री समालिखेत् ॥ हं सं भृं बृं लं अं सं जूं श्च लिखेत्सम्यक्ततो बहिः । द्वात्रिंशारं महापद्मं नादबिन्दुसमायुतम् ॥ विलिखेन्मन्त्रराजार्णास्तेषु पत्रेषु यत्नतः ।[तत्र त्वानुष्टुभं रघोः इति वा पाठः ।] श्रुत्यनुक्तमपि ग्राह्यं यदेतत्सांप्रदायिकम् ॥ ध्यायेदष्टवसूनेकादशरुद्रांश्च तत्र वै । द्वादशार्कांश्च

धातारं वषट्कारं च तद्बहिः[1] ॥ भूगृहं वज्रशूलाढ्यं रेखात्रय-समन्वितम् । द्वारोपेतं च राश्यादिभूषितं फणिसंयुतम् ॥ अ-नन्तो वासुकिश्चैव तक्षककोटपद्मकाः । महापद्मस्तथा शङ्खः कुलिकोऽष्टौ कुलानि च ॥ अनन्तकुलिकौ विप्रौ वह्निवर्णावुदा-हृतौ । प्रत्येकं तु सहस्रेण फणानां समलंकृतौ । वासुकिः शङ्ख-पालश्च क्षत्रियौ पीतवर्णकौ ॥ प्रत्येकं तु फणासप्तदशसंख्या-विराजितौ । तक्षकश्च महापद्मो वैश्यावेतावही स्मृतौ ॥ नील-वर्णौ फणापञ्चशततुङ्गोत्तमाङ्गकौ । पद्मककोटकौ शूद्रौ फणा-त्रिंशतकान्वितौ[2]॥ एवं मण्डलमालिख्य तस्य दिक्षु विदिक्षु च । नारसिंहं वराहं च लिखेन्मन्त्रद्वयं तथा ॥ इदं सर्वात्मकं यन्त्रं प्रागुक्तमृषिसेवितम् । इदं रहस्यं परममीश्वरेणापि दुर्गमम् ॥ एवं यन्त्रं समाख्यातं न देयं प्राकृते जने । गुरुदर्शितमार्गेण स्वबुद्ध्या नैव तल्लिखेत् । गुर्वनुक्ताः क्रियाः सर्वा निष्फलाः स्युर्यतो ध्रुवम् । श्रीरामपूर्वतापिन्याष्टीकायां यन्त्रनायकः । प्रपञ्चितो यथास्माभिर्द्रष्टव्यः सिद्धिकाङ्क्षिभिः ॥ इति पूर्वराम-तापिनीयोपनिषदुक्तो यन्त्रराजोद्धारः ॥

अथ पीठपूजाप्रकारः ॥ अस्मिन्पूजा महाचक्रे राघव-स्याधुनोच्यते । पीठं तत्पूजयित्वादौ स एव क्रम उच्यते ॥ स्वपुरतो वामभागे । ॐ श्रीगुरुभ्योनमः । ॐ परमगुरुभ्योनमः । ॐ परमेष्ठिगुरुभ्योनमः । ॐ परात्परगुरुभ्योनमः । इत्यभ्यर्च्य । स्वदक्षिणभागे । ॐ गं गणपतयेनमः । ॐ सं सरस्वत्यैनमः । ॐ दुं दुर्गायैनमः । ॐ क्षं क्षेत्रपालायनमः । ॐ ह्रीं बटुकाय-नमः । इत्यभ्यर्च्य ॥ ततः ॐ वास्तुपुरुषायनम इति ॥ याग-

---

१ ततो बहिः । २ तच्च द्वादशराश्यादि । ३ त्रिंशतकौ सितौ ।

Scanned with CamScanner

गृहमध्ये। ॐ मण्डूकाय नम इति पीठमध्ये । ॐ सर्वत्रादौ । ॐ कालाग्निरुद्राय० । कूर्माय० । आधारशक्तये० । पृथिव्यै० । इत्युपर्यभ्यर्च्य । ॐ क्षीरसमुद्राय नमः । रत्नद्वीपाय० । मणिमण्डपाय० । कल्पवृक्षेभ्यो० । रत्नवेदिकायै० । रत्नसिंहासनाय० इत्यभ्यर्च्य । आग्नेयादिपीठपादेषु धर्मादींश्चतुरो यजेत् । पीठगात्रेषु पूर्वादीनधर्मादींस्तथैव च ॥ कर्णिकायां तथाऽनन्दकन्दं नालं सरोरुहम् । पत्राणि केसरांश्चैव कर्णिकायां तथा यजेत् ॥ तारार्केन्द्वग्न्यर्णपूर्वमर्काग्नीन्दुत्रिमण्डलम् । गुणत्रयं च सत्वादि ततश्चात्मचतुष्टयम् ॥ मायातत्वं कालतत्वं[2] विद्यातत्वं परं तथा । एकैकोपरि संपूज्य[3] ततः शक्तीर्यजेन्नव ॥ विमलोत्कर्षिणी ज्ञाना क्रिया योगा च पञ्चमी । प्रह्वी सत्या तथेशानाऽनुग्रहा नवमी परा ॥ पूर्वाद्यष्टसु पत्रेषु कर्णिकायां यजेत्क्रमात् । चतुर्थ्या नमसा युक्तैः स्वैः स्वैरेव च नामभिः ॥ कर्णिकायां यजेत्पश्चात्पीठमन्त्रेण मंत्रवित् । प्रणवं पूर्वमुच्चार्य नमःशब्दं ततो वदेत् ॥ भगवतेपदमाभाष्य विष्णवे[1] इति चोच्चरेत् । सर्वभूतात्मने चेति वासुदेवाय इत्यपि ॥ ततः सर्वात्मसंयोगयोगपीठात्मनेनमः । मूलयुक्तेन चानेन दद्यात्पुष्पाञ्जलिं पुनः ॥ इति संपूजिते पीठे देवमावाह्य पूजयेत् । न्यासस्थले विशेषस्तु द्रष्टव्यः पीठपूजने ॥ इति पीठपूजा ॥

मूर्तौ रामानयनम्॥ चैतन्यविग्रहं रामं स्थितं हृदयपङ्कजे । श्वासमार्गेणागतं च चिन्तयेत्कुसुमाञ्जलौ ॥ पादुकामुद्रयानीय मूर्तौ संयोज्य[4] सिद्धया । मुद्राः प्रदर्शयेत्सप्त दश चावाहनादिकाः॥

अथ मुद्राप्रकारः ॥ अगस्त्यसंहितायाम्-आवाहनी स्थापनी

---

१ विष्णेवेति पदं पठेत् । २ कलातत्वं । ३ संपूज्य ।

Scanned with CamScanner

च सन्निधीकरणी तथा। सुसन्निरोधिनी मुद्रा संमुखीकरणी तथा ॥ संकलीकरणी चैव महामुद्रा तथैव च। शङ्खचक्रगदा-पद्मधेनुकौस्तुभगारुडाः ॥ श्रीवत्सं वनमालां च योनिमुद्रां प्रदर्शयेत्। एताभिः सप्तदशभिर्मुद्राभिस्तु विचक्षणः ॥ यो रामर्चयेन्नित्यं मोहयेत्स सुरेश्वरम्। द्रावयेदपि विप्रेन्द्र ततः प्रार्थितमाप्नुयात् ॥ इति सप्तदशमुद्राः ॥

अथ मुद्रालक्षणानि ॥ तासां च लक्षणानीतः प्रोच्यन्ते प्रतिमादिषु। [मूलाधाराद्वादशान्तमानीतः कुसुमाञ्जलिः ॥ त्रिस्थानगततेजोभिर्विनीतः प्रतिमादिषु। आवाहनीया मुद्रा स्यादेवार्चनविधौ मुने ॥१॥ उत्तानाभ्यां तु हस्ताभ्यां मुद्रा चावाहनी स्मृता। एषैवाधोमुखी मुद्रा स्थापनीत्युच्यते पुनः ॥ २ ॥ उत्तानाङ्गुष्ठयोगेन मुष्टीकृतकरद्वयम्। संनिधीकरणी नाम मुद्रा देवार्चनाविधौ ॥ ३ ॥ अङ्गुष्ठगर्भिणी सैव मुद्रा स्यात्संनिरोधिनी ॥ ४ ॥ उत्तानमुष्टियुगुला संमुखीकरणी मता ॥५॥ अङ्गैरेवाङ्गविन्यासः संकलीकरणी भवेत् ॥६॥ अन्योन्याङ्गुष्ठसंलग्ना विस्तारितकरद्वया। महामुद्रेयमाख्याता न्यूनाधिकसमापनी ॥ ७ ॥ कनिष्ठानामिकामध्यात्तथाङ्गुष्ठेतरेऽग्रतः ॥ गोपितेऽङ्गुष्ठमूलेन सन्नता मुकुलीकृता। करद्वयेन मुद्रा स्याच्छङ्खाख्येयं सुरार्चने ॥ ८ ॥ अन्योन्याभिमुखस्पर्शव्यत्ययेन तु वेष्टयेत्। अङ्गुलीभिः प्रयत्नेन मण्डलीकरणं मुने ॥ चक्रमुद्रेयमाख्याता ९, गदामुद्रा ततः परम्। अन्योन्याभिमुखाश्लिष्टाङ्गुलिः प्रोन्नतमध्यमा १०॥ अथाङ्गुष्ठद्वयं मध्ये दत्त्वापि परितः करौ। मण्डलीकरणं सम्यगङ्गु-

---

१ श्रीवत्सवनमालाख्या योनिमुद्राः प्रदर्शयेत्। २ मता।

Scanned with CamScanner

लीनां तपोधन ॥ पद्ममुद्रा भवेदेषा ११, धेनुमुद्रा ततः परम् ॥ अनामिके कनिष्ठाभ्यां तर्जनीभ्यां च मध्यमे । अन्योन्याभिमुखाश्लिष्टा १२ततः कौस्तुभसंज्ञका ॥ कनिष्ठेऽन्योन्यसंलग्नेऽभिमुखेपि परस्परम् । वामस्य तर्जनीमध्ये मध्यानामिकयोरपि ॥ वामानामिकसंस्पृष्टा तर्जनीमध्यशोभिता । पर्यायेण नताङ्गुष्ठद्वयी कौस्तुभलक्षणा १३ ॥ कनिष्ठान्योन्यसंलग्ना विपरीतं तु योजिता । अधस्तात्प्रापिताङ्गुष्ठा मुद्रा गारुडसंज्ञका १४ ॥ तर्जन्यङ्गुष्ठमध्यस्था मध्यमानामिकाद्वयी । कनिष्ठानामिकामध्या तर्जन्यग्रकरद्वयी ॥ मुने श्रीवत्समुद्रेयं १५, वनमाला भवेत्ततः । कनिष्ठानामिकामध्यामुष्टिरुन्नततर्जनी ॥ परिभ्रान्ता शिरस्युच्चैस्तर्जनीभ्यां दिवौकसः १६ । मुद्रा योनिः समाख्याता ह्येतत्करद्वयेरिता ॥ तर्जन्यङ्गुष्ठमध्यान्तस्थितानामिकयुग्मका । मध्यमूलस्थिताङ्गुष्ठाग्र्येयं शस्तार्चने मुने ॥ इति मुद्रालक्षणानि ॥

अथ प्रधानपूजा ॥ शालग्रामे स्थावरे वा नावाहनविसर्जने । शालग्रामशिलादौ यन्नित्यं संनिहितो हरिः ॥ मूलं रामगायत्रीं चोच्चार्य ततः साङ्गाय सायुधाय सवाहनाय सपरिवाराय सशक्तिकाय रामाय पुष्पाञ्जलिं कल्पयामि नम इति पुष्पाञ्जलिं पाद्याद्युपचारेषु सर्वत्र दद्यात् । आदौ पुष्पाञ्जलिं दत्त्वा पादार्चनमतः परम् । पाद्यमर्घ्यं स्त्राचमनं मधुपर्कं यथोचितम् । अभ्यङ्गोद्वर्तने दत्त्वा महास्नानं समाचरेत् ॥ अभिषेकाङ्गवस्त्रादि दत्त्वा नीराजयेद्धरिम् । स्नानं पुरुषसूक्तेन शुद्धशङ्खोदकेन च ॥ क्षीरदध्याज्यमधुभिः (?) खण्डेन (सितया) च पृथक्पृथक् । नालिकेरोदकेनापि तथा तालफलाम्बुना ॥ गन्धद्रव्यैश्च बहुभिस्तथा

Scanned with CamScanner

गन्धोदकेन च। ऐक्षवेणोदकेनापि सकर्पूरादिगन्धिना ॥ कदलीपनसाम्रोत्थजलेनापि सुगन्धिना। शतं सहस्रमयुतं शक्त्या वाप्यभिषेचयेत् ॥ शङ्खं[1] संपूर्य तेनैव सपुष्पेण रघूत्तमम्। सकृष्णागरुधूपेन धूपयन्नन्तरान्तरा[2] ॥ ततः शुद्धजलेनैव स्नापयेत्तमनन्यधीः। राज्यार्थी राज्यसिद्ध्यर्थं नित्यं वत्सरमादरात् ॥ एवमेवाभिषिच्यैव राजा भवति नान्यथा। दत्त्वाथाचमनीयं च वाससी परिधापयेत् ॥ दद्यादाचमनं भूय औत्तर्यं सोपवीतकम्। पीठमानीय संस्थाप्य पादुकामुद्रया हरिम् ॥ भूषणैर्भूषयेद्योग्यैस्तुलसीदलमिश्रितैः। मूलेनाथार्पयेद्गन्धं पुष्पाञ्जल्यष्टकं ततः॥ वामभागे समासीनां सीतां काञ्चनसन्निभाम्। ॐ श्रीसीतायै स्वाहेति तन्मन्त्रेणार्चयेच्च ताम् ॥ ततो दक्षिणकोणाग्रे सखायं लक्ष्मणं यजेत्। ॐ लं लक्ष्मणाय नमस्तन्मन्त्रेण त्रिकोणके ॥ एवं त्रिकोणरूपं.....स्यादिति श्रुतिः। वामपार्श्वे त्रिकोणस्य शार्ङ्गं दक्षिणके शरान् ॥ ॐ शां शार्ङ्गायनमः शं शरेभ्यो नमोस्त्विति। पूजानुज्ञां ततो लब्ध्वा बहिरङ्गान्यथो यजेत् ॥ इति पुष्पार्पणान्ता प्रधानपूजा ॥

अथावरणपूजा ॥ तत्र प्रथमावरणम् ॥ ॐ रां हृदयायनमः। ॐ रीं शिरसेस्वाहा। ॐ रूं शिखायैवषट्। ॐ रैं कवचायहुम्। ॐ रौं नेत्रत्रयाय वौषट्। ॐ रः अस्त्रायफट् ॥ षट्कोणे प्रथमावृत्तिः स्यादङ्गैर्हृदयादिभिः। वरदाभयधारिण्यो वह्न्याशारभ्य पूजयेत् ॥ हारेन्दुश्यामनीलाभाः कृष्णारुणरुचः स्त्रियः। ततो हस्तौ प्रक्षाल्य रामाय गन्धं दत्त्वा

---

१ शङ्खेन। २ न्तरा विभुम्।

पुष्पाञ्जलिं दक्षिणहस्ताङ्गुष्ठतर्जनीमध्यमाङ्गुलिभिर्गृहीत्वा मध्ये शङ्खोदकं च ॥ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये त्वाहमाद्यमावरणार्चनम् ॥ इत्युच्चार्य तज्जलं त्यक्त्वा पुष्पाञ्जलिं समर्पयेत् । हस्तप्रक्षालनादिकं कृत्वा । द्वितीयावरणार्चनं । तृतीयावरणार्चनं । चतुर्थावरणार्चनं । पञ्चमावरणार्चनं । षष्ठं चावरणार्चनं । सप्तमावरणार्चनं । अष्टमावरणार्चनं । नवमावरणार्चनं । दशमावरणार्चनं । इत्याद्यावरणेषूहः कार्यः शङ्खाद्येकैकमुद्रादर्शनं चेति प्रत्यावरणं कुर्यात् । इति प्रथमावरणम् ॥

अथ द्वितीयावरणम् ॥ ॐ आं आत्मनेनमः । ॐ यं परमात्मनेनमः । ॐ विं विद्यायै नमः । ॐ सं ज्ञानात्मने नमः । ॐ शां शान्त्यैनमः । द्वितीयात्मादिकेर्देवैरष्टाङ्गमूलके तथा । यथा रामस्तथैवैताः शक्तयश्च कराम्बुजाः ॥ इति द्वितीयावरणम् ॥

अथ तृतीयावरणम् ॥ ॐ वां वासुदेवायनमः । श्रीं श्रियैनमः । सं संकर्षणाय० । शां शान्त्यै० । प्रं प्रद्युम्नाय० । रं रत्यै० । अं अनिरुद्धाय० । प्रीं प्रीत्यै० । तृतीया वासुदेवाद्यैरष्टपत्रे तथैव च । चपगशधरस्त्वाप्तो रामः शपगचः स्मृतः । प्रद्युम्नः पचशगवान् शचमपश्चतुर्थकः । दक्षिणाधःकराज्ज्ञेयाः क्रमादेव्याः कराम्बुजाः । स्फटिकस्वर्णदूर्वेन्द्रनीलाभास्त्रिदशाः क्रमात् । स्वर्णाच्छपद्मकिञ्जल्कश्यामलास्तु श्रियादयः ॥ इति तृतीयावरणम् ॥

अथ चतुर्थावरणम् ॥ हं हनुमते नमः । सुं सुग्रीवाय० । भं भरताय० । बिं बिभीषणाय० । लं लक्ष्मणाय० । अं अङ्ग-

Scanned with CamScanner

दाय० । शं शत्रुघ्नाय० । जां जाम्बवते० । चतुर्थी वायुपुत्राद्यैः पत्राग्रे पूर्वतः क्रमात् । देवाग्रे स्वस्य चाप्यग्रे प्राची प्रोक्ता विचक्षणैः ॥ प्राच्येव प्राची चोद्दिष्टा मुक्त्वा तु देवपूजनम् । स्वर्णाभः श्यामलः कृष्णः स्वर्णाभो नीलभाः क्रमात् । वाचयन्तं हनूमन्तं देवस्याग्रे सुपुस्तकम् ॥ रम्यौ भरतशत्रुघ्नौ पार्श्वयोर्धृतचामरौ । धृतातपत्रं सौमित्रिं कृताञ्जलिपुटान्परान् ॥ प्रियत्वात्पुनर्लक्ष्मणग्रहणम् । सहस्रफणापत्रधरः शेष एव लक्ष्मणशब्देन पुनरुच्यत इत्यर्थः । इति चतुर्थावरणम् ॥

अथ पञ्चमावरणम् ॥ सृं सृष्ट्यैनमः । जं जयन्ताय० । विं विजयाय० । सौं सौराष्ट्राय० । रां राष्ट्रवर्धनाय० । अं अकोपाय० । धं धर्मपालाय० । सुं सुमन्ताय० । सृष्ट्यादिमत्रिणः पूर्वादिक्रमेण कृताञ्जलीन् । आन्वीक्षिकीं मन्त्रयतो द्वितीयाष्टदलेऽर्चयेत् । इति पञ्चमावरणम् ॥

अथ षष्ठावरणम् ॥ वं वसिष्ठायनमः । वां वामदेवाय० । जा जाबालये० । गौं गौतमाय० । भं भरद्वाजाय० । कौं कौशिकाय० । वां वाल्मीकाय० । नां नारदाय० । सं सनकाय० । सं सनन्दनाय० । सं सनातनाय० । सं सनत्कुमाराय० । कमण्डलुधारान्सर्वान्मन्त्रमुच्चरतो मुनीन् । द्वादशारेऽर्चयेत्पूर्वादिक्रमेण ततः परान् ॥ इति षष्ठावरणम् ॥

अथ सप्तमावरणम् ॥ नीं नीलाय० । नं नलाय० । सुं सुषेणाय० । मैं मैंदाय० । शं शरभाय० । द्विं द्विविदाय० । चं चंदनाय० ॥ गं गवाक्षाय० । किं किरीटाय० । कुं कुण्डलाभ्यां० । श्रीं श्रीवत्साय० । कौं कौस्तुभाय० । शं शङ्खाय० ।

Scanned with CamScanner

चं चक्राय० । गं गदायै० । पं पद्माय० । षोडशाब्जेऽर्चयेत्पूर्वादिक्रमेण कृताञ्जलीन् । इति ॥

अथाष्टमावरणम् ॥ ध्रुं ध्रुवाय० । धं धराय० । सों सोमाय० । आं आपाय० । अं अनिलाय० । अं अनलाय० । प्रं प्रत्यूषाय० । प्रं प्रभासाय० । वीं वीरभद्राय० । शं शम्भवे० । गिं गिरिशाय० । अं अजैकपदे० । अं अहिर्बुध्न्याय० । पिं पिनाकिने० । भुं भुवनाधीश्वराय० । कं कपालिने० । दिं दिक्पतये० । स्थां स्थाणवे० । भं भर्गाय० । वं वरुणाय० । सुं सूर्याय० । वें वेदाङ्गाय० । भां भानवे० । इं इन्द्राय० । रं रवये० । गं गभस्तिने० । यं यमाय० । हिं हिरण्यरेतसे० । दिं दिवाकराय० । मिं मित्राय० । विं विष्णवे० । धां धात्रे० । ध्रुवाद्यैरष्टमावृत्तिर्द्वात्रिंशद्दलपत्रके । ध्रुवो धरश्च सोमश्च आपश्चैवानिलोऽनलः ॥ प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः । शूलं खड्गं तथा चक्रं पट्टिशं कुलिशं छुरीम् ॥ कोदण्डं मुद्गरं चैव वसूनामायुधक्रमः । वीरभद्रश्च शम्भुश्च गिरीशश्च महायशाः । अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ॥ भुवनाधीश्वरश्चैव कपाली च दिशां पतिः । स्थाणुर्भगश्च भगवान् रुद्रा एकादश स्मृताः ॥ शल्लकं डमरुं शूलं शिखरं यमदंष्ट्रकम् । कृष्णादिकं पिनाकं च अघोरास्त्रं तथाङ्कुशम् ॥ खट्वाङ्गं च स्थाणुपरं शक्तिहेतिधरास्तथा । रुद्रायुधानि चैतानि प्रोक्तवान्क्रमशः शिवः ॥ वरुणः सूर्यवेदाङ्गौ भानुरिन्द्रो रविस्तथा । गभस्तिश्च यमश्चैव स्वर्णरेता दिवाकरः ॥ मित्रो विष्णुरिति प्रोक्ता आदित्या आदितः क्रमात् ॥ पाशं च मुद्गरं शङ्खं शल्यं शृङ्गं कृपाणकम् ।

Scanned with CamScanner

गदां दण्डं वज्रमब्जं तथा सर्पं सुदर्शनम् ॥ आदित्यानां द्वादशानामायुधानि विदुः क्रमात् ॥ इत्यष्टमावरणम् ॥

अथ नवमावरणम् ॥ लं इन्द्राय सुराधिपतये सायुधाय सपरिवाराय सवाहनाय स्वशक्तियुक्ताय नमः । रं अग्नये तेजोधिपतये सा० । यं यमाय प्रेताधिपतये सा० । क्षं निर्ऋतये रक्षोधिपतये सा० । वं वरुणाय जलाधिपतये सा० । यं वायवे प्राणाधिपतये सा० । सं सोमाय नक्षत्राधिपतये सा० । इं ईशानाय विद्याधिपतये सा० । पूर्वाद्यष्टदिक्षु । ॐ आं ब्रह्मणे लोकाधिपतये० । इति पूर्वेशानयोर्मध्ये । ॐ ह्रीं विष्णवे भूताधिपतये० । नैर्ऋत्यपश्चिमयोर्मध्ये । इन्द्राद्यैर्भूगृहे बाह्ये नवमावरणं भवेत् । इति नवमावरणम् ॥

अथ दशमावरणम् ॥ वं वज्राय० । शं शक्त्यै० । दं दण्डाय० । खं खड्गाय० । पां पाशाय० । ध्वं ध्वजाय० । गं गदायै० । त्रिं त्रिशूलाय० । अं अम्बुजाय० । चं चक्राय० । वज्राद्यायुधवर्गं तु द्वितीये भूगृहेऽर्चयेत् ॥ इति दशमावरणम् ॥

अथावरणव्यवस्था ॥ षट्कोणे प्रथमावृत्तिः स्यादङ्गैरन्वितः क्रमात् । द्वितीयात्मादिकैर्देवैरष्टाब्जमूलके तथा ॥ तृतीया वासुदेवाद्यैरष्टपत्रे तथैव च । चतुर्थी वायुपुत्राद्यैः पत्राग्रे पूर्वतः क्रमात् ॥ सृष्ट्याद्यैः पञ्चमावृत्तिर्द्वितीयाष्टदले तथा । षष्ठी द्वादशपत्रेषु वसिष्ठाद्यैर्महर्षिभिः ॥ सप्तमी षोडशाब्जे स्यान्नीलाद्यैः कपिपुङ्गवैः । ध्रुवाद्यैरष्टमी ज्ञेया द्वात्रिंशद्दलपत्रके ॥ इन्द्राद्यैर्भूगृहे बाह्ये नवमावरणं भवेत् । तदस्त्रैर्वज्रशक्त्याद्यैर्दशमावरणं तथा ॥ दशावरणपूजेयं कर्तव्या साधकोत्तमैः । आराधनासम-

Scanned with CamScanner

र्थश्चेद्दद्यादर्चनसाधनम् ॥ यो दातुं नैव शक्नोति कुर्यादर्चनदर्शनम् । निस्ताराय तदेवालं भवाब्धेर्मुनिसत्तम । नैकं च यस्य विद्येत सोऽधो यात्येव नान्यथा ॥ यस्तु भक्त्या प्रयत्नेन स्वयं संपाद्य चाखिलम् । साधनं चार्चयेद्विद्वान्स समग्रफलं लभेत् ॥ योऽर्चयेद्विधिवद्भक्त्या परानीतैश्च साधनैः । पूजाफलार्धमेवास्य न समग्रफलं लभेत् ॥ ॐ श्रीरामपार्षदेभ्योनम इति तृतीये भूगृहेऽर्चयेत् । ततो बहिर्नागेभ्यः पुष्पाञ्जलिं दत्त्वा सपरिवाराय भगवते धूपदीपादीनुपचारान्कल्पयेत् ॥ इत्यावरणपूजा ॥

अथ धूपादि ॥ ततः समर्पयेद्धूपं घण्टावाद्यजयस्वनैः ॥ धूपस्थानं समभ्यर्च्य तर्जन्या वामया स्पृशन् ॥ वनस्पतिरसोत्पन्नो गन्धाढ्यो धूप उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ सङ्कल्प्यैवं ततः पुष्पाञ्जलिं दत्त्वा यशः पठेत् ॥ तथाच बह्वृचपरिशिष्टे—धूपस्य व्यजनेनैव धूपेनाङ्गं विधूपयेत् । नीराजनेषु सर्वेषु विष्णोर्नामानुकीर्तयेत् ॥ जयघोषं प्रकुर्वीत कारुण्यं चापि कीर्तयेत् । तथा मङ्गलघोषं च जगद्बीजस्य च स्तुतिम् ॥ इति ॥ वामे कोदण्डदण्डं निजकरकमले दक्षिणे बाणमेकं पश्चाद्भागे च नित्यं दधतमभिमतं सासितूणीरभारम् । वामेऽवामे लसद्भ्यां सह मिलिततनुं जानकीलक्ष्मणाभ्यां श्यामं रामं भजेऽहं प्रणतजनमनःखेदविच्छेददक्षम् ॥ इत्यादि पठेत् ॥ घृताक्तं गुग्गुलं यस्तु राघवाय निवेदयेत् । न भयं विद्यते तस्य जन्ममृत्युरुगादिजम् ॥ इति धूपम् । आरार्तिकं तु विषमबहुवर्तिसमन्वितम् । अभ्यर्च्य रामचन्द्राय वाममध्यमयार्पयेत् ॥ सुप्रकाशो महान्दीपः सर्वतस्तिमिरापहः । सबाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥ इति ॥ नमो दीपेश्वरायेति दद्यात्पुष्पाञ्जलिं ततः ।

Scanned with CamScanner

अवधूप्याभ्यर्च्य वाद्यैर्मूर्ध्नि नीराजयेत्प्रभुम् ॥ ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं पीतं वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढसीतामुखकमलमिलल्लोचनं नीरदाभं नानालंकारदीप्तं दधतमुरुजटामण्डलं रामभद्रम् ॥ श्रीराम जयेत्यादि पठेत् । इति दीपम् । हैरण्यं राजतं ताम्रं कांस्यं पालाशपत्रकम् । नैवेद्यायाब्जपत्रं वा पात्रं विष्णोरतिप्रियम् ॥ भक्ष्यं भोज्यं लेह्यचोष्यं पेयमन्नं गुणान्वितम् । दद्याच्छ्रीहरये नित्यं लभेत्पुण्यमनन्तकम् ॥ प्रक्षिप्य तुलसीं प्रोक्ष्य सप्तकृत्वोऽभिमन्त्रयेत् । प्रदर्श्य धेनुं चक्रास्त्रं वामाङ्गुष्ठेन संस्पृशेत् ॥ पानीयं चामृतीकृत्य परेशाय निवेदयेत् । शालीमक्षं सुभक्तं शशिकरसितरुक् पायसापूपसूपं लेह्यं पेयं सुचोष्यं सितममृतफलं घारिकाद्यं सुखाद्यम् । आज्यं प्राज्यं समीज्यं नयनरुचिकरं राजिकैलामरीचस्वादीयःशाकराजीपरिकरममृताहार जोषं जुषस्व ॥ इति निवेदनमन्त्रः ॥ ब्रह्मेशाद्यैः परित उरुभिः सूपविष्टैः समेतो लक्ष्म्या सिञ्चद्वलयकरया सादरं वीज्यमानः । नर्मक्रीडाग्रहसनमुखैर्हासयन्पङ्क्तिभोक्तॄन्भुङ्क्ते पात्रे कनकघटिते षड्रसान् जानकीशः ॥ इति जवनिकामन्त्रः ॥ यश्चिन्तारत्नकल्पद्रुमविभवभुवां मण्डनं मण्डनानां सर्वासां संपदां यस्त्रिजगति जगतां मङ्गलं मङ्गलानाम् । हेमामत्रस्थदूर्वादधिमधुलवणैर्दृष्टिमुत्तार्य चार्यैर्नीराज्यो रामचन्द्रो दिनकरकरजिद्रत्नदीपावलीभिः ॥ लक्ष्मीनारायण गोविन्द देवेत्यादि पठेत् । पश्चाद्यथाशक्ति जपं विधाय गुह्यातिगुह्येति निवेदयेत् । गजास्या-

---

१ रामचन्द्रम् । २ मण्डनम् ।

Scanned with CamScanner

दित्यपञ्चास्यशक्तिसिंहास्यरूपवान् । स मत्कृतेन सर्वात्मा रामः प्रीणातु चिद्वपुः ॥ इति नैवेद्यान्तोपचाराः ॥

अथ नित्यहोमः ॥ कुण्डे यथावद्विहिते सुमृष्टे संस्थाप्य वह्निं जुहुयादवश्यम् ॥ विधिवद्विहिते कुण्डे स्थण्डिले चतुरस्रके । आहवनीयं गार्ह्यं वा लौकिकं वाग्निमुज्वलम् ॥ आनीयास्त्रेण नैर्ऋत्ये क्रव्यादांशं परित्यजेत् । देवांशं मूलमन्त्रेण स्थापयेत्पुरतः सुधीः ॥ अभ्याधानादिकं कर्म नित्यहोमे न विद्यते । वीक्षणं मूलमन्त्रेण शरेण प्रोक्षणं मतम् ॥ तेनैव ताडनं दर्भैर्वर्मणाभ्युक्षणं स्मृतम् । अन्वाधायाथ पर्युक्ष्य परिस्तीर्य यथाविधि ॥ प्राणानायम्य लक्ष्मीशं साङ्गं सायुधमव्ययम् । सिद्धान्तद्रव्यतो यक्ष्य इति संकल्प्य वाग्यतः ॥ न्यासं कृत्वा प्रणीताम्बु प्रोक्षण्यादाय तज्जलैः । यज्ञसाधनसंभारं प्रोक्षयेन्मूलमन्त्रतः ॥ पवित्रोत्पवनान्तं तु कुर्यात्कर्म स्वगृह्यतः । वैश्वानरमन्त्रस्य भृगुर्ऋषिः । वैश्वानरो देवता । गायत्रीछन्दः । रं बीजं । स्वाहेति शक्तिः । ॐ सहस्रार्चिषे० हृदयायनमः । स्वस्तिपूर्णाय शिरसे स्वाहा । उत्तिष्ठपुरुषाय शिखायैवषट् । धूमव्यापिने कवचायहुं । सप्तजिह्वाय नेत्रत्रयाय वौषट् । धनुर्धराय अस्त्राय फट् । ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय साधय स्वाहा । एवमावाह्य समिधं क्षिप्त्वाऽग्निं दीपयेद्विभुम् । ॐ चित्पिङ्गल हनहन दहदह पचपच हुतवह सर्वज्ञाज्ञापय स्वाहा । अग्निं प्रज्वलितं वन्दे जातवेदसमूर्जितम् । हिरण्यवर्णमनलं समृद्धं विश्वतोमुखम् ॥ हिरण्या गगना रक्ता कृष्णा चैव वसुप्रभा । बहुरूपा च कनका जिह्वाः सप्त विभावसोः ॥

---

१ सुवर्णवर्णं । २ सर्वतोमुखं ।

Scanned with CamScanner

सकलजगत्कारकवह्नेर्गर्भाधानादिकाः क्रियाः संपद्यन्तां स्वाहा॥ मणिबन्धौ समौ कृत्वा करौ प्रविततावुभौ। मध्यमे मिलिते कृत्वा तन्मध्येऽङ्गुष्ठकौ क्षिपेत्॥ मुद्रेयं सप्तजिह्वाख्या दर्शयेज्जातवेदसे। पीठे तनूनपाते प्राग्दैरष्टमूर्तिभिस्तदनु। भूयश्च शतमखाद्यैर्विधिनाथ हिरण्यरेतसं प्रयजेत्। जातवेदाः सप्तजिह्वो हव्यवाहन एव च। अश्वोदरजसंज्ञश्च स वैश्वानर एव च॥ कौमारतेजाश्च तथा विश्वदेवमुखाह्वयौ। स्युरष्टमूर्तयो दिक्षु अग्नयेपदपूर्विकाः॥ मध्येऽग्नावासने मध्ये पूजामण्डलतः प्रभुम्। आवाहयेद्रामचन्द्रं परिवारसमन्वितम्। मन्त्रन्यासं विधायास्मिन्प्राग्वन्मुद्राः प्रदर्शयेत्। गन्धपुष्पैर्धूपदीपैः साग्निं संपूजयेत्प्रभुम्॥ द्रवद्रव्यं स्रुवाभावे होतव्यं[1] मृगमुद्रया। नागवल्लीदलयुजा तुलसीगर्भयाथवा॥ प्राक्साज्यभागावाघारौ कुर्यादाज्यप्लुतं हविः। कवचेनावगुण्ठ्यैतदस्त्रेण परिरक्षयेत्॥ संप्रोक्ष्य मूलमन्त्रेणाभिमन्त्र्य जुहुयात्[2]ततः। सशक्तिबीजं मन्त्रेशं जप्त्वा स्वाहां वदेत्ततः॥ मन्त्रान्त आहुतिक्षेपस्त्यागः सर्वाहुतिष्वपि। षोडशाहुतिभिर्देवं यजेदादौ सशक्तिकम्॥ द्वारपीठाङ्गदेवेभ्य एकैकामाहुतिं ततः। गणेशाद्याश्च द्वात्रिंशद्भवन्ति द्वारदेवताः॥ अष्टचत्वारिंशत्पीठदेवताश्च मण्डूकादयः। अष्टादशशतं देवा भवन्ति हृदयादयः॥ सर्वेऽष्टनवत्यधिकशतं देवाः प्रकीर्तिताः॥ गणेशाय सवित्रे च महेशाय ह्रियै तथा। चतुर्णामाहुतीर्दत्त्वा ततो ब्रह्मार्पणाहुतिः॥ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः। जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना च यत्कृतं यत्स्मृतं

---

१ जुहुयान्मृगमुद्रया। २ जुहुयाद्बुधः।

Scanned with CamScanner

तत्सर्वं ब्रह्मार्पणं भवतु ॐ भूर्भुवः स्वः स्वाहा । ब्रह्मण इदं नमम ॥ मूलमुच्चार्य साङ्गाय सायुधाय सवाहनाय सावरणाय सशक्तिकाय श्रीसीतापतये स्वाहा श्रीरामायेदं नमम ॥ इति पूर्णाहुतिं हुत्वा कृत्वा परिसमूहनम् । त्र्यायुषं जमदग्नेरिति मन्त्रेण भस्म धारयेत् ॥ हवनस्य पूर्णतायै सप्तकृत्वोऽभिमन्त्रितैः । आत्मानमभिषिञ्चेत्तु सदूर्वैस्तुलसीदलैः॥ विकीर्य पुष्पाञ्जलिसिद्धभावः कुर्यात्प्रणामं हुतभुङ्मुखाय । उद्वास्य वह्नेस्त्रिदशाधिपेशं बलिं हरेद्भैरवयोगिनीभ्यः ॥ नित्यहोमे भवत्येवमाहुतीनां शतद्वयम् । विंशत्यधिकमङ्गानां त्रिस्थानामाहुतित्रयम् ॥ इति नित्यहोमः ॥

अथ तर्पणाभिषेकादिः ॥ जपस्याथ दशांशेन हुनेदाज्यप्लुतं हविः । तद्दशांशेन मूलेन पुष्पगन्धयुतैर्जलैः ॥ साङ्गं रामं तर्पयामीत्येवं संतर्पयेद्विभुम्[1] । तद्दशांशेन तत्तोयैः सप्तकृत्वोऽभिमन्त्रितैः । [आत्मानमभिषिञ्चेत्के सदूर्वैस्तुलसीदलैः ॥ इति तर्पणाभिषेकौ ॥

अथ बलिप्रदानम् ॥ ध्यात्वाऽऽनीतं[2] तु मूर्तौ तं श्रीरामं पीठमागतम् । मुख्यादीशानतः पात्रं नैवेद्यांशं समुद्धरेत् ॥ [शतांशं वा सहस्रांशमन्यथा निष्फलं भवेत् ।] सर्वदेवस्वरूपाय पराय परमेष्ठिने । श्रीरामसेनायुक्ताय विष्वक्सेनाय ते नमः ॥ वामतो रामचन्द्रास्य तीर्थक्लिन्नं समर्पयेत् । गणेशे वक्रतुण्डाय सूर्ये चण्डांशवेऽर्पयेत् ॥ शक्तावुच्छिष्टचाण्डाल्यै शिवे चण्डेश्वराय च । इति बलिदानम् ॥

अथ प्रसादस्वीकारः ॥ महाप्रसाद इत्युक्त्वा ग्राह्यमञ्ज-

---

१ त्प्रभुम् । २ नियनमूर्तिं ।

Scanned with CamScanner

लिना बुधैः । पादोदकं च निर्माल्यं नैवेद्यं तु विशेषतः ॥ उच्छिष्टामृतसेवकान् जयजय स्वामिन्समालोकयेत्यौत्सुक्यान्वितरां स्वयं गृहधिया भृत्यान्पुरोवस्थितान् । विष्वक्सेनमुखान्प्रहस्य[1] परमप्रीत्या मुदा लालयन्वन्दे पङ्कजकर्णिकासुनिलयं[2] श्रीरामचन्द्रं परम् ॥ बह्वृचपरिशिष्टे—पवित्रं विष्णुनैवेद्यं सुरसिद्धर्षिभिः स्मृतम् । अन्यदेवस्य नैवेद्यं भुक्त्वा चान्द्रायणं चरेत् ॥ अग्राह्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलम् । शालग्रामशिलासङ्गात्सर्वं याति पवित्रताम् ॥ इति प्रसादस्वीकारः ॥

अथ प्रार्थना ॥ गाण्डूषिकं जलं दत्त्वा दद्यादाचमनं ततः । हस्तावासं सकर्पूरं मुकुटं भूषणानि च ॥ कुण्डलादीनि शङ्खादिदश मुद्राः प्रदर्शयेत् ॥ धनुर्बाणौ तथा वामकराग्रांशयुतं धनुः । प्रसार्य दक्षिणं मुक्ततर्जन्या बाण उच्यते ॥ लवङ्गजातीकङ्कोलं चूर्णं क्रमुकखादिरम् । कर्पूरं तुलसीपत्रं ताम्बूलं च समर्पयेत् ॥ आदर्शयेत्तथादर्शं कल्पयेच्छत्रचामरे । महानीराजनं श्रीमन्मङ्गलेशाय कल्पयेत् ॥ वैदिकं मन्त्रमुच्चार्य दद्यात्पुष्पाञ्जलिं ततः । स्तुत्वा देवं नमस्कुर्यात्प्रसीद भगवन्निति ॥ ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् । भृत्यार्तिहं प्रणतपालभवाब्धिपोतं वन्दे महापुरुष ते चरणारविन्दम् ॥ त्यक्त्वा सुरेप्सितसुदुस्त्यजराज्यलक्ष्मीं[3] धर्मिष्ठ आर्यवचसा यदगादरण्यम् । मायामृगं दयितयेप्सितमन्वधावद्वन्दे महापुरुष ते चरणारविन्दम् ॥ श्रीरामचन्द्र रघुपुङ्गव राजवर्य राजेन्द्र राम रघुनायक राघवेश । राजाधिराज रघुनन्दन रामभद्र दासोऽहमद्य भवतः

---

१ न्हसन्तमभिवीक्ष्योक्तान्मुदा । २ निलयिनं । ३ सुदुस्त्यजसुरेप्सित ।

Scanned with CamScanner

शरणागतोऽस्मि[1] ॥ यस्यामलं नृपसदःसु यशोऽधुनापि गायन्त्य-घघ्नमृषयो दिगिभेन्द्रपट्टम् । तन्नाकपालवसुपालकिरीटजुष्टं पादाम्बुजं रघुपतेः शरणं प्रपद्ये ॥ इति प्रार्थना ॥

अथ प्रणामः ॥ नमो ब्रह्मण्यदेवाय रामायाकुण्ठमेधसे । उत्तमश्लोकधुर्याय न्यस्तदण्डार्पिताङ्घ्रये॥ इन्दीवरदलश्यामो रामो राजीवलोचनः । वर्तते मानसे यस्यास्तां सीतां प्रणमाम्यहम् ॥ दोर्भ्यां पद्भ्यां च जानुभ्यामुरसा शिरसा दृशा । मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः ॥ बाहुभ्यां च सजानुभ्यां शिरसा वचसा धिया । पञ्चाङ्गकः प्रणामः स्यात्पूजासु प्रवराविमौ ॥ इति दण्डवत्प्रणामः ॥

अथ प्रदक्षिणा ॥ ततः प्रदक्षिणां कुर्याद्राघवस्य जय-स्वनैः । सप्तद्वीपधरादानपुण्यं विद्धि पदे पदे ॥ प्रदक्षिणं तु यः कुर्याद्धरेर्भक्त्या समन्वितः । हंसयुक्तविमानेन विष्णुलोकं स गच्छति॥ एकहस्तप्रणामं च एकं चापि प्रदक्षिणम् । अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम् ॥ एका चण्ड्यां रवौ सप्त तिस्रो दद्याद्विनायके । चतस्रः केशवे दद्याच्छिवस्यार्धां प्रदक्षिणाम् ॥ इति प्रदक्षिणाः ॥

अथ स्तुतिः ॥ ततः—स्तुतौ शस्ता महामन्त्राः श्रुत्युक्ता अमृतप्रदाः ॥ अथ हैनं भरद्वाजो याज्ञवल्क्यमुवाचाथ कैर्मन्त्रैः स्तुतः श्रीरामः प्रीतो भवति स्वात्मानं दर्शयति तन्नो ब्रूहि भग-वन्निति । स होवाच याज्ञवाल्क्यः श्रीरामेणैवं शिक्षितो ब्रह्मा पुनरेतया गाथया नमस्करोति—विश्वाधारं[2] महाविष्णुं नारायण-

---

१ शरणं गतोस्मि । २ विश्वेश्वरं ।

Scanned with CamScanner

मनामयम् । पूर्णानन्दैकविज्ञानं परं ज्योतिःस्वरूपिणम् ॥ मनसा संस्मरन्ब्रह्मा तुष्टाव परमेश्वरम् । ॐ यो वै श्रीरामचन्द्रः स भगवान् अद्वैतपरमानन्दात्मा यः परंब्रह्म भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ १ ॥ आद्यन्तौ सर्वत्र सदृशो ज्ञेयौ । ॐ यो वै श्रीरामचन्द्रः स भगवान् यश्चाखण्डैकरसात्मा भूर्भुवः स्वस्तस्मै वै नमो नमः २ । ॐ यो वै० परब्रह्मानन्दामृतं भू० ३ । ॐ योऽव्ययस्तारकं ब्रह्म भू० ४ । ॐ यो० ब्रह्माविष्णुरीश्वरो यः सर्वदेवात्मा भू० ५ । ॐ यो० ऽन्ये सर्वे वेदाः साङ्गाः सशाखाः सपुराणा भू० ६ । ॐ यो०ऽन्येपञ्चाग्नयो भू० ७ । ॐ यो०ऽन्याः सप्त व्याहृतयो[2] भू० ८ । ॐ यो० ऽन्यो जीवात्मा भू० ९ । ॐ यो० ऽन्यः सर्व भूतान्तरात्मा भू० १० । ॐ यो० ऽन्ये मत्स्यकूर्माद्यवतारा भू० ११ । ॐ यो० ऽन्यश्च प्राणो भू० १२ । ॐ यो० न्योऽन्तःकरणचतुष्टयात्मा भू० १३ । ॐ यो० ऽन्यानि पञ्चमहाभूतानि भू० १४ । ॐ यो० ऽन्यश्च कालो भू० १५ । ॐ यो० ऽन्यश्च मनुर्भू० १६ । ॐ यो० ऽन्यश्च यमो भू० १७ । ॐ यो० ऽन्यश्चान्तको भू० १८ । ॐ यो० ऽन्यश्च मृत्युर्भू० १९ । ॐ यो०ऽन्यश्चामृतं भू० २० । ॐ यो० ऽन्याविद्या भू० २१ । ॐ यो० ऽन्या सरस्वती भू० २२ । ॐ यो० ऽन्यालक्ष्मीर्भू० २३ । ॐ यो० ऽन्या गौरी भू० २४ । ॐ यो० ऽन्या जानकी भू० २५ । ॐ यो० ऽन्यश्च त्रैलोक्यं भू० २६ । ॐ यो० ऽन्यश्च सूर्यो भू० २७ । ॐ यो० ऽन्यः सोमो भू० २८ । ॐ यो० ऽन्यानि नक्षत्राणि भू० २९ । ॐ यो० ऽन्ये चाष्टौ लोकपाला भू० ३० । ॐ यो० ऽन्ये चाष्टौ वसवो

---

१ विष्णवीश्वरो यः । २ महाव्याहृतयः ।

Scanned with CamScanner

भू० ३१ । ॐ यो० ऽन्ये च नवग्रहा भू० ३२ । ॐ यो० ऽन्ये चैकादशरुद्रा भू० ३३ । ॐ यो० ऽन्ये च द्वादशादित्या भू० ३४ । ॐ यो० ऽन्यद्भूतं भव्यं भविष्यद्भू० ३५ । ॐ यो० ऽन्यो ब्रह्माण्डस्यान्तर्बहिर्व्याप्नोति यो विराट् भू० ३६ । ॐ यो० ऽन्यो हिरण्यगर्भो भू० ३७ । ॐ यो० ऽन्यश्च महादेवो भू० ३८ । ॐ यो० न्यश्च महेश्वरो भू० ३९ । ॐ यो० न्यश्चोङ्कारो भू० ४० । ॐ यो० ऽन्याश्चतस्रोऽर्धमात्रा भू० ४१ । ॐ यो० ऽन्यः प्रकृतिर्भू० ४२ । ॐ यो० ऽन्यः परमपुरुषो भू० ४३ । ॐ यो० ऽन्यश्च ॐ नमोभगवते वासुदेवाय यो महाविष्णुर्भू० ४४ । ॐ यो० ऽन्यो ज्ञानात्मा भू० ४५ । ॐ यो० ऽन्यः परमात्मा भू० ४६ । ॐ यो० ऽन्यः सर्वान्तरात्मा भू० ४७ । ॐ यो० ऽन्यः सच्चिदानन्दाद्वैतैकरसानन्दो[1] भू० ४८ । ॐ यो० ऽन्ये देवासुरमनुष्यादिभावास्थावरस्थावरजङ्गमात्मा इत्येतान्ब्रह्माब्रवीत्सप्तचत्वारिंशन्मन्त्रैर्नित्यं देवं स्तौति ततो देवः प्रीतो भवति स्वात्मानं दर्शयति तस्माद्यस्तैर्मन्त्रैर्नित्यं देवं स्तवीति स देवं पश्यति सोऽमृतत्वं गच्छतीति । इत्याथर्वणश्रीरामोत्तरतापनीये मन्त्रस्तुतिः ॥

अथ हनुमत्कृतस्तुतिः ॥ यद्वा हनुमता प्रोक्तं मन्त्रराजात्मकं स्तवम् । संप्रदायप्रदीपं यत्स्तुवीतैव रघूद्वहम् ॥ १ ॥ श्रीहनुमानुवाच ॥ तिरश्चामपि चाऽरातिसमवायं समेयुषाम् । यतः सुग्रीवमुख्यानां यस्तमुग्रं नमाम्यहम् ॥ २ ॥ सकृदेव प्रपन्नाय विशिष्टामैरयच्छ्रियम् । बिभीषणायाब्धितटे यस्तं वीरं नमाम्यहम् ॥ ३ ॥ यो महान्पूजितो व्यापी महान्वै करुणा-

---

१ रसात्माभू० । २ महाब्धेः ।

मृतम्। स्तुतं येन जटायोश्च महाविष्णुं नमाम्यहम् ॥ ४ ॥ तेजसाप्यायिता यस्य ज्वलन्ति ज्वलनादयः। प्रकाशते स्वतन्त्रो यस्तं ज्वलन्तं नमाम्यहम् ॥ ५ ॥ सर्वतोमुखता येन लीलया दर्शिता रणे। रक्षसां खरमुख्यानां तं वन्दे सर्वतोमुखम् ॥ ६ ॥ नृभावं यः प्रपन्नानां हिनस्ति च तथा नृषु। सिंहः सत्वेष्विवोत्कृष्टस्तं नृसिंहं नमाम्यहम् ॥ ७ ॥ यस्माद्बिभ्यति वातार्कज्वलनेन्द्राः समृत्यवः। भियं तनोति पापानां भीषणं तं नमाम्यहम् ॥ ८ ॥ परस्य योग्यतापेक्षारहितो नित्यमङ्गलम्। ददात्येव निजौदार्याद्यस्तं भद्रं नमाम्यहम् ॥ ९ ॥ यो मृत्युं निजदासानां नाशयत्यखिलेष्टदः। तत्रोदाहृतये व्याधो मृत्युमृत्युं नमाम्यहम् ॥ १० ॥ यत्पादपद्मप्रणतो भवत्युत्तमपूरुषः। तमजं सर्वदेवानां नमनीयं नमाम्यहम् ॥ ११ ॥ अहंभावं समुत्सृज्य दास्येनैव रघूत्तमम्। भजेऽहं प्रत्यहं रामं ससीतं सहलक्ष्मणम् ॥ १२ ॥ नित्यं श्रीरामभक्तस्य किंकरा यमकिंकराः। शिवमय्यो दिशस्तस्य सिद्धयस्तस्य दासिकाः ॥१३॥ इमं हनूमता प्रोक्तं मन्त्रराजात्मकं स्तवम्। पठत्यनुदिनं यस्तु स रामे भक्तिमान्भवेत् ॥ १४ ॥ इति श्रीहनुमत्प्रोक्तो मन्त्रराजात्मकः स्तवः ॥

अथ रामवल्लभासीतास्तोत्रम् ॥ नीलनीरजदलायतेक्षणां लक्ष्मणाग्रजभुजावलम्बनीम्। शुद्धिमिद्धदहने प्रदित्सतीं भावये मनसि रामवल्लभाम् ॥ १ ॥ स्वाङ्घ्रियत्रितदृशं कृशाङ्गिकामङ्गकान्तिपरिभूतहाटकाम्। ताटकारिपरुषोक्तिविक्लवां भावये मनसि रामवल्लभाम् ॥ २ ॥ कुन्तलाकुलकपोलमाननं

१ खरयोधानां।

राहुवक्त्रगसुधाकरद्युति । वाससा पिदधतीं ह्रियाकुलां भावये मनसि रामवल्लभाम् ॥ ३ ॥ कायवाङ्मनसगं यदि व्यधात्स्वप्नजागृतिषु राघवेतरम् । तद्दहाङ्गमिति पावकं यतीं भावये० ॥ ४ ॥ रामपादयुगुलं कलयन्तीं चेतसा सुरधुनीहतपापाम् । अम्बुनीव परुषेऽनले स्थितां भावये० ॥ ५ ॥ इन्द्ररुद्रधनदाम्बुपालकैः सद्विमानगणमास्थितैर्दिवि । पुष्पवर्षमनु संस्तुतशीलां भावये० ॥ ६ ॥ कालिमानमनले निरस्य सद्धामकामतनुनिर्जितहेमाम् । फुल्लनीरजनिभां हराननां भावये० ॥ ७ ॥ संचयैर्दिविसदां विमानगैर्विस्मयाकुलमनोभिरीक्षिताम् । तेजसा पिदधतीं सदोदितां भावये० ॥ ८ ॥ एतदष्टकमनिष्टहानिकृद्यः पठेदथ शृणोत्यहर्मुखे । अन्तरायरहितां तु मैथिली तस्य भूतिमतुलां प्रयच्छति ॥ ९ ॥ इति रामवल्लभासीतास्तोत्रम् ॥

अथ गीतनृत्यादि[1] ॥ स्तुत्वैवमायतैर्नृत्यगीताद्यैर्विभुमर्हयेत् । नृत्यवाद्यानि कुर्वीत द्विजदेवाग्नितुष्टये । न जीवनाय युञ्जीत विप्रः पापभिया क्वचित् । इति स्मृतेः ॥ वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः । तालज्ञश्चाप्रयत्नेन[2] मोक्षमार्गं स गच्छति ॥ इति संगीतशास्त्रे ॥ केशवाग्रे नृत्यगीतं न करोति हरेर्दिने । वह्निना किं न दग्धोऽसौ गतः किं न रसातलम् ॥ इति पुराणे ॥ कर्मण्यौपयिकत्वेन ब्राह्मणोऽन्य इति श्रुतेः । कारिकायामतः प्रोक्तं विप्रो गीते रमेदिति ॥ इति भारते ॥ यो नरो नृत्यगीते तु कुर्यात्स्वाभाविकेपि वा । स्वाभाविकेन भगवान्प्रीणातीत्याह शौनकः ॥ इति गीतनृत्यानि ॥

---

१ गीतनृत्यानि । २ श्वाप्रयासेन ।

Scanned with CamScanner

अथ प्रार्थना ॥ अथ पुष्पाञ्जलिं दत्त्वा कृत्वा तत्पादयोः शिरः । प्रार्थयेद्राघवं भक्त्या कपिमुद्रां प्रदर्शयेत् ॥ तर्जन्यग्रेऽङ्गुष्ठमूले कृत्वान्याङ्गुलियोजनम् । स्यात्संपुटितयोः पाण्योर्मुद्रा वानरसंज्ञिका ॥ त्वद्यात्रया सर्वगता हता ते ध्यानेन चेतःपरता हता ते । स्तुत्या मया वाक्परता हता ते क्षमस्व सर्वं मम देवदेव ॥ अज्ञानादथ वा ज्ञानादशुद्धं[1] यन्मया कृतम् । क्षन्तुमर्हसि तत्सर्वं दास्येनैव गृहाण माम् ॥ श्रीगोविन्द मुकुन्द केशव शिव श्रीवल्लभ श्रीनिधे श्रीवैकुण्ठ सुकण्ठ कुण्ठितखल स्वामिन्नकुण्ठोदय । शुद्धध्येय विधूतधूर्त धवल श्रीमाधवाऽधोक्षज श्रद्धाबद्ध विधेहि नस्त्वयि धियं धीरां धरित्रीधर ॥ त्वय्येव भक्तिं जनय त्वमेव मामुद्धरास्मात्कृपया भवाब्धेः । क्लिष्टं कृपालो न दयास्ति ते चेत्तर्हीश हा कर्मवशो हतोस्मि ॥ इति प्रार्थना ॥

अथ तीर्थग्रहणधारणम् ॥ देव देव जगन्नाथ शङ्खचक्रगदाधर । देहि राम ममानुज्ञां तव तीर्थनिषेवणे ॥ लब्ध्वानुज्ञां ततस्तीर्थे पात्रस्थे यत्रमालिखेत् । कुशैर्मूलं लिखित्वा च पठेन्मन्त्रमघापहम् ॥ अकालमृत्युहरणं सर्वव्याधिविनाशनम् । विष्णोः पादोदकं तीर्थं शिरसा धारयाम्यहम् ॥ ॐ चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि । तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम । लोकस्य द्वारमर्चिमत्पवित्रं ज्योतिष्मद्राजमानं महस्वत् । अमृतस्य धारा बहुधा दोहमानं । चरणं नो लोके सुधितां दधातु ॥ इति श्रुतिः ॥

---

१ दशुभं ।

इमं मन्त्रं समुच्चार्य सर्वदुष्टग्रहापहम् । प्राश्नीयात्प्रोक्षयेद्देहं पुत्र-मित्रपरिग्रहम् ॥ कृत्वा पादोदकं शङ्खे वैष्णवानां महात्मनाम् । तुलसीमिश्रितं दद्यात्पिबेन्मूर्ध्नाभिवन्दयेत् ॥ भगवत्पवित्रं भग-वत्पादोदकं पवित्रं तत्पाने अनाचमनीयं यथाहि सोमेष्विति श्रुतेः ॥ शालग्रामशिलातोयमपीत्वा यस्तु मस्तके । प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते ॥ विष्णोः पादोदकं पीतं कोटि-जन्माघनाशनम् । तदेवाष्टगुणं पापं भूमौ बिन्दुनिपातनात् ॥ हत्यां हन्ति सदाङ्घ्रिसङ्गतुलसी स्तेयं च तोयं पदोर्नैवेद्यं बहु-मद्यपानदुरितं गुर्वङ्गनासङ्गजम् । श्रीशाधीनमिति स्थितिर्हरि-जनैस्तत्सङ्गजं किल्बिषं शालग्रामशिला नृसिंहमहिमा कोप्येष लोकोत्तरः । इति तीर्थधारणम् ॥

अथ तुलस्यर्चा ॥ तुलस्यां मापतिं राममर्चयित्वा यथा-विधि । या दृष्टा निखिलाघसङ्घशमनी स्पृष्टा वपुःपावनी रोगा-णामभिवन्दिता निरसिनी सिक्तान्तकत्रासिनी । प्रत्यासत्तिवि-धायिनी भगवतः कृष्णस्य संरोपिता न्यस्ता तच्चरणे विमुक्ति-फलदा तस्यै तुलस्यै नमः ॥ इति नत्वागत्य देवमपराधान्क्षमा-पयेत् । इति तुलस्यर्चा ॥

अथापराधक्षमापनम् ॥ यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे । देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः ॥ उच्छिष्टे चैव चाशौचे भगवद्वन्दनादिकम् । एकहस्तप्रणामश्च तत्पुरस्ता-त्प्रदक्षिणम् ॥ पादप्रसारणं चाग्रे तथा पर्यङ्कबन्धनम् । शयनं भक्षणं वापि मिथ्या भाषणमेव च ॥ उच्चैर्भाषा मिथो जल्पो रोदनानि च विग्रहः । निग्रहानुग्रहौ चैव स्त्रीषु च क्रूरभाष-

Scanned with CamScanner

णम् ॥ कम्बलावरणं चैव परनिन्दा परस्तुतिः । अक्लिष्टभाषणं[1] चैव अधोवायुविमोक्षणम्[2] ॥ शक्तौ गौणोपचारश्च अनिवेदित-भक्षणम् । तत्तत्कालोद्भवानां च फलादीनामनर्पणम् ॥ विनि-युक्तावशिष्टस्य व्यञ्जनादेः प्रदानकम् । पृष्ठेकृत्वासनं[3] चैव पर-षामभिवादनम् ॥ गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा । अपराधास्तथा विष्णोर्द्वात्रिंशत्परिकीर्तिताः ॥ अपराधसह-स्राणि क्रियन्तेऽहर्निशं मया । दासोऽयमिति मां मत्वा क्षमस्व मधुसूदन ॥ इमं मन्त्रं समुच्चार्य प्रणमेद्दण्डवद्भुवि । अपराध-सहस्राणि क्षमते सर्वगो हरिः ॥ एकोपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः । दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥ इत्यपराधक्षमापनम् ॥

अथ कर्मार्पणम् ॥ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्या-त्मना वाऽनुसृतस्वभावात्[4] । करोति यद्यत्सकलं परस्मै नारा-यणायेति समर्पयेत्तत् ॥ साधु वाऽसाधु वा कर्म यद्यदाचरितं मया । तत्सर्वं भगवन्विष्णो गृहाणाराधनं परम् । इति शङ्खजलं दद्याद्देवस्य दक्षिणे करे ॥ गजास्यादित्यपञ्चास्यशक्तिसिंहास्य-रूपवान् । स मत्कृत्येन सर्वात्मा रामः प्रीणातु चिद्वपुः ॥ इति कर्मार्पणम् ॥

अथात्मार्पणम् ॥ सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् । सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः ॥ सोऽहं दासोऽहमिति वा बुद्धिर्यस्यामला दृढा । कर्मभिर्न स बध्येत ह्यकर्तृत्वाच्छिवेषुवत् ॥ त्वमेवाहमहं च त्वं सच्चिन्मात्र-

---

१ अश्लीलभाषणं । २ विसर्जनम् । ३ पृष्ठीकृत्यासनं । ४ प्रकृतस्वभावात् ।

Scanned with CamScanner

वपुर्धरः । आवयोरन्तरं भ्रान्तिर्नश्यत्वाज्ञाबलात्तव ॥ इत्यात्मार्पणम् ॥

अथ शेषग्रहणम् ॥ त्वयोपभुक्तस्रग्गन्धवासोलङ्कारचर्चिताः । उच्छिष्टभोजिनो दासास्तव मायां जयेमहि ॥ प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् । इति संप्रार्थ्य देवेशं दत्तां शेषां स्वके वहेत् ॥ महाप्रसाद इत्युक्त्वा परमप्रीतिपूर्वकम् । तच्छेषगन्धपुष्पाद्यैः सम्यगात्मानमर्हयेत् ॥ इति शेषग्रहणम् ॥

अथ विसर्जनम् ॥ ध्यात्वा रामं जपेन्मन्त्रं तिष्ठेद्यावन्मनो हृदि । गुह्यातिगुह्यमन्त्रेण राघवाय निवेदयेत् ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं रमापते । यत्पूजितं मया राम परिपूर्णं तदस्तु मे ॥ इति पुष्पाञ्जलिं दत्त्वा संहृत्यावरणान्हरौ । भक्त्या संशोधितं स्वान्तं विश विश्रामहेतवे ॥ प्रार्थ्यैवं पादुके दत्त्वा साङ्गमुद्वासयेद्धरिम् । प्राणायामं षडङ्गं च कृत्वा मुद्रां विसर्जनीम् ॥ अहं रामो न चान्योस्मि मन्त्रमेतमुदीरयेत् । इति विसर्जनम् ॥ आत्मानं सततं रामं संभाव्य विहरन्ति ये । न तेषां दुष्कृतं किंचिदुष्कृतोत्था न चापदः ॥ इति स्मृतिः ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्मुकुन्दवनश्रीचरणशिष्यानन्दवनविरचितायां श्रीरामार्चनचन्द्रिकायां तृतीयः पटलः ॥३॥

---

१ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ इति जपनिवेदनमन्त्रः ।

Scanned with CamScanner

चतुर्थः पटलः ४

अथ दिनषष्ठभागकृत्यम् ॥ षष्ठे दिनविभागेऽथ कुर्यात्पञ्च महामखान् । दैवो होमेन यज्ञः स्याद्भौतस्तु बलिदानतः ॥ पैत्रो विप्रान्नदानेन पैत्र्येण बलिनाथ वा । किंचिदन्नप्रदानाद्वा तर्पणाद्वा चतुर्विधः ॥ नृयज्ञोऽतिथिसत्काराद्धन्तकारेण वा पुनः । ब्रह्मयज्ञो वेदजपात्पुराणपठनेन वा ॥ इति षष्ठभागकृत्यं ॥

अथ दिनससमभागकृत्यम् ॥ इतिहासपुराणाभ्यामंशं सप्तमकं नयेत् । श्रीमद्भागवतं तत्र विशेषेणादरात्पठेत् ॥ यैर्न श्रुतं भागवतं पुराणं नाराधितो यैः पुरुषः पुराणः । हुतं मुखे नैव धरामराणां तेषां वृथा जन्म गतं नराणाम् ॥ चरितं रघुनाथस्य शतकोटिप्रविस्तरम् । एकैकमक्षरं पुंसां महापातकनाशनम् ॥ पाद्मे शिवराघवसंवादे–अन्तर्गतोपि वेदानां सर्वशास्त्रार्थवेद्यापि[1] । पुमानश्रुतपौराणो[2] न सम्यग्गतिमाप्नुयात्[3] ॥ वेदार्थादधिकं मन्ये पुराणार्थं च भामिनि । पुराणमन्यथा कृत्वा तिर्यग्योनिमवाप्नुयात् ॥ न यत्र वैकुण्ठकथासुधापगा न साधवो भागवतास्तदाश्रयाः । न यत्र यज्ञेशमखा महोत्सवाः सुरेन्द्रलोकोपि न चैव सेव्यताम् ॥ इति हरिकथादिना नेयो दिनसप्तमभागविधिः ॥

अथाष्टमभागकृत्यम् ॥ भागेऽष्टम उपासीत संध्यां श्रीराघवीं तथा । हुत्वाग्निहोत्रं विधिना ततो होमं समापयेत् ॥ इत्यष्टमभागकृत्यम् ॥

---

१ शास्त्रार्थविद्यदि । २ पुंसोऽश्रुतपुराणस्य । ३ गतिदर्शनम् ।

Scanned with CamScanner

अथ रात्रिप्रथमयामकृत्यम् ॥ तत्र शयनोपासना। न्यासं षडङ्गं कृत्वा प्राणायामपुरःसरम्। सकृदभ्यर्च्य नीराज्य प्रार्थयेज्जानकीपतिम् ॥ बलीयसापदा स्वामिन्पदवीमवधारय[1]। आगच्छ शयनागारं सीतया सह राघव ॥ पर्यङ्के तिलके प्रशस्तफलके भोगीन्द्रचित्राङ्गके स्वच्छप्रच्छदभानुके मृदुशिरःस्थानोपधानादिके ॥ उन्मीलत्कुलशीलया दयितया श्रीसीतया सत्कृते शेते नित्यमगण्यपुण्यफलदः श्रीकोसलेन्द्रो नृपः ॥ इति शयनोपासना ॥

अथ प्राणाग्निहोत्रम् ॥ सायं प्रातर्द्विजातीनां श्रुत्युक्तमशनं खलु। उच्यते रामसंतुष्ट्यै अग्निहोत्रसमं प्रिये ॥ आर्द्रपादः शुचिर्भूत्वा अथाद्यात्[2] सघृतं शुभम्। उपवासात्परं हव्यं हव्यात्परमयाचितम् ॥ अयाचितात्परं नक्तं प्रियं देवस्य चक्रिणः। तस्मात्परेशसंतुष्ट्यै नरो[3] नक्तपरो भवेत् ॥ विष्णुभक्तो विशेषेण दिनपापापनुत्तये। अन्नं दृष्ट्वा तु प्रणमेन्नित्यमस्माकमस्त्विति ॥ तेजोसीति जपेन्मन्त्रं गायत्र्या तीर्थवारिणा। सत्यं त्वर्तेनेति मन्त्रैः प्रोक्षयेदन्नमादरात् ॥ धर्मराजाय चित्राय चित्रगुप्ताय वै बलिः। अश्नीयान्मन्त्रराजेन स्वन्नं सप्ताभिमन्त्रितम् ॥ तेजस्वी सुभगः श्रीमानरोगायुश्च जायते ॥ अन्नं ब्रह्मा रसो विष्णुर्भोक्ता देवो महेश्वरः। एवं ज्ञात्वा तु यो भुङ्क्ते सोऽन्नदोषैर्न लिप्यते ॥ अन्तश्चरसि भूतानां गुहायां विश्वतोमुखः। त्वं यज्ञस्त्वं वषट्कारस्त्वं विष्णोः परमं पदम् ॥ त्वयोपभुक्तस्रग्गन्धवासोलङ्कारचर्चिताः। उच्छिष्टभोजिनो दासास्तव मायां जयेमहि ॥ जपन्नेवं भगवतः श्रीतीर्थं तुलसीयुतम्। अमृतो-

---

१ मवधार्य च। २ अश्नीयात्। ३ विप्रो।

पस्तरणमसीत्यन्तेन प्राशयेद्बुधः ॥ मध्येन्द्रवरुणशशियमदिग्गतानि हृदि कुण्डानि-अन्वाहार्याहवनीयगार्हपत्यसभ्यावसथ्यानि ॥ गार्हपत्ये हुनेत्प्राणायस्वाहेति हिरण्यया। जुहुया प्राणाग्निहोत्रं स्वादनामाङ्गुष्ठतः क्रमात् ॥ अन्वाहार्ये ह्यपानाय स्वाहेति गगनस्रुचा। कनिष्ठाङ्गुष्ठयुग्मेन द्वितीयामाहुतिं हुनेत् ॥ व्यानायाहवनीयेऽग्नौ रक्तवर्णस्रुचा सुधीः। मध्यमाङ्गुष्ठयुग्मेन तृतीयामाहुतिं हुनेत् ॥ सभ्ये तूदानसंज्ञाय कृष्णवर्णस्रुचा तथा। तर्जन्यङ्गुष्ठयुग्मेन चतुर्थीमाहुतिं हुनेत् ॥ आवसथ्ये समानाय सुप्रभावर्णया स्रुचा। जुहुयादङ्गुलीभिस्तु सर्वाभिः पञ्चमाहुतिम् ॥ नैवेद्यशेषं तुलसीविमिश्रं विशेषतः पादजलेन विष्णोः। योऽश्नाति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यम् ॥ प्रतिविद्धं च नाश्नीयात्पवित्रमपि नावृतम्। तथाच स्कान्दे-संध्ययोरुभयोर्जाप्ये भोजने दन्तधावने। पितृकार्येषु दैवे च तथा मूत्रपुरीषयोः। गुरूणां संनिधौ दाने स्नाने चैव विशेषतः। एषु मौनं समातिष्ठन्स्वर्गं प्राप्नोति मानवः। हस्तादृतेऽम्बुनान्येन नाश्नन्पात्राद्दते पिबेत् ॥ दक्षिणं तु परित्यज्य वामे नीरं निधापयेत्। अभोज्यं तद्भवेदन्नं पानीयं च सुरासमम् ॥ तृप्तो दद्यादन्नशेषं भूमौ दुर्गततृप्तये ॥ यत्र क्वचनसंस्थानां क्षुत्तृषोपहतात्मनाम्। दुर्गतानां मया दत्तमक्षय्यमुपतिष्ठतु ॥ अमृतापिधानमसीति पिदध्यात्तीर्थवारिणा। अर्धं तदम्बु भूभागे दद्याद्दुर्गततृप्तये ॥ सम्यगाचम्य दक्षाङ्ग्रेरङ्गुष्ठे वारि निक्षिपेत् ॥ अङ्गुष्ठमात्रः पुरुषो ह्यङ्गुष्ठं च समाश्रितः।

---

१ ह्यग्रतः। २ रक्तया च स्रुचा। ३ युतपुण्यकोटिं।

ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वभुक् ॥ ततः संस्मृत्य संतुष्टः पुष्टिदामिष्टदेवताम् । संनिकृष्टैर्वृतः शिष्यैर्जपेदन्नपतेर्मनुम् ॥ अन्नपतेऽन्नस्य नो देहीत्यादिर्मनुः ॥ अगस्तिरग्निर्वडवानलश्च भुक्तं मयान्नं जरयत्वशेषम् । सुखं ममैतत्परिणामसंभवं ददात्वरोगं च सदायुरस्तु मे ॥ विष्णुः समस्तेन्द्रियदेहदेही प्रधानभूतो भगवान्यथैकः । सत्येन तेनान्नमशेषमेतदारोग्यदं मे परिणाममस्तु ॥ भक्षयेदथ ताम्बूलं प्रसादाज्जानकीपतेः । शिष्टैरिष्टैर्जपेद्दिव्यं भगवन्नाममङ्गलम् ॥ इति प्राणाग्निहोत्रम् ॥

अथ शयनविधिः ॥ मृद्भिः शौचविधिं विधाय चरणौ प्रक्षाल्य चोपस्पृशेद्भिःसंस्मृत्य जगत्पतिं कुलपतिं श्रीकोसलेन्द्रं नृपम् । प्रेयस्या निमिषं पिबन्प्रियसुधाधारायमाणं गिरां वस्त्रेणाङ्घ्रियुगं प्रमृज्य शयनं चासाद्य सद्यः स्वपेत् ॥ रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरम् । शयने यः स्मरेन्नित्यं स दुःस्वप्नं न पश्यति ॥ मूलं स्मृत्वा जपेद्रामरक्षां विघ्नोपशान्तये । गुर्वर्थेति पुनः पद्यं स्त्रियाऽव्यग्रं स्वपेत्सुखम् ॥ स्कान्दे—पाद्मे काशीखण्डे च—ऋतुकालाभिगामी च स्वदारनिरतश्च यः । सर्वदा स ब्रह्मचारी विज्ञेयः सद्गृहाश्रमी ॥ ऋतुः षोडशयामिन्यश्चतस्रस्तासु गर्हिताः । पुत्रास्तास्वपि या युग्मा अयुग्माः कन्यकाप्रदाः ॥ त्यक्त्वा चन्द्रमसं दुःस्थं मघां मूलं च रेवतीम् । शुचिः सन्निविशेत्पत्नीं पुंनामर्क्षे विशेषतः ॥ शुचिं पुत्रं प्रसूयेत पुरुषार्थप्रसाधकम् ॥ इत्यादिमन्वादिमुनिप्रणीतशास्त्रप्रणीते पथि वर्तमानः । न बाध्यते निर्मितकर्मतन्त्रैः श्रीरामचन्द्रस्य पदं समेति ॥ इति शयनविधिः ॥ इति रात्रिप्रथमभागकृत्यम् ॥

---

१ कृत्स्नस्य । २ स्त्रिया सार्धं । ३ स सदा ब्रह्मचारीह । ४ मूलं विहाय च ।

अथ पुरश्चरणविधिः ॥ तत्रादौ पूर्वकृत्यम् ॥ अथास्य मन्त्रराजस्य पुरश्चरणमुच्यते । विना येन न सिद्धः स्यान्मन्त्रो वर्षशतैरपि ॥ भक्तिश्रद्धेष्टदानादिचिरोपास्तिप्रसादितात् । गुरोर्मन्त्रवरं लब्ध्वा सर्वाभीष्टप्रदं बुधः ॥ पूर्ववत्पूजयेन्नित्यं जपेच्च नियतव्रतः । षट्सहस्रं सहस्रं वा शतं वाष्टोत्तरं शुचिः ॥ एवमाराधितो रामो यदा भक्तं प्रबोधयेत् । पुरश्चरणकृत्याय पूर्वसेवा विधीयते[1] ॥ यथाशक्ति नियम्यान्तर्बहिरात्मानमात्मवित् । पुरश्चरणवत्सर्वं कुर्याद्धोमं विहाय तत् ॥ इति पूर्वकृत्यम् ॥

अथ पुरश्चरणस्थानानि ॥ ततः संकल्प्य कुर्वीत पुरश्चरणमादरात् । चिरं निरन्तरेणैव नियतात्मा दृढव्रतः ॥ शैलाग्रे जलमध्ये वा तीरे वा लवणाम्बुधेः । नदीतटेऽश्वत्थमूले रम्ये बिल्ववनान्तरे ॥ प्रत्यङ्मुखशिवस्थाने वृषलादिविवर्जिते[2] । अश्वत्थबिल्वतुलसीवने पुष्पान्तरावृते ॥ गवां गोष्ठेषु तीर्थेषु पुण्यक्षेत्रेषु शस्यते ॥ इति पुरश्चरणस्थानानि ॥

अथ भक्ष्याभक्ष्यनियमः ॥ वैदिकाचारयुक्तानां शुचीनां श्रीमतां सताम् । सत्कुलस्थानजातानां भिक्षा स्यादग्रजन्मनाम् ॥ भुञ्जानो वा हविष्यान्नं शाकं यावकमेव वा । पयो मूलं फलं वापि यत्र यत्रोपपद्यते ॥ गौतमीये–भक्ष्यं मूलं फलं क्षीरं दधि भिक्षान्नसक्तवः । शाकं चाष्टविधं चान्नं साधकस्योच्यते[3] बुधैः ॥ इति भक्ष्यनियमः ॥

अथ वर्ज्यानि ॥ लवणं पललं चैव क्षारं क्षौद्रं रसान्तरम् । माषमुद्गमसूराद्यान्कोद्रवांश्चणकानपि ॥ असद्भाषणमन्यान्नं वर्ज-

---

१ विधीयतां । २ वृषभादि । ३ चरुं मूलं ।

Scanned with CamScanner

येदन्यपूजनम् । विनाश्रमोचितं[1] नित्यं तथा नैमित्तिकं च यत् ॥ स्त्रीशूद्रपतितव्रात्यनास्तिकोच्छिष्टभाषणम् । असभ्यभाषणं जैह्म्य-भाषणं परिवर्जयेत् ॥ सभ्यैरपि[2] न भाषेत जपहोमार्चनादिषु । वाङ्मनःकर्मभिर्नित्यं निःस्पृहो वनितादिषु ॥ वर्जयेद्गीत[3]-काव्यादि श्रवणं नृत्यदर्शनम् । ताम्बूलं गन्धलेपं च पुष्प-धारणमेव च ॥ मैथुनं तत्कथालापं तद्गोष्ठीः परिवर्जयेत् । कौटिल्यं क्षौद्रमभ्यङ्गमनिवेदितभोजनम् ॥ असंकल्पितकृत्यं च वर्जयेन्मर्दनादिकम् । त्यजेदुष्णोदकस्नानं सुगन्धामलकादिकम् ॥ इति वर्ज्यानि ॥

अथ स्ननानियमाः ॥ स्नायाच्च पञ्चगव्येन केवलामलकेन न । श्रुतिस्मृतिपुराणोक्तमन्त्रैः स्नायादनन्तरम् । [शिरोङ्गं पञ्च-गव्येन पावयेद्बहिरन्तरम् ।] शक्तौ त्रिषवणस्नानमन्यथा सकृ-दाचरेत् ॥ इति स्ननानियमाः ॥

अथ दीपस्थापने कूर्मचक्रम् ॥ वर्तुलं नवकोष्ठं तत्कृत्वा कूर्माकृतिं लिखेत् । स्वरयुग्मं क्रमेणैव ऐन्द्र्याद्यष्टस्तु दिक्षु च ॥ कादीन्वर्णान्क्षमीशान्यां तथा मध्ये स्थलाधिपम् । तन्नामाद्यक्षरं यत्र कूर्मास्यं तच्च दीपकम् ॥ तत्पार्श्वकोष्ठे हस्तौ द्वावधोधः कुक्षिपादकौ । शेषकोष्ठं भवेत्पुच्छं मुखे सिद्धिरनुत्तमा ॥ कर-स्थाने महाक्लेशः कुक्षौ दुःखमवाप्नुयात् । पदोर्हानिस्तथा पुच्छे पीडा स्याद्बन्धनादिभिः ॥ मोक्षार्थी वदने कुर्याद्दक्षिणे स्वाभि-चारिकम् । श्रीकामः पश्चिमे भूत्वा उत्तरे शान्तिदं भवेत् ॥ ईशाने शत्रुनाशः स्यादाग्नेये शत्रुदायकम् । नैर्ऋत्यां शत्रुभीतिः

---

१ चितं कर्माथवा । २ सत्यमपि । ३ गीतवाद्यादि ।

Scanned with CamScanner

स्याद्वायव्ये तु पलायनम् ॥ ग्रामे वा विपिने वापि यत्रकुत्रावलोकयेत् । दीपस्थाने जपं कुर्यात्सर्वकार्यमभीप्सुभिः ॥ कूर्मचक्रमविज्ञाय यः कुर्याज्जपयज्ञकम् । तस्य जाप्यफलं नास्ति सर्वानर्थाय कल्पते ॥ इति कूर्मचक्रम् ॥

अथ पुरश्चरणे आसनानि ॥ कुशाजिनाम्बरेणाद्यं कल्पयेदासनं बुधः । स्वस्तिकादिक्रमेणाथ विशेत्तत्र निराकुलः ॥ स्तम्भने गजचर्माथ मारणं माहिषं तथा । मेषचर्म[1] तथोच्चाटे खड्गजं वश्यकर्मणि ॥ विद्वेषं जाम्बुकं प्रोक्तं भवेद्रोचर्म शान्तिके । सर्वसिद्ध्यै व्याघ्रचर्म ज्ञानसिद्ध्यै मृगाजिनम् ॥ वस्त्रासनं रोगहरं वेत्रजे विपुलाः श्रियः । कौशेयं पौष्टिके कार्यं कम्बलं दुःखमोचनम् ॥ वंशासने च दारिद्र्यं दौर्भाग्यं दारुकासने । धरण्यां दुःखसंभूतिः पाषाणे दुःखसंभवः ॥ तृणासने यशोहानिरेतत्साधारणे जपे ॥ इत्यासनानि ॥

अथ जपमालालक्षणम् ॥ रुद्राक्षशङ्खपद्माक्षपुत्रजीवकमौक्तिकैः । स्फाटिकैर्मणिभी रत्नैः सौवर्णैर्विद्रुमैस्तथा ॥ कुशैः पर्वैर्द्वादश स्युर्गृहस्थस्याक्षमालिकाः । अङ्गुलीगणनादेकं रेखयाष्टगुणं भवेत् ॥ पुत्रजीवैर्दशगुणं शतं शङ्खैः सहस्रकम् । प्रवालैर्मणिरत्नैश्च दशसाहस्रकं स्मृतम् ॥ तदेव स्फाटिकैः प्रोक्तं मौक्तिकैर्लक्षमुच्यते । पद्माक्षैर्दशलक्षं स्यात्सौवर्णैः कोटिरुच्यते ॥ कुशग्रन्थ्या कोटिशतं रुद्राक्षैः स्यादनन्तकम् ॥ तुलसीकाष्ठघटितैर्मणिभिर्जपमालिका । सर्वकर्मणि सर्वेषामीप्सितार्थफलप्रदा ॥ अष्टोत्तरशतैर्माला पञ्चाशच्चतुराधिकैः । सप्तविंशतिभिः

---

१ मेषीचर्म ।

कार्या सर्वसाधारणे जपे ॥ मोक्षार्थी पञ्चविंशत्या धनार्थी त्रिंशता जपेत् । पुष्ट्यर्थी सप्तविंशत्या पञ्चदश्याभिचारिके ॥ अनुलोमविलोमार्णैर्मातृकायाः सबिन्दुकैः । समेरुकैः साष्टवर्गैर्माला स्याद्योगिनां शुभा ॥ गोपुच्छसदृशी कार्या एकग्रीवा समेरुका । मुखं मुखेन संयोज्य पुच्छं पुच्छेन योजयेत् ॥ प्रोतव्या सितरक्ताद्यैः सूत्रैस्तत्कर्मसिद्धये ॥ इति जपमालाप्रकारः ॥

अथ जपमालासंस्कारः ॥ जपमालां विधायेत्थं ततः संस्कारमारभेत् ॥ क्षालयेत्पञ्चगव्यैस्तां सद्योजातेन[1] तज्जलैः ॥ चन्दनागरुगन्धाद्यैर्वामदेवेन[2] घर्षयेत् । धूपयेत्तामघोरेण[3] लिम्पेत्तत्पुरुषेण तु ॥ मन्त्रयेत्पञ्चमेनैव प्रत्येकं तु शतंशतम् । मेरुं च पञ्चमेनैव तथा मन्त्रेण मन्त्रयेत् ॥ येन प्रतिष्ठिता माला तमेव तु मनुं जपेत् । अन्यमन्त्रजपाद्विद्धा न कार्या कर्हिचिद्बुधैः ॥ न स्पृशेद्वामहस्तेन करभ्रष्टां न कारयेत् । अङ्गुष्ठं मोक्षदं विद्यात्तर्जनी शत्रुनाशिनी ॥ मध्यमा धनसिद्ध्यै स्याच्छान्तिकर्मण्यनामिका । कनिष्ठाकर्षणे ज्ञेया जपकर्मणि सिद्धिदा ॥ अङ्गुष्ठेन विना कर्म कृतं तदफलं भवेत् । तर्जन्या न स्पृशेत्सूत्रं कम्पयेन्नो विधूनयेत् ॥ अङ्गुष्ठपर्वमध्यस्थं परिवर्तं समाचरेत् ।

---

१ ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमोनमः । भवेभवे नातिभवे भवस्व मां भवोद्भवाय नमः ॥ २ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥ ३ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ ४ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ ५ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

Scanned with CamScanner

आरभ्यानामिकामूलात्प्रादक्षिण्येन वै क्रमात् ॥ मध्यमामूल-पर्यन्तं जपेद्दशसु पर्वसु ॥ इति जपमालालक्षणविधिः ॥

अथ जपलक्षणम् ॥ जपः स्यादक्षरावृत्तिर्वाचिकोपांशु-मानसः। य उच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः ॥ मन्त्र-मुच्चारयेद्वाचा जपयज्ञः स वाचिकः। शनैरुच्चारयेन्मन्त्रमीषदोष्ठं प्रचालयेत् ॥ किंचिच्छ्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः। धिया यदक्षरश्रेणीं वर्णस्वरपदात्मिकाम् ॥ उच्चरेदर्थसंस्मृत्या स उक्तो मानसो जपः। उच्चैर्जपाद्विशिष्टः स्यादुपांशुर्दशभि-र्गुणैः ॥ जिह्वाजपः शतगुणः सहस्रो मानसः स्मृतः। पशु-भावे स्थिता मन्त्राः केवला वर्णरूपिणः। सुषुम्णाध्वन्युच्चरिताः प्रबोधं प्राप्नुवन्ति ते ॥ एकस्य मन्त्रनाथस्याप्यन्तर्बाह्योदितस्य वा। यदेकं तं जपं विद्धि लक्षसंख्याविधिं मुने ॥ मन्त्राक्षराणि मणिवच्छक्तौ प्रोतानि भावयेत्। तामेव च परे व्योम्नि परमा-मृतबृंहिताम् ॥ दर्शयत्यात्मसद्भावं पूजाहोमं विनापि सः। न दोषो मानसे जाप्ये सर्वदेशेऽपि सर्वदा ॥ जपनिष्ठो द्विजश्रेष्ठः सर्वयज्ञफलं लभेत्। सर्वेषामेव यज्ञानां जपयज्ञः प्रशस्यते ॥ अहिंसया हि भूतानां जायतेऽसौ महाफलः। यज्ञानां जप-यज्ञोऽहमित्याह भगवान्हरिः ॥ पद्मनाभीये—यावन्तः कर्म-यज्ञाः स्युः प्रदीप्तानि तपांसि च। सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ॥ जपेन देवता नित्यं स्तूयमाना प्रसीदति। प्रसन्ना विपुलान्भोगान्ददान्मुक्तिं च शाश्वतीम् ॥ इति ॥ मानसः सिद्धिकामानां पुष्टिकामैरुपांशुकः। वाचिको मारणे

---

१ स उच्चोपांशु। २ च। स स्मृतो। ३ सौषुम्नेऽध्वन्युच्चरिताः प्रभुत्वं।

चैव प्रशस्तो जप ईरितः ॥ मन्त्रदेवप्रकाशिकायाम्—सूर्यस्याग्रे गुरोरिन्दोर्दीपस्य च जलस्य च । विप्राणां च गवां चैव सन्निधौ संमुखो जपेत् ॥ मन्त्रार्णवे—मनःसंहरणं शौचं मौनं मन्त्रार्थचिन्तनम् । अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः ॥ उष्णीषी कञ्चुकी नग्नो मुक्तकेशो मलावृतः । अपवित्रकरोऽशुद्धः प्रलपन्न जपेत्क्वचित् ॥ अप्रावृतकरौ कृत्वा शिरसा प्रावृतोपि च । चिन्ताव्याकुलचित्तो वा क्रुद्धो भ्रान्तः क्षुधान्वितः ॥ अनासनः शयानो वा गच्छन्नुच्छिष्ट एव वा । रथ्यायामशिवस्थाने न जपेत्तिमिरान्तरे ॥ उपानद्गूढपादो वा शय्यायां च गतस्तथा । प्रसार्य न जपेत्पादौ कुक्कुटासन एव च ॥ पतितानामन्त्यजानां दर्शने भाषणे श्रुते । क्षुतेऽधोवायुगमने जृम्भणे जपमुत्सृजेत् ॥ प्राप्तावाचम्य चैतेषां प्राणायामं षडङ्गकम् । कृत्वा सम्यग्जपेच्छेषं यद्वा सूर्यादिदर्शनम् ॥ मार्जारं कुक्कुटं क्रौञ्चं श्वानं शूद्रं खरं कपिम् । दृष्ट्वाचम्याचरेत्कर्म स्पृष्ट्वा स्नानं विधीयते ॥ अशुचिर्वा शुचिर्वापि गच्छंस्तिष्ठन्स्वपन्नपि । मन्त्रैकशरणो विद्वान्मनसैव सदाभ्यसेत् ॥ गृहे जपः समः प्रोक्तो गोष्ठे शतगुणः स्मृतः । आरामे च तथारण्ये सहस्रगुण उच्यते ॥ अयुतं पर्वते पुण्ये नद्यां दशगुणं तु तत् । कोटिं देवालये प्राहुरनन्तं शिवसन्निधौ ॥ शक्तश्चेत्सर्वमेवैतदशक्तः शक्तितो जपेत् । निष्कामो वाप्यभक्तो वा निषेधविधिगोचरः ॥ तथा चोक्तं श्रीमद्भागवते—तावत्कर्माणि कुर्वीत न निर्विद्येत यावता । मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥ सुतरां राममन्त्रोऽयं संस्कृतिं नेच्छति क्वचित् । रसनास्पृक्फलत्येव पावकोऽसंस्कृतो यथा ॥ इति जपलक्षणम् ॥

Scanned with CamScanner

अथ पुरश्चरणविधिः ॥ जपेच्च नियतो नित्यं त्रिकालं पुरुषोत्तमम् । अर्चयन्नेव चाव्यग्रो यावत्षड्लक्षमादितः ॥ तर्पयेच्च विधानेन दशांशं शुद्धवारिणा । पुष्पाक्षतादियुक्तेन जलं संपूज्य पूर्ववत् ॥ ततो बिल्वफलैः पुष्पैः पत्रैरपि हुताशने । पूर्वोक्तेन प्रकारेण राममावाह्य पूजयेत् ॥ मधुरत्रयसंयुक्तैः पद्मैर्वा पायसेन वा । तिलैर्वान्यतमैरेषां ब्राह्मणान्भोजयेत्ततः ॥ पूजा त्रैकालिकी नित्यं जपस्तर्पणमेव च । होमो ब्राह्मणभुक्तिश्च पुरश्चरणमुच्यते ॥ गुरोर्लब्धस्य मन्त्रस्य प्रसन्नाच्च यथाविधि । पञ्चाङ्गोपासनं सिद्धेः पुरश्चैतद्विधीयते ॥ निष्कामानामनेनैव साक्षात्कारो भवेदपि । अर्थसिद्धिः सकामानां सर्वं तन्निष्फलं न चेत् ॥ पञ्चाङ्गमेतत्कुर्वीत यः पुरश्चरणं बुधः । स वै विजयते लोके विद्यैश्वर्यसुतादिभिः ॥ आदावन्ते च मध्ये च ब्राह्मणान्भोजयेद्बहून् । दिने दिने यथाशक्त्या राममुद्दिश्य भक्तितः ॥ सुभोजितेषु विप्रेषु तत्साङ्गं सकलं भवेत् । संसारे दुःखभूयिष्ठे य इच्छेत्सुखमात्मनः ॥ पञ्चाङ्गोपासनेनैव रामं संपूज्य भक्तितः[1] । पञ्चाङ्गोपासनं भक्त्या पुरश्चरणमुच्यते ॥ एतद्धि विदुषां श्रेष्ठं संसारोच्छेदकारणम् ॥ नानेन सदृशो धर्मो नानेन सदृशं तपः । नेदृशं साधनं किंचिदिष्टार्थस्य तपो धनम् ॥ इति पुरश्चरणम् ॥

होमप्रतिनिधिः ॥ यदि होमे स्वशक्तः स्यात्पूजायां तर्पणेथ वा । तावत्संख्यजपेनैव ब्राह्मणाराधनेन च । भवेदङ्गद्वयेनैव पुरश्चरणमार्जनैः ॥ यद्यदङ्गं विहीनं[2] च तत्संख्याद्विगुणो जपः । कर्तव्यः साङ्गसिद्ध्यर्थं तदशक्तेन भक्तितः ॥ यद्यदङ्गं विहीयेत

१ भजतु भक्तितः । २ विहीयेत ।

Scanned with CamScanner

ततो नेष्टमवाप्नुयात् ॥ अङ्गहीनं भवेद्यद्यत्कर्म नेष्टार्थसाधनम् । सर्वथा भोजयेद्विप्रान्कृतसाङ्गत्वसिद्धये ॥ विप्राराधनमात्रेण व्यङ्गं साङ्गत्वमाप्नुयात् ॥ जपाद्दशांशतो होमस्तद्दशांशेन तर्पणम् । मार्जनं तद्दशांशेन तद्दशांशेन भोजनम् ॥ इति रिक्तपूर्णता ॥ इति पुरश्चरणविधिः ॥

अथ षट्पल्लवविज्ञानम् ॥ एवं सिद्धे मन्त्रराजे प्रयोगान्साधयेदथ । ग्रन्थनं च विदर्भश्च संपुटो रोधनं तथा । योगः पल्लव इत्येते विज्ञेयाः षट्सु कर्मसु ॥ मन्त्राणान्तरितान्कृत्वा नामवर्णान्यथाविधि । ग्रन्थनं तद्विजानीयात्प्रशस्तं शान्तिकर्मणि ॥ मन्त्राणां[1]द्वयमध्यस्थं साध्यनामाक्षरं लिखेत् । विदर्भ एष विज्ञेयो मन्त्रिभिर्वश्यकर्मणि ॥ आदावन्ते च मन्त्रः स्यान्नाम्नो[2]ऽसौ संपुटः स्मृतः । एष संस्तम्भने ज्ञेय इत्युक्तं मन्त्रवेदिभिः ॥ आदावन्ते भवेन्नाम मनोस्तद्रोधनं मतम् । विद्वेषणविधानेषु प्रशस्तमिदमीरितम् ॥ मन्त्रस्यान्ते भवेन्नाम योगः प्रोच्चाटने मतः । अन्ते नाम्नो भवेन्मन्त्रः पल्लवो मारणे मतः ॥ इति षट्पल्लवविज्ञानम् ॥

अथ तत्त्वज्ञानम् ॥ तत्त्वोदयं परिज्ञाय कर्म कुर्याद्यथा[3]विधि । क्ष्मातत्त्वे स्तम्भनं कुर्यादम्भस्तत्त्वे च शान्तिकम् ॥ वश्यमाकर्षणं चैव तेजस्तत्त्वोदये सति । उच्चाटनं वायुतत्त्वे व्योमतत्त्वे तु मारणम् ॥ जानीयादुदितं तत्त्वं वर्णैर्बिन्दुगतैः पृथक् । इति तत्त्वज्ञानम् ॥

अथ कुण्डानि ॥ वेदास्रं योनिमर्धेन्दुं त्र्यस्रं वृत्तं षड-

---

१ द्वन्द्वमध्यस्थं । २ स्यात्स्यान्नामासौ तु संपुटः । ३ यथोचितं ।

Scanned with CamScanner

स्रकम् । पङ्कजाकारमष्टास्रं शान्तिकादौ नियोजयेत् ॥ इति कुण्डानि ॥

अथ पुरश्चरणेऽग्निनिर्णयः ॥ लौकिकाग्नौ शान्तिकं स्यात्पौष्टिकं च शुभं तथा । वटजे स्तम्भनं प्रोक्तं सशानस्थे तु मारणम् ॥ बिभीतकाग्नौ विद्वेषः षट्कर्मस्वग्नयो मताः ॥ इत्यग्नयः ॥ ॥अथ जपेङ्गुल्यादि॥ अङ्गुष्ठानामिकाभ्यां च जपेदुत्तमकर्मणि । अङ्गुष्ठमध्यमाभ्यां तु जपेदाकृष्टिसिद्धये ॥ तर्जन्यङ्गुष्ठसंयोगाद्विद्वेषोच्चाटनं भवेत् । कनिष्ठाङ्गुष्ठकाभ्यां च जपेन्मारणकर्मणि ॥ ॥ ऋतुपरत्वेन कालनियमः ॥ उदयाद्यामपर्यन्तं हेमन्ते पौष्टिकं जपेत् । यामद्वयं पूर्वरात्रे शिशिरे मारणं जपेत् ॥ वसन्ते प्रहरादूर्ध्वं यावन्मध्याह्निकं भवेत् । कार्यमाकर्षणं तत्र मन्त्रैरिष्टस्य वस्तुनः ॥ ग्रीष्मे तृतीयको यामो हितो विद्वेषकर्मणि । ततोऽस्तमनपर्यन्तमुच्चाटस्तोयदागमे ॥ अर्धरात्रे निशीथे च जपेच्छरदि शान्तिकम् । तथाचाह वसिष्ठः—यस्मिन्कस्मिन्नृतौ कार्यं मन्त्राणां साधनं शुभम् । पूर्वाह्णे वश्यपुष्ट्यर्थं मध्याह्ने प्रीतिनाशनम् ॥ उच्चाटमपराह्णे तु संध्यायां मारणं तथा । शान्तिकं त्वर्धरात्रे च तदूर्ध्वं सर्वकर्मसु ॥ इति ऋतुपरत्वेन कालनियमः ॥

अथानुष्ठाने दिङ्नियमः ॥ पूर्वामुखो भवेद्वश्ये दक्षिणे ह्याभिचारके । पश्चिमे स्तम्भनं विद्यादुत्तरास्येन शान्तिकम् ॥ आकर्षणमथाग्नेये नैर्ऋत्ये मारणं तथा । उच्चाटनं च वायव्ये ईशान्ये मोक्षदायकम् ॥ इत्यनुष्ठाने दिङ्नियमः ॥

अथ तिथयः ॥ शुक्लपक्षे द्वितीया च तृतीय पञ्चमी तथा।

Scanned with CamScanner

बुधदेवगुरूपेता शान्तिके चाथ सप्तमी ॥ षष्ठी त्रयोदशी चैव चतुर्थी नवमी तथा। सोमदेवगुरूपेता पौष्टिके शंसिता बुधैः ॥ अष्टमी नवमी चैव दशम्येकादशी तथा। शुक्रभानुसुतोपेता शस्ता विद्वेषकर्मणि ॥ अतश्चतुर्दशी कृष्णा शनिवारे तथाष्टमी। उच्चाटनेऽतिशस्तोयं जपः शंकरभाषितः ॥ अमावास्याष्टमी कृष्णा तादृक् चैव चतुर्दशी। भानुना तत्सुतोपेता भूसुतेनापि संयुता ॥ मारणे स्तम्भने चैव जपे होमे प्रशंसिता ॥ इति कामनापरत्वेन तिथिविचारः ॥

दीर्घायुष्ट्वारोग्यजारणमारणादि ॥ लक्षं तदर्धमथ वा जपित्वा तद्दशांशतः। तिलैर्वा कमलैर्हुत्वा यद्यदिष्टं तदश्नुते ॥ बिल्वप्रसूनैरैश्वर्यमर्चितेऽग्नौ हुतैर्भवेत्। पलाशकुसुमैर्हुत्वा मेधावी वेदविद्भवेत् ॥ दूर्वाभिश्च गुडूचीभिः प्रत्येकमपि चाक्षतैः। निरामयोपि दीर्घायुर्भवत्येव तपोनिधे ॥ आरोग्यकामो भुञ्जीयादन्नं सप्ताभिमन्त्रितम्[1]। सप्तधा मन्त्रपूताम्भः पीत्वाब्दं च कविर्भवेत् ॥ रोगोक्तौषधिहोमेन रोगान्मुच्येत तत्क्षणात्। सम्यक्चन्दनतोयेन प्रत्यग्रैश्च समुक्षितैः ॥ जातिप्रसूनैर्हुत्वा तु राजानं वशमानयेत्। ध्यात्वापि मन्मथं रामं सीतां[2] चापि रतिं स्मरेत्। सर्ववश्यप्रयोगेषु जपहोमादिकर्मसु ॥ वाञ्छितं धनमाप्नोति हुत्वा रक्तोत्पलैर्नरैः। हुत्वा नीलोत्पलैः सम्यक् वशयेदखिलं जगत् ॥ रामं विधिवदाराध्य ज्वलितेऽग्नौ प्रयोगवित्। मधुरत्रययुक्तेन पायसेन हुतेन तु। सर्वाधिपत्यं वैदुष्यं भवत्येव न संशयः ॥ बिल्वप्रसूनैः कुमुदैस्तथा बिल्वदलैरपि। हुत्वा स

---

१ मन्त्राभिमन्त्रितं। २ सीतामपि।

Scanned with CamScanner

लभते लक्ष्मीमचिरान्मन्त्रसाधकः ॥ आराध्य रामं चण्डांशुमण्डले वत्सरं मुने । उदयादस्तमानान्तं[1] जपन्मन्त्रमनन्यधीः । फलं भवति तस्याशु देवानामपि दुर्लभम् ॥ राज्यैश्वर्योपभोगार्थी जपेल्लक्षमनन्यधीः । पद्मैर्बिल्वप्रसूनैर्वा दशांशं जुहुयान्मुने ॥ समुद्रतीरे गोष्ठे वा लक्षजापी पयोव्रतः । पायसेनाज्ययुक्तेन हुत्वा विद्यानिधिर्भवेत् ॥ परिक्षीणाधिपत्यो यः शाकाहारो जलान्तरे । जपेल्लक्षं च जुहुयाद्बिल्वपत्रैर्दशांशतः ॥ तदेव पुनरायाति स्वाधिपत्यमसंशय[2]ः ॥ उपोष्य गङ्गादिजलान्तरस्थो रामं समाराध्य जपेच्च लक्षम् । हुत्वा दशांशं कमलैस्तिलैर्वा बिल्वप्रसूनैर्मधुरत्रयाक्तैः ॥ राज्यश्रियं विन्दति मन्दभाग्योप्यमुष्य दास्यं परवाञ्छितं स्यात् ॥ माघमासे जले स्थित्वा कन्दमूलफलाशनः । जपेल्लक्षं च जुहुयात्पायसेनार्चितेऽनले ॥ दशांशं पुत्रपौत्राद्यैस्तच्छेषं प्राशयेत्प्रियाम् । श्रीरामसदृशः पुत्रः पौत्रोऽप्यस्य प्रजायते ॥ बलिष्ठैः शत्रुभिर्मन्त्री परिभूतोऽवमानितः । तदा हनहनेत्युक्त्वा नामान्ते वैरिणो जपेत् ॥ ध्यात्वा रघुपतिं क्रुद्धं[3] कालानलमिवापरम् । आकर्णसशराकृष्टकोदण्डभुजमण्डलम् । रणाङ्गणे रिपून्सर्वांस्तीक्ष्णमार्गणवृष्टिभिः ॥ संहरन्तं महावीरमुग्रमैन्द्ररथस्थितम् । लक्ष्मणादिमहावीरैः शैलवृक्षकरोद्धतैः ॥ वेगात्करालहुंकारैर्भीमोकारमहारवैः । नदद्भिः परिधावद्भिः समरे रावणं प्रति ॥ एवं ध्यात्वा निराहारो मरणाय रिपोः पुनः । जुहुयाच्छाल्मलीपुष्पैर्दशांशं मन्त्रसाधकः॥ अल्पैश्वर्यसमृद्धोपि न शत्रुरवशिष्यते ॥ वैरिणं रावणं ध्यात्वा

---

१ दस्तपर्यन्तं । २ पत्यं न संशयः । ३ कृष्णं ।

Scanned with CamScanner

तथात्मानं रघूद्वहम् । विधाय पूर्ववत्सर्वमनायासेन मारयेत् ॥ सीताहरणशोकाधिस्तम्भीभूतमचेतनम् । जपेद्रघुपतिं ध्यायन्निराहारो जले वसन् ॥ दशांशतस्तिलैर्हुत्वा स्तम्भयेच्छत्रुसंहतिम् । निधाय वायुबीजान्तं तन्नाम भ्रामयेति च ॥ जपेल्लक्षं निराहारो जुहुयाच्च तिलैरपि । रामं ध्यात्वा विषण्णं च सीतान्वेषणकातरम् । भ्रामयत्यचिरं साक्षाद्धेमाद्रिमपि वैरिणम् ॥ अन्येऽपि बहवः सन्ति प्रयोगा मन्त्रराजके । किंतु प्रयोगकर्तॄणां परलोको न विद्यते ॥ प्रयोगसिद्धिरेतेषां फलं नान्यद्भविष्यति[1] । निष्कामानां च भक्तानां जपहोमादिकर्मसु । मुक्तिरेव फलं तेषामिह किंचिन्न विद्यते ॥ विद्वन्ब्रह्मास्त्रमादाय शशादौ न विमोचयेत् । नायं मुक्तिप्रदो मन्त्रो मारणादौ प्रयुज्यताम् ॥ इति दीर्घायुष्ट्वारोग्यादिजारणमारणप्रयोगाः ॥

अथ यन्त्राणि ॥ अथातः संप्रवक्ष्यामि नानायन्त्राणि मन्त्रिणाम् । नानार्थदानि रामस्य नानाकल्पागमात्पृथक् ॥ पञ्चयन्त्रं ब्रह्मसंहितायामुक्तं प्रतन्यते । षट्कोणं चक्रमालिख्य स्वरकेसरसंयुतम् । कोणेषु मन्त्रवर्णांश्च बहिरष्टदलाम्बुजम् ॥ दलेषु विलिखेन्मूलं ततः प्रणवसंपुटम् । पुनः पूर्वं पुनः पद्मं द्वादशारं दलेष्वथ ॥ त्रैलोक्यमोहनं बीजं नामसंयुक्तमालिखेत् । कर्णिकायां लिखेन्नाम तारमन्त्रविदर्भितम् ॥ महासुदर्शनेनेदं वेष्टितं चक्रमुत्तमम् । पृथिव्या संपुटं बाह्ये[2] वज्राष्टकविभूषितम् ॥ चतुःकोणेष्वेवमथाङ्कुशपाशावनिप्रयुक्[3] । भूर्जपत्रे लिखेदेतद्रोचनाद्यैः शुभेहनि ॥ विलिख्य धारयेन्मन्त्री मूर्ध्नि वा दक्षिणे

---

१ नान्यदितो भवेत् । २ बाह्यं । ३ कोणेषुभमधोङ्कुश ।

Scanned with CamScanner

भुजे। न तस्य विद्यते पापं यावत्तत्र धृते स्थिते ॥ व्याधिभिर्नाभिभूयेत नाहिभिर्न च तस्करैः। नारिभिर्न गजैर्मत्तैर्न चान्यैः क्षुद्रजन्तुभिः ॥ स्त्रियो वश्या भवन्त्येव दर्शनात्तस्य मन्त्रिणः। राजानो माण्डलिकाश्च सामन्ता राजमन्त्रिणः ॥ धनधान्यसमृद्धिः स्यात्सर्वान्कामांश्च विन्दति। त्वया पुत्र न वक्तव्यं मन्त्रराजमहोदयम् ॥ नाशिष्याय न पापाय नाऽशान्तायाप्रियाय च। शिष्याय मन्त्रनिष्ठाय श्रद्धाभक्तियुताय च। वसुप्रदाय दातव्यमन्यथा नरके गतिः ॥ इति ॥

अस्यार्थः—षट्कोणं चक्रमालिखेत्। परस्परं वैमुख्येन त्रिकोणयुग्मं लिखेत्। ततश्चैन्द्र्याग्नेयनैर्ऋत्यवारुणवायव्येशानान्तं मध्ये तु षट् डमरुकाः सेयं षट्कोणतोदिता। स्वरकेसरसंयुतमित्येतत् बहिरष्टदलाम्बुजमित्यनेन संबध्यते। कोणेषु मन्त्रवर्णान् पूर्वादिषट्सु कोणेषु ॐरामायहुंफट्स्वाहेति मन्त्रः। श्रीरामायहुंफट्स्वाहेति वा। रां रामायस्वाहेति वा षट् मन्त्रवर्णान्यथाक्रमं लिखित्वा ततो वर्तुलं रेखाद्वयं लिखेत्। बहिरष्टदलाम्बुजम्। तद्बहिरष्टपत्रं पद्मं स्वरकेसरसंयुतं षोडशकेसरसहितम्। दलेषु विलिखेन्मूलं तेष्वष्टदलेषु च ॐ नमो नारायणायेति मूलमन्त्रं लिखेत्। ततः प्रणवसंपुटं एकैकमक्षरं प्रणवद्वयमध्यगतं यथा भवति तथा लिखेत्। पुनः पूर्व पूर्व षट्कोणं पूर्ववन्मन्त्राक्षरसहितं लिखेत्। ततः कोणाग्रस्पृक् वर्तुलं रेखाद्वयं कुर्यात्। पुनः पद्मं द्वादशारं द्वादशदलेषु त्रैलोक्यमोहनं बीजं 'क्लीं' इति बीजं नामसंयुक्तमालिखेत्। तद्बीजं

---

१ नार्तिभिर्न गजैः। २ मन्त्रराजं। ३ पतेत्। ४ भवेत्तथा।

Scanned with CamScanner

साध्यनामसहितं प्रतिदलं लिखेत् । ततः कर्णिकायां षट्कोणमध्ये वर्तुलं रेखाद्वयं लिखेत् । तत्र बीजं साध्यनामसहितं लिखेत् । कर्णिकावत्कर्णिका तस्यां मध्ये साध्यस्य वस्तुनो नाम लिखेत् । कथंभूतम् । तारमन्त्रविदर्भितम् तारादिनवसंख्याकमन्त्राक्षरैर्विदर्भितम् । आदौ मन्त्राक्षरद्वयं अनन्तरं साध्यनामाक्षरमेकैकं पुनर्मन्त्राक्षरद्वयं अनन्तरं नाम्नोऽक्षरमेकं एवं नाम्नोऽक्षरसमाप्तिर्यावत्तावल्लिखेत् एतद्विदर्भितम् । तथाच मन्त्रांशके–द्वे द्वे मन्त्राक्षरे यत्र एकैकं साध्यनामकम् । विदर्भितं तु तत्प्रोक्तं सर्वरक्षाकरं परम् ॥ इति । शान्तिके त्वादौ मन्त्रं समग्रं लिखित्वा अनन्तरं साध्यनाम समग्रं विलिखेत् । पुनर्मन्त्रं समग्रमालिखेत् । एतत्संपुटमुच्यते । तथाच–'मन्त्रमालिख्य पूर्वं वै साध्यं च तदनन्तरम् । पुनश्चान्ते भवेन्मन्त्रं संपुटं शान्तिकर्मणि' इति ॥ वश्ये तु–आदौ मन्त्रप्रथमाक्षरं ततो नाम्नः प्रथमाक्षरं पुनर्मन्त्रद्वितीयाक्षरं ततो नाम्नो द्वितीयाक्षरं एवं यावता समाप्तिस्तावल्लिखेत् । विविधकुसुमग्रथितमालावत् । एतच्च ग्रन्थितम् । तथाच–'एकैकं साध्यवर्णं तु माल्यवत्संपुटीकृतम् । मन्त्रार्णैर्ग्रन्थितं चैव वश्याकृष्टविधौ स्मृतं' इति ॥ परमन्त्रभेदने तु–आदौ मन्त्रं समग्रं लिखित्वा पश्चान्नामाक्षराणि सावशेषाणि विलिख्य पुनर्मन्त्रं समग्रं लिखित्वा पुनर्नाम्नोऽवशिष्टाक्षराणि विलिख्य पुनर्मन्त्रं समग्रं लिखेत् तद्ग्रस्तम् । तथाच–'आदौ मध्ये तथा चान्ते मन्त्रं कुर्याद्विचक्षणः । मध्यमध्ये भवेत्संज्ञा ग्रस्तमित्यभिधीयते' इति । अयमेव रोध इति केचिदाहुः

---

१ तदा प्रोक्तं ।

Scanned with CamScanner

योगस्त्वेवम्–आदौ मन्त्रं समग्रं लिखित्वा पश्चान्नाम्नोऽक्षराणि विलिखेदिति ॥ पल्लवस्तु आदौ नाम समग्रं लिखित्वा पश्चान्मन्त्रं लिखेदिति। तथाच 'तत्रादौ योग उद्दिष्टो ह्यन्ते चेत्पल्लवः स्मृतः' इति। तयोश्च विनियोगस्तथैवोक्तः। तथाहि–'शान्तिके पौष्टिके दिव्ये प्रायश्चित्तविशोधने। मोहने दीपने योगं प्रयुञ्जन्ति मनीषिणः ॥ मारणे विषनाशे च ग्रहभूतविनिग्रहे। उच्चाटने च विद्वेषे पल्लवं संप्रचक्षते।' इति। अत्र सर्वसाध्ययुक्तं विलिख्य ततः स्वनाम चतुर्थ्यन्तं मह्यंपदोत्तरम्। फलवाचकं पदं द्वितीयान्तं देहि कुर्विति वा द्विरभ्यसेत्। एष विधिः सांप्रदायिकः। एवं कर्णिकायां प्रयोगानुरूपेण लिखित्वा वेष्टयेदित्याह–महासुदर्शनेनेदं वेष्टितमिति। इदं यन्त्रं महासुदर्शनमन्त्रेण–सुदर्शन महाचक्र चक्रराज धगधगान्तक दुष्टभयंकर छिन्धिछिन्धि भिन्धिभिन्धि विदारयविदारय परमन्त्रान् ग्रसग्रस भक्षयभक्षय भूतानि त्रासयत्रासय हुंफट् स्वाहा। इत्यनेन वेष्टितं यथा भवति तथा लिखेत्। चक्रमुत्तमं। एतदुत्कृष्टं यन्त्रं पृथिवीसंपुटं बाह्ये पृथिवीमण्डलं चतुःकोणं संपुटं तद्युग्मं व्यस्तलिखितं अष्टकोणमिति यावत्। वज्राष्टकविभूषितम्। तदेव चक्रं प्रतिकोणलिखितछकाराष्टकसंबद्धं लिखेदित्यर्थः। ततो बहिः रेखाद्वयं लिखित्वा अनन्तरं चतुःकोणं कुर्यात्। तत्कोणेषु क्रों आं लं इति अङ्कुशपाशावनिबीजानि लिखेत्। भूर्जपत्रे लिखेदेतद्रोचनाद्यैः शुभेऽहनि। एतच्चक्रं भूर्जपत्रे तत्कामनार्थी विजिताधिकरणे रोचनाद्यैः गोरोचनाकुङ्कुमचन्दनकर्पूरादिद्रव्यैः शुभेऽहनि गुरुपुष्यादिदिवसे लिखेत् इति। एतदुक्तं

Scanned with CamScanner

भवति—आदौ षट्कोणं चक्रं लिखेत् ततो वर्तुलरेखाद्वयम् ततोऽष्टदलपद्मम् तस्यैकैकं दलं केसरद्वययुक्तं ततो दलाग्रस्पृग्वर्तुलरेखाद्वयं ततः षट्कोणं ततस्तथैव रेखाद्वयं ततो द्वादशदलं पुनस्तथैव रेखाद्वयं ततोऽष्टकोणचक्रं ततस्तथैव रेखाद्वयं (ततश्चतुरस्राख्यं) आद्यषट्कोणमध्यस्थवर्तुलमण्डले कर्णिकाख्ये साध्यनामसहितं मन्त्रं लिखेत्। षट्कोणेषु मन्त्रवर्णान् लिखेत्। ततोष्टपत्रेषु अष्टाक्षरनारायणमन्त्रं विभज्य लिखेत्। पत्रस्थकेसरद्वन्द्वेषु च यथासंख्येन षोडशस्वरान्। तदनन्तरं रेखाद्वयमध्ये कादीन्क्षान्तान्। पुनश्च षट्कोणेषु मूलमन्त्रवर्णान्। ततोऽनन्तरं वर्तुलरेखाद्वयमध्ये। ॐअमुष्य प्राणा इह प्राणाः। अमुष्य जीव इह स्थितः। अमुष्य सर्वेन्द्रियाणि। अमुष्य सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रप्राणा इहायान्तु स्वस्तये सुखेन सुचिरं तिष्ठन्तु स्वाहेति प्राणप्रतिष्ठामन्त्रं लिखेत्। अस्य तु विशेषो गुरुमुखादेव विज्ञेयः। कृष्णवल्लभायां चोक्तम्—ततो द्वादशदलेषु त्रैलोक्यमोहनबीजं साध्यनामसहितं। ततो वर्तुलरेखाद्वयमध्ये सुदर्शनमन्त्रं अष्टसु कोणेषु प्रतिकोणं छकारं लिखेत्। ततो बहिश्चतुःकोणेषु प्रतिकोणं पाशाङ्कुशावनिबीजानि लिखेत्। इति विलिख्य धारयेदित्यादिस्पष्टार्थः॥

अथ सर्वयन्त्रसाधारणमुहूर्तादिविशेषो मन्त्रांशकोक्तः कथ्यते—तथाच—सुदिने शुभनक्षत्रे सुदेशे शल्यवर्जिते। सशिष्यस्तत्र चाचार्यः शिष्यो वा तदभावतः॥ उदङ्मुखः प्राङ्मुखो वा उपविश्य प्रणम्य च। गुरुं विश्वेश्वरं देवं ततो यन्त्रं समालिखेत्॥ ॥ कामनाभेदे तु कालविशेषः कथ्यते—

Scanned with CamScanner

वश्याकृष्टौ लिखेत्पुष्येऽदितौ विद्वेषणं स्मृतम्। आर्द्रायां मारणं प्रोक्तं मघास्वुच्चाटनं भवेत्॥ ॥ कामनाधीनो लेखनीविशेषोपि तथाच—लेखन्या च लिखेद्यन्त्रं वश्ये दूर्वाङ्कुरोत्थया। आकृष्टौ तु करञ्जोत्था मारणे तु नरास्थिजा ॥ स्तम्भकर्मणि विज्ञेया राजवृक्षोद्भवा तथा। शान्तिके पौष्टिके चैव ह्यायुःकर्मविधौ तथा॥ सर्पोपशमने चैव जल्पने स्तम्भनेपि वा। विभ्रमोत्पादने चैव शिलायां तु प्रशस्यते ॥ खरचर्मणि विद्वेषे महदुच्चाटनं ध्वजे। क्षीरोदे च तथा सम्यगुक्तं वा साधयेद्ध्रुवम् ॥ ज्वर-संतापशोकं च शत्रूणां मारणं तथा। लिखित्वा साधयेत्सर्वं पीतवस्त्रेण नान्यथा॥ ॥ तथाच द्रव्यभेदोपि—कस्तूरी कुङ्कुमं चन्द्रं[2] चन्दनं रोचनाऽगुरुः। स्तम्बेरममदं शुद्धमुशीरं चाष्टगन्धकम् ॥ द्रव्यैश्चैवंविधैस्तद्वच्चन्द्रचन्दनरोचनैः। उशीरक्षीरयुक्तैस्तु नात्र कार्या विचारणा ॥ नागेन्द्रमदयुक्ता वै तथा वश्ये च रोचना। विषधत्तूरयुक्तेन चिताङ्गारेण सोष्मणा॥ ताडनोच्चाटनादीनि क्षुद्रकर्माणि साधयेत्। विषार्कक्षीरगुञ्जायाः संयोगे मारणं स्मृतम्॥ मन्त्राङ्गं यन्त्रराजं तमेवं संलिख्य यत्नतः। पूजयेद्गन्धपुष्पाद्यैर्ध्यात्वा देवं जगद्गुरुम्॥ त्रिलोहवेष्टनं कृत्वा ततः पूजां च कारयेत्। देवहस्तगतं लब्ध्वा साधयेत्साधकोत्तमः॥ करे कण्ठे शिखायां च यथा सन्निहितं भवेत्। इति॥ सुदिने इत्यादेरर्थः—शल्यवर्जिते अस्थ्यादिरहिते। अहिभे आश्लेषानक्षत्रे। राजवृक्षोद्भवा आरग्वधोत्था। तीक्ष्णा शस्त्रयोगोत्कृष्टा। विष्ट्यङ्गारदिने। विष्टिः भद्रा। अङ्गारो मङ्गलवारः। चन्द्रः कर्पूरः। शेषं सुगमम्। इति प्रथमयन्त्रम्॥

---

१ राजवृक्ष आरग्वधः (गिरिमाला)। २ चन्द्रः कर्पूरः।

Scanned with CamScanner

अथ द्वितीययन्त्रम् ॥ नाम सप्रणवं मध्ये षट्कोणं बाह्यतो लिखेत् । मन्त्राक्षराणि कोणेषु कोणयोर्विश्वमोहनम् ॥ माहेन्द्रं मण्डलं बाह्ये कपाले विलिखेदिदम् । रक्तेनानामिकोत्थेन तापयेत्खादिराग्निना ॥ सप्तभिर्दिवसैर्यन्त्रं रम्भापि वशगा भवेत् । अस्यार्थः—नाम सप्रणवं मध्य इति । आदौ लिखितवर्तुलरेखाद्वयमध्ये साध्यस्य वस्तुनो नाम प्रणवद्वयमध्यगतं लिखेत् । षट्कोणं बाह्यतो लिखेत् । एतच्च प्रागुक्तप्रकारेण कर्णिकाख्यं वर्तुलरेखाद्वयाद्बहिर्लिखेत् । मन्त्राक्षराणि कोणेषु ॐ रामाय हुं फट् इति, रां रामायस्वाहा इति वा षडक्षराणि षट्कोणेषु यथाक्रमं लिखेत् । कोणयोर्विश्वमोहनम् द्वयोर्द्वयोः कोणयोर्मध्ये विश्वमोहनम् । 'ॐ श्रीं ह्रीं श्रीदाशरथये सीतावल्लभाय त्रैलोक्यमोहनाय नमः' इति मन्त्रं यथासंभवं लिखेत् । ततो वर्तुलं रेखाद्वयं लिखेत् । क्लीं इति वा जगन्मोहनं बीजं लिखेत् । माहेन्द्रं मण्डलं बाह्ये । षट्कोणबहिर्भागे अष्टकोणचक्रं लिखेत् । सर्वेषु कोणेषु छकारं लिखेत् । कपाले विलिखेदिदं । इदं यन्त्रं नरशिरःकपाले लिखेदित्यर्थः । कैर्द्रव्यैरित्याह—रक्तेनानामिकोत्थेन कनिष्ठिकायाः संनिहिताङ्गुलिनिर्गतेन रक्तेन लिखेत् । तापयेत् खादिराग्निना साध्यमनुस्मरन् मन्त्रं चाष्टसहस्रं जपेत् । सप्तदिवसं खादिरसमिद्भिः खादिराग्निना तापयेत् । शेषं व्यक्तम् । इति द्वितीययन्त्रम् ॥

अथ तृतीययन्त्रम् ॥ इदमेव परं यन्त्रं मायाबीजेन वेष्टितम् । भूर्जे विलिख्य विधिवत्साध्यमूर्त्यन्तमालिखेत् ॥ कृत्वा स्मशाने खननं संध्यायां विजयेद्बलम् । त्रिभिर्दिनैर्न संदेहः

Scanned with CamScanner

साध्याकर्षणमावहेत् ॥ इति । अर्थस्तु—इदमेव परं यन्त्रं इदमेवोत्कृष्टतमं भवति । कथमित्याह—मायाबीजेन वेष्टितं ह्रीं इति बीजेन निरन्तरं लिखितं चेद्यन्त्रान्तरं भवति । कुत इत्याह—भूर्जे विलिख्य विधिवत् भूर्जपत्रे यथाशास्त्रं लिखेदित्यर्थः । साध्यमूर्त्यन्तमालिखेत् । षट्कोणमध्यस्थकर्णिकायां साध्यपुरुषरूपं स्त्रीरूपं वा मूर्त्यन्तं हस्तपादाद्यवयवयुक्तं मन्त्रसंपुटितं लिखेत् । कृत्वा श्मशाने खननं प्रागुक्तमार्गेण यन्त्रं संपाद्य शवदाहभूमौ खननं निक्षेपणं कुर्यात् । कदेत्याह—संध्यायां सूर्यास्तसमये । एवं कृते सति जयेद्बलं बलं बलवन्तं प्रतिपक्षं जयतीत्यर्थः । साध्याकर्षणमावहेत् साध्यस्यापेक्षितस्य वस्तुन आकर्षणं स्वसमीपानयनं आवहेत् साधयेदित्यर्थः । इति तृतीययन्त्रम् ॥

अथ चतुर्थयन्त्रम् ॥ द्वितीयाक्षरसंयुक्तं नाम मध्ये लिखेन्मुने । कोणेषु तूद्धरेद्वर्णान् बहिर्वारुणमण्डलम् ॥ वारुणं परितो लिख्य गन्धाद्यैः कलशोदके । तन्मुखे कल्पितं दीपं कपिलाज्येन पूरितम् ॥ मन्त्रेणावाह्य देवेशं दीपमध्ये विधानतः । तत्र संलक्षयेन्मन्त्री रूपं भगवतः स्फुटम् ॥ अतीतानागतं सर्वं पृष्टं वदति मन्त्रिणे[1] । कुमारी पश्यति क्षिप्रं पुमान्यदि न पश्यति ॥ अस्यार्थः—द्वितीयाक्षरेत्यादि । रामित्यनेन संपुटितं साध्यवस्तुनो नाम षट्कोणान्तः[2]कर्णिकामध्ये लिखेत् । मुने इति संबोधनम् । कोणेषु तूद्धरेद्वर्णान् षट्सु कोणेषु रामाय हुंफट्स्वाहेति षड्वर्णानुद्धरेत् लिखेत् । बहिर्वारुणमण्डलं षट्कोणाद्बहिर्वारुण-

---

१ मन्त्रिणा । २ षट्कोणतः ।

Scanned with CamScanner

मण्डलं धनुराकारं मण्डलं लिखेत् । वारुणं परितो लेख्यं वमितिबीजं सर्वतः निरन्तरं लिखेत् । ततश्चतुष्कोणं मण्डलं सर्वसाधारणं भूपुराख्यं पाशाङ्कुशावनिबीजयुक्तं लिखित्वा लाक्षारसेन वेष्टयेत् । गन्धाद्यैः कलशोदके गङ्गादिसरिज्जलैः कुम्भं पूरयित्वा तस्मिन्कलशोदके तद्यन्त्रं निक्षिपेत् । तन्मुखे कल्पितं दीपं कपिलाज्येन पूरितम् । तस्य कुम्भस्य मुखे कल्पितं दीपं कुर्यात् । कपिलाया आज्येन घृतेन पूरितं च शरावं कृत्वेत्यर्थः । मन्त्रेणावाह्य देवेशं दीपमध्ये देवेशं श्रीरामं दीपाख्यस्थण्डिले आवाह्य । विधानत इत्यस्यायमर्थः—श्रीराममन्त्रस्य अगस्त्य ऋषिः । पङ्क्तिश्छन्दः । श्रीरामः परमात्मा देवता । रां इति बीजम् । स्वाहेति शक्तिः । अक्षराणां तु—ब्रह्मा भृगुर्भरद्वाजो विश्वामित्रोऽथ गौतमः । पुलस्त्यो वामदेवश्च ऋषयः परिकीर्तिताः ॥ तथा छन्दांस्यपि यथाक्रमेणैव ॥ गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेवच । त्रिष्टुप् च जगती चेति छन्दांस्युक्तानि देशिकैः ॥ सूरिभिरिति वा पाठः । देवताप्यक्षरक्रमेणैव—परमात्मा हरो दुर्गा सूर्यः स्कन्दः पितामहः । एतास्तु देवताः प्रोक्ता वीतिहोत्रस्तु सप्तमः ॥ वर्णास्तु—प्रथमः श्वेतवर्णः स्याद्द्वितीयोऽग्निसमप्रभः । तृतीयः पिङ्गलो वर्णश्चतुर्थो हरितप्रभः ॥ पञ्चमः कृष्णवर्णः स्यात्षष्ठः पीतसमप्रभः । सप्तमो नीलवर्णः स्यादेते वर्णाः प्रकीर्तिताः ॥ चतुर्णामाद्यवर्णानामुदात्तः कथितः स्वरः । स्वरितः पञ्चमो वर्णः षष्ठो वर्णोऽनुदात्तकः ॥ उदात्तः सप्तमो वर्णः स्वराः प्रोक्ता मयानघ । इत्येतत्प्राणायामादिविनियोगं संकीर्त्य मन्त्रेण व्यापकन्यासं कृत्वा स्वाहेत्येतेन करशुद्धिं कृत्वा रामाय

हुंफडिति हृदयशिरःशिखाकवचनेत्रेषु पञ्चाक्षराणि न्यसेत्। स्वाहा अस्त्राय फट् इत्यस्त्रं दिक्षु विन्यसेत्। एष षडङ्गन्यासः। ततो योगशरचापमुद्राः प्रदर्श्य प्रणवेनोर्ध्वमुखं कृत्वा ततो व्याहृत्या विकसितं कृत्वा श्रीरामं ध्यायेत्—नीलोत्पलदलश्यामं जटामुकुटमण्डितम्। पीताम्बरधरं देवं दिव्यकुण्डलभूषितम्॥ दक्षिणे लक्ष्मणं ध्यायेत्कनकाभं किरीटिनम्। वामभागे जगद्योनिं प्रकृतिं परमेश्वरीम्॥ सीतां चम्पकगौराङ्गीं श्वेतवस्त्रविभूषिताम्। सर्वाभरणसंयुक्तां द्विभुजां रत्नकुण्डलाम्॥ ध्यात्वा लक्षत्रयं जप्त्वा अशोककुसुमैर्हुनेत्। अनेन विधिना सिद्धमन्त्रः सन् कुम्भमुखस्थशरावे कल्पितप्रदीपे स्वहृत्कमलस्थितं देवं आवाहनमुद्रया आवाह्य स्थापनसन्निधीकरणादिमुद्राः प्रदर्श्य षडङ्गन्यासं कृत्वा योगशरचापमुद्राः प्रदर्श्य उभयतः सीतां[1] लक्ष्मणं च गन्धर्वाद्यष्टकम्। ततो गुरुगणपतिदुर्गाक्षेत्रपालान्। ततो लोकपालाद्यष्टकम्। पुरतो विष्वक्सेनगरुडनारदादिभक्तान्। ततो हनुमत्सुग्रीवादीनावाहयेत्। एतत्परिवारसहितं षोडशोपचारैरभ्यर्च्य। पुरतः कुमारं कुमारीं चाभ्यर्च्य दीपमध्ये किं तिष्ठति पश्येत्युक्त्वा तस्य दीपं प्रदर्शयेत्। तत्र संलक्षयेन्मन्त्री रूपं भगवतः स्फुटम्॥ इत्यादि सुगमम्॥ इति चतुर्थयन्त्रम्॥

अथ पञ्चमयन्त्रम्॥ कर्णिकान्तर्गतं नाम तृतीयाक्षरगर्भितम्। शिष्टान्तरेषु संलिख्य ततोऽन्यैः परिवेष्टयेत्॥ पार्थिवं मण्डलं बाह्ये विलिखेद्यत्नवान्मिशि। जतुकेनाजवृक्षस्य कोटरे

---

१ सीतालक्ष्मणौ।

Scanned with CamScanner

तद्विनिक्षिपेत् ॥ मुखस्तम्भो गतिस्तम्भो जिह्वास्तम्भो भवत्यत्यतः ॥ इति ॥ अस्यार्थः—कर्णिकान्तर्गतमिति षट्कोणान्तर्गतवर्तुलरेखाद्वयमध्यगतं नाम तृतीयाक्षरगर्भितं साध्यवस्तुनो नाममन्त्रस्य मा इत्यनेन तृतीयाक्षरेण संपुटं लिखेदित्यर्थः । शिष्टान्तरेषु संलिख्य ॐ रामाय हुं फडिति शिष्टान्षड्वर्णान् षट्कोणेषु लिखेत् । ततोऽन्यैः परिवेष्टयेत् । अनन्तरं स्वाहेति द्वाभ्यां वर्णाभ्यां परिवेष्टयेत् । पार्थिवं मण्डलं बाह्ये पाशाङ्कुशवनिबीजसहितं चतुःकोणं बहिर्लिखेत् । यत्नवान् न्यासादिकं कृत्वा आत्मनो रक्षां विधाय लिखेत् । काम्यकर्मरतस्य देवाद्यैरभिभवसंभवात् । तथाच—काम्यकर्मप्रसक्तस्याशक्तस्याप्यशुभस्य च । अरित्वं भजते मन्त्रः सिद्धत्वं तद्विपर्ययात् ॥ इति ॥ तस्योपायान्तरमपरिहार्यसंकटे प्राप्ते सावधानो भूत्वा काम्यकर्म कुर्यात् । कस्मिन्काले । निशि रात्रौ । सार्धयामादुपरि चतुर्थाद्यामादर्वाक् यन्त्रं संपाद्य प्राणप्रतिष्ठां कृत्वा पूजां विधाय जतुकेन लाक्षयावेष्ट्य सहस्रवारमभिमन्त्र्याऽजवृक्षस्य कोटरे पलाशवृक्षस्योदरे तद्यन्त्रं निक्षिपेदिति । शेषं सुगमम् । इति पञ्चमयन्त्रम् ॥

अथ षष्ठयन्त्रम् ॥ अगस्त्यसंहितायां द्वे यन्त्रे संकथितेष्टदे[1] । सर्वेषां रामयन्त्राणां तयोः पूजा प्रशस्यते ॥ आदौ षट्कोणमुद्धृत्य ततो वृत्तं लिखेन्मुने । दलानि विलिखेदष्टौ ततः स्याच्चतुरस्रकम् ॥ सर्वलक्षणसंपन्नं व्यक्तं सर्वमनोहरम् । तदन्तरेऽपि सुव्यक्तं साध्याख्याकर्मगर्भितम् ॥ तद्बीजं विलिखेद्भूयस्तत्क्रोडीकृतमन्मथम् । ततस्तत्पञ्च बीजानि पुनरावर्तयेन्मुने ॥

---

१ संधिरार्षोऽत्र ।

Scanned with CamScanner

पुनर्दशाक्षरेणैव तदेव परिवेष्टयेत् । षडङ्गान्यग्निकोणादि-कोणेष्वेव क्रमाल्लिखेत् ॥ तथा कोणकपोलेषु ह्रीं श्रीं द्वे विलि-खेत्ततः । हुं बीजं प्रतिकोणाग्रं केसराग्रेषु च स्वरान् ॥ माला-मन्त्रस्य वर्णाः स्युश्चत्वारिंशच्च सप्त च । वर्णाः सप्त दलेष्वेव षट् षट् पञ्चाष्टमे दले ॥ पूर्वतो वेष्टयेत्काद्यैस्तत्सर्वं च तपोधन । दिग्विदिक्षु लिखेद्बीजे नारसिंहवराहयोः ॥ क्ष्रौं हुं क्षां हुं चेति पूर्वादिभूगृहे चतुरस्रके । यत्रेऽस्मिन्सम्यगाराध्य भुक्तिं मुक्तिं च विन्दति ॥ एतद्यन्त्रं समालिख्य सौवर्णे राजते पटे । भूर्जे वा सम्यगालिख्य गुलिकीकृत्य धारयेत् ॥ अपुत्रो लभते पुत्रा-नधनो धनमाप्नुयात् । किमत्र बहुनोक्तेन सर्वसिद्धिप्रदं नृणाम् ॥ यत्रमेतत्समाख्यातं धारणात्पातकापहम् ॥ अस्यार्थः—षट्-कोणादि धरण्यन्तं मनोहरं यन्त्रं लिखित्वा तस्य यन्त्रस्य मध्ये सुव्यक्तं यथा भवति तथा । साध्याख्याकर्मगर्भितम् । तस्य श्रीरामस्य बीजं लिखेत् । तत्सर्वं मन्मथेन क्रोडीकृत्य अवशिष्टै-र्मन्त्राणैर्मन्मथं वेष्टयेत् । पुनर्दशाक्षरेण पुनस्तत्तन्मान्मथं वेष्टयेत् । अष्टदलाद्बहिर्दशाक्षरवेष्टनमिति वसिष्ठकल्पे भेदः । शेषं स्पष्टम् ॥ इति षष्ठयन्त्रम् ॥

अथ सप्तमं यन्त्रम् ॥ षट्कोणादिधरण्यन्तं पूर्ववद्विलि-खेदथ । तस्य मध्ये लिखेत्तारं षट्सु कोणेष्वपि क्रमात् ॥ मूलमन्त्राक्षराण्येव सन्धिष्वङ्गं च मान्मथम् । मायां गण्डेषु किञ्जल्के स्वराणां लेखनं मतम् ॥ पत्रेषु पूर्ववन्मालामन्त्रो लेख्यः क्रमेण हि । दशाक्षरेण संवेष्ट्य काद्यानि व्यञ्जनानि च ॥ दिग्वि-दिक्षु लिखेद्बीजे नारसिंहवराहयोः । एतद्यन्त्रान्तरं[1] चात्र सा-

१ यन्त्रान्तरे ।

Scanned with CamScanner

ङ्गावरणमर्चयेत् ॥ सौवर्णे राजते भूर्जे लिखित्वार्चनमाचरेत् । फलं तु पूर्ववज्ज्ञेयं यत्रस्यास्य विचक्षणैः ॥ अस्यार्थः—चतुरस्रवेष्टितस्याष्टदलस्य कर्णिकामध्ये षट्कोणं तन्मध्ये प्रणवं । षट्सु कोणेषु षट् मन्त्रवर्णान् रां रीं रूं रैं रौं रः इत्यङ्गानि । आग्नेयादिकोणसंधिषु क्लीं ह्रीं । कोणगण्डेषु अष्टदलकिञ्जल्केषु स्वरान् । तत्पत्रेष्वष्टसु पूर्वादिक्रमेण सप्तचत्वारिंशन्मालामन्त्रवर्णान् षट्संख्याकान् अष्टमे पञ्चसंख्याकान् लिखेत् । ॐ हुं जानकीवल्लभायस्वाहेति दशाक्षरेण बहिर्वेष्टयित्वा तथैव कादिक्षान्तैश्च दिग्विदिक्षु क्ष्रौं हुं इति नृसिंहवराहबीजे द्वे विलिखेत् । शेषं स्पष्टम् ॥ इति सप्तमं यन्त्रम् ॥

अथाष्टमं यन्त्रं कवचाख्यम् ॥ तत्रैवोक्तमगस्त्येन यन्त्रं जैत्रं प्रतन्यते ॥ अगस्त्य उवाच । वक्ष्यामि रामभद्रस्य यन्त्रं कवचसंज्ञितम् । धारणात्तस्य मर्त्यानां जायन्ते सर्वसिद्धयः ॥ नश्यन्ति सर्वपापानि विपदो यान्ति संक्षयम् । भूतप्रेतपिशाचाद्याः पलायन्ते च दर्शनात् ॥ मित्राणि स्थिरतां यान्ति शत्रवो यान्ति मित्रताम् । ग्रहाः प्रसादमायान्ति दास्यं यान्ति महीभृतः ॥ किमत्र बहुनोक्तेन नास्त्यनेन समं शुभम् । यत्रेण रामभद्रस्य वज्रपञ्जरसंज्ञिना ॥ कोष्ठैः सहैकविंशत्या पङ्क्तिद्वयविभूषितम् । विन्यसेदुत्तमं चक्रमेतस्मिन्कवचं लिखेत् ॥ द्वादशाक्षरवर्णांश्च गृहाद्यन्तेषु विन्यसेत् । अनुलोमविलोमाभ्यां प्रादक्षिण्यक्रमेण च ॥ राघवादीनि नामानि नमस्कारेण योजयेत् । मे शिरः पात्वितीव स्यात्सर्वतो वाक्ययोजना ॥ साध्याख्यासंयुतां

---

१ कोणेषु । २ महत्यां संहितायां यदुक्तं यन्त्रं । ३ मर्त्येभ्यो । ४ त्वितीयं स्यात्सर्वतो गात्रयोजना ।

Scanned with CamScanner

[1]षष्ठ्या स्वाहेत्येकादशे गृहे । स्वकामशक्तिं वाग्वर्णान्नारसिंहमतः परम् ॥ लक्ष्मीं पाशाङ्कुशार्णानि वाराहं फट्स्वरूपकम् । स्वाहेति रामभद्रस्य द्वादशाक्षरमीरितम् ॥ सौवर्णे राजते पत्रे भूर्जे वा सम्यगालिखेत् । अथवा ताम्रपत्रे च गुलिं[2]कीकृत्य धारयेत् ॥ यावज्जीवं तु सौवर्णे रौप्ये विंशतिवार्षिकम् । भूर्जे द्वादशवर्षाणि तदर्धं ताम्रपत्रके ॥ एवं विलिख्य शेषेण यत्रशक्तिः प्रतिष्ठिता । एतां रामबलोपेतामित्यादिश्लोकषट्कम् ॥ यन्त्राद्बहिःप्रदेशे तु वृत्ताकारं यथा लिखेत् । सर्वदुष्टोपशमनं सर्वोपद्रवनाशनम् ॥ आयुरारोग्यमैश्वर्यपुत्रपौत्रप्रवर्धनम् । सर्वान्कामानवाप्नोति विष्णुलोकं स गच्छति ॥ इति ॥ अस्यार्थः—वक्ष्यामीत्यारभ्य वज्रपञ्जरसंज्ञितं इत्यन्तं स्पष्टम् ॥ दक्षिणोत्तररेखात्रयस्योपरि प्राक्पश्चिमाग्ररेखाद्वादशकेऽर्पिते द्वाविंशतिकोष्ठकानि भवन्ति । अन्तिमकोष्ठद्वयमध्यगतरेखापाकरणेनैकविंशतिः कोष्ठानि । तैः सार्धं पङ्क्तिद्वयविभूषितमुत्तमं चक्रं विन्यसेत् । तत्र श्रीरामकवचं लिखेत् । तद्यथा—द्वादशाक्षरमन्त्रवर्णानां मध्ये एकैकेन राघवायनमः मे शिरः पात्विति योजितं संपुटितमेकैकपदमेकैकस्मिन्कोष्ठके प्रादक्षिण्येन लिखेत् । एवमुपरितनपङ्क्तावानुलोम्येन दशपदानां समावेशः । अधस्तनपङ्क्तौ प्रातिलोम्येन पुनर्विपरीतेनैव मन्त्रवर्णैनैकैकेन संपुटितानामुपरितनानां दशपदानां समावेशः एकादशे कोष्ठे । द्वादशे तूर्वरितं वर्णद्वयं । ततोऽमुकस्य रक्षां मध्ये पार्श्वयोः कुरुकुरु । तदेव वर्णद्वयं विपरीतं लिखेत् । एवमेकविंशतिकोष्ठानां विनियोगः ।

---

१ षष्ठीं स्वाहेति । २ गुलकीकृत्य ।

Scanned with CamScanner

तदेव द्वादशवर्णात्मकं मन्त्रं दर्शयति स्वेत्यादिना । सौवर्ण इत्यादि यन्त्रशक्तिः प्रतिष्ठितेत्यन्तं स्पष्टम् । तत्र यावज्जीवमित्यादि ताम्रपत्रक इत्यन्तं सर्वयन्त्रसाधारणम् । एतामित्यादिश्लोकषट्कं यन्त्राद्बहिःस्थले वृत्तं यथा भवति तथा लिखेत् । शेषं स्पष्टम् ॥ न सन्ति गुरवो यस्य नैव दीक्षाविधिक्रमः । रामरक्षां वदन्नेव तुलसीदलमर्पयेत् । दीक्षान्तरशतेनापि न तत्फलमवाप्यते ॥ इत्यगस्त्येनोक्तत्वात् रामरक्षासमं न ह्यन्यत् । प्रादक्षिण्यक्रमेण चेति चकारसूचितार्थं ग्रन्थान्तरोक्तं द्रष्टव्यम् । हसौंयन्त्रस्य जीवः स्यान्मध्यबीजादधो न्यसेत् । हंसःसोहमिति प्राणमीशान्यादिक्रमाल्लिखेत् ॥ ईं नेत्रे न्यसेत्पार्श्वे उंऊं श्रोत्रे तथैव च । विशेषोऽष्टदलादौ तु गायत्रीलेखने स्मृता ॥ यन्त्रराजाय विद्महे वरप्रदाय धीमहि । तन्नो यन्त्रः प्रचोदयात् ॥ इत्यर्णान्मन्त्रगायत्र्याः प्रतियन्त्रं त्रिशो लिखेत् । अग्रे यथावकाशेन प्रतिष्ठां प्राणदां लिखेत् ॥ प्रयोगसारे—भूमिस्पृष्टं शवस्पृष्टं श्लिष्टं निर्माल्यसंगतम् । दग्धमालिङ्गितं शीर्णं यन्त्रं जातु न धारयेत् ॥ इति सर्वयन्त्रसाधारणक्रमः । इत्यष्टमं यन्त्रम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्मुकुन्दवनश्रीचरणशिष्यानन्दवनविरचितायां रामार्चनचन्द्रिकायां चतुर्थः पटलः ॥ ४ ॥

अथ पञ्चमः पटलः ५

अथ चैत्रमासादिकृत्यानि ॥ तत्रादौ दोलोत्सवः ॥ चैत्रादिमासकृत्यं यदधुना तत्प्रकाश्यते । रामभक्तस्य सिद्ध्यर्थं यदुक्तं नारदादिभिः ॥ मधौ शुक्लतृतीयायां जानकीरमणं

Scanned with CamScanner

प्रभुम्। राजोपचारैः संपूज्य मासमान्दोलयेत्कलौ ॥ दक्षिणाभिमुखं देवं दोलमानं सुरेश्वरम्। सुपूजितं सकृद्दृष्ट्वा सर्वपापैः प्रमुच्यते ॥ चैत्रमासे सिते पक्षे तृतीयायां रमापतिम्। दोलारूढं समभ्यर्च्य मासमान्दोलयेत्कलौ ॥ दोलारूढं प्रपश्यन्ति ये रामं मधुमाधवे। अपराधसहस्रेभ्यो[1] मुच्यन्ते नात्र संशयः ॥ दोलारूढस्य देवस्य येऽग्रे कुर्वन्ति जागरम्। सर्वपुण्यफलावाप्तिर्निमिषे निमिषे भवेत् ॥ इति गारुडे दोलोत्सवः ॥

अथ रामनवमीमहिमा ॥ चैत्रशुक्लनवम्यां तु कर्तव्यं व्रतमुत्तमम्। अगस्त्यसंहितायां यैन्माहात्म्यं[2] समुदीरितम् ॥ श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका। तस्मिन्दिने महापुण्ये राममुद्दिश्य भक्तितः ॥ यत्किंचित्क्रियते कर्म तद्भवेदक्षयं[3] ध्रुवम्। उपोषणं जागरणं पितॄनुद्दिश्य तर्पणम् ॥ तस्मिन्दिने तु कर्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः। राम एव परं ब्रह्म तद्दिनं रामतोषणम् ॥ इत्यादि रामनवमीमहिमा ॥

अथ रामनवमीव्रतनित्यता ॥ नित्यं नैमित्तिकं काम्यं व्रतं त्रेधा[4] विचार्यते। निष्कामानां विधानात्तन्न काम्यं तावदिष्यते ॥ मुमुक्षवोपि हि सदा श्रीरामनवमीव्रतम्। न त्यजन्ति सुरश्रेष्ठो देवेन्द्रोपि विशेषतः ॥ इति ॥ सदापदस्य ग्रहणादेतत्स्तुतिपरं नहि। नैमित्तिकं च न तथा सदेति श्रूयते यतः ॥ यावज्जीवविभाव्यत्वं सदास्यार्थो न चान्यथा ॥ चैत्रमासे नवम्यां तु शुक्लपक्षे रघूत्तमः। प्रादुरासीत्पुरा ब्रह्म परं ब्रह्मैव केवलम् ॥ तस्मिन्दिने तु कर्तव्यमुपवासव्रतं[5] सदा ॥ इति।

---

१ सहस्रैस्तु मुक्तासो। २ यन्महत्त्वं। ३ तद्भवेदक्षयं ध्रुवम्। ४ चेति। ५ मुपवासं सदैव हि।

Scanned with CamScanner

नित्यमेव भवेत्तस्माच्छ्रीरामनवमीव्रतम् ॥ नन्वस्य स्यान्न नित्यत्वं प्रत्यक्षत्वात्फलश्रुतेः । सूर्यग्रहे कुरुक्षेत्रे महादानैः कृतैर्मुहुः । तत्फलं समवाप्नोति श्रीरामनवमीव्रतात् ॥ इति ॥ मैवं फलश्रुतेर्नित्यलक्षणाभावतोऽथ वा । नित्यता तंत्र नाद्योऽग्निहोत्रादौ च विरोधतः ॥ नान्त्योऽप्यकरणे ह्यस्य महादोषश्रुतेः स्फुटम् ॥ प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः । उपोषणं न कुरुते कुम्भीपाकेषु पच्यते ॥ यश्च रामनवम्यां तु भुङ्क्ते मोहाद्विमूढधीः । कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः ॥ इत्यादि ॥ अतः स्वीकरणे दोषविध्वंसान्नित्यता स्थिता ॥ कुर्याद्रामनवम्यां य उपोषणमतन्द्रितः । मातुर्गर्भं न चाप्नोति स वै रामो भवेत्स्वयम् ॥ तस्मात्सर्वात्मना सर्वैः कृत्वैव नवमीव्रतम् । मुच्यन्ते सर्वपापेभ्यो यान्ति ब्रह्म सनातनम् ॥ इति पापक्षयद्वारा मोक्षार्थत्वं च गम्यते । न संयोगपृथक्त्वेन विरुद्धे फलनित्यते ॥ नित्यानामपि दर्शादियागानां नित्यताश्रुतेः । नन्वर्थवादरूपं स्यात्फलं पापक्षयादिकम् । फलं स्यादर्थवादाय द्रव्यसंस्कारकर्मसु । इति न्यायात्तत्तु नैवं विधिबाधात्फले सति ॥ संस्कारत्वाङ्गकर्मत्वे न स्यातामिह कर्मणि । भूतभाव्युपयोगं हि द्रव्यं संस्कार्यमिष्यते ॥ नोपयुक्तः पुमानत्र शास्त्राद्वा नोपयोक्ष्यते । नाप्यङ्गत्वं प्रधानस्याश्रवणादिह कस्यचित् ॥ प्रधानफलसंबन्धि तद्योग्यङ्गमितिश्रुतेः । जुह्वादिवच्च कर्माङ्गद्रव्यत्वं नावकल्पते ॥ परार्थत्वनिदानं च तन्नैवात्र विकल्पते ॥ नन्वर्थवादहीनानां विधीनां विधिता कथम् । अर्थद्वयपरत्वे च वाक्यभेदः प्रसज्यते ॥ मैव-

---

१ तत्र वाचा । २ प्रतिज्ञायां तु नैवं स्याद्विधिबाधाफले सति । ३ स्थितेः ।

Scanned with CamScanner

मर्थद्वयं युक्तं रात्रिसत्रादियागवत् । तस्मात्पापक्षयद्वारा मोक्षार्थत्वाच्च नित्यता ॥ न्यायोपबृंहिताच्छास्त्रान्मन्तव्या न्यायवेदिभिः ॥ इति रामनवमीनित्यता ॥

अथ रामनवमीनिर्णयः ॥ सा च—शुद्धा विद्धेति भेदेन नवमी सा द्विधा मता । समा न्यूनाधिका चेति शुद्धापि नवमी त्रिधा ॥ पुनर्नक्षत्रसंयोगवियोगाभ्यां च षड्विधा ॥ समादिऋक्षयोगादिभेदैर्विद्धापि षड्विधा । एवं द्वादशधा भिन्ना नवमी तत्र निर्णयः ॥ महाफलप्रदा शुद्धा पुनर्वस्वृक्षयोगतः । चैत्रमासे नवम्यां तु जातो रामः स्वयं हरिः । पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्वकामदा[1] ॥ पुनर्वस्वृक्षयोगो हि स्वल्पोऽपि यदि दृश्यते । चैत्रशुक्लनवम्यां तु सा तिथिः सर्वकामदा ॥ श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका ॥ चैत्रशुक्ला तु नवमी पुनर्वसुयुता यदि । सैव मध्याह्नयोगेन महापुण्यतमा भवेत् ॥ विद्धाष्टम्या न कर्तव्या वैष्णवैर्विष्णुतत्परैः । उदये चाष्टमी किंचिन्नवमी संवृता[2] यदि । न कर्तव्या तु विद्धा सा पर्याप्ता पारणे दश (?) ॥ मेषं पूषणि संप्राप्ते लग्ने कर्कटकाह्वये । आविरासीत्स कलया कौसल्यायां परः पुमान् ॥ केवलापि सदोपोष्या नवमीशब्दसंग्रहात् । तस्मात्सर्वात्मना सर्वैः कर्तव्यं नवमीव्रतम् ॥ सर्वैरिति च सर्वेषामधिकारः प्रकाश्यते । विद्धैव चेद्दक्षयुक्ता व्रतं तत्र कथं भवेत् ॥ विद्धानिषेधश्रवणान्नवमी चेतिवाक्यतः । नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः । उपोषणं नवम्यां वै दशम्यामेव पारणम् ॥ इति ॥ वैष्णवानां

१ सर्वदा शुभा । २ संयुता ।

Scanned with CamScanner

विशेषात्तु तत्र विष्णुपरैरिति । दशम्यादिषु वृद्धिश्चेद्विद्धा त्याज्यैव वैष्णवैः ॥ तदन्येषां तु सर्वेषां व्रतं तत्रैव निश्चितम् । दशम्यामेव शब्देन दशमीं नैव लङ्घयेत् ॥ निश्चित्यैवं विचारेण नवमीव्रतमाचरेत् ॥ इति रामनवमीनिर्णयः ॥

अथ वैष्णवलक्षणम् ॥ वैष्णवैरितिवाक्याद्धि तेषां लक्षणमुच्यते । साङ्गं[1] समुद्रं सन्यासं सऋषिच्छन्ददैवतम् ॥ सदीक्षाविधि सध्यानं सयत्रं द्वादशाक्षरम् । अष्टाक्षरमथान्यं वा ये मत्रं समुपासते । ज्ञेयास्ते वैष्णवा लोके विष्ण्वर्चनरताः सदा ॥ सदीक्षाविधि सन्यासं मत्रराजं सयत्रकम् । सहस्राक्षरसंयुक्तं मूलव्यूहादिभेदतः ॥ पञ्चायतनरूपं वा ये विप्राः समुपासते । महावैष्णवसंज्ञास्ते महाविष्णोरतिप्रियाः ॥ न चलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे । न हरति न च हन्ति किंचिदुच्चैर्जितमनसं तमवेहि वैष्णवाग्र्यम्[2] ॥ इति पाद्मे ॥ त्रिभुवनविभवहेतवेऽप्यकुण्ठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् । न चलति भगवत्पदारविन्दाल्लवनिमिषार्धमपि यः स वैष्णवाग्र्यः ॥ इति भागवते ॥ इत्यादिवैष्णवलक्षणम् ॥

अथ व्रते प्रतिनिधिविचारः ॥ असामर्थ्ये शरीरस्येत्यादिन्यायपरिग्रहे । मन्वादिभिरतः प्रोक्तं न्याय्यमेकादशीव्रतम्[3] ॥ नित्यत्वादस्य विघ्ने तु कर्मणः समुपस्थिते । कारयेद्धर्मपत्नीं वा पुत्रं वा विधयान्वितम् ॥ हस्तपादादिवच्छिष्य इति शिष्टा वदन्ति च । पत्यौ जीवति नैव स्त्री उपोष्य व्रतमाचरेत् ॥ आव-

---

१ साङ्गं वा । २ विष्णुभक्तम् । ३ त्यादि सर्वं विलोकयेत् । न्यायमेकादशीगतं नित्यत्वादस्य कर्मणः ।

Scanned with CamScanner

श्यकत्वाद्भुञ्जीत नैव तत्रोपयुज्यते। अलंकारं पुष्पवस्त्रं गन्धा[1]क्षतानुलेपनम्। उपवासे न दुष्येत पुंष्पं स्त्रीणां तथाञ्जनम्। [2] सताम्बूलमताम्बूलं सभोजनमभोजनम्॥ मन्वादिमुनिभिः प्रोक्तं चतुर्विधमुपोषणम्॥ त्रिरात्रादि सताम्बूलमेकादश्याम-भोजनम्। अताम्बूलं च पक्षान्ते सभोजनमुदाहृतम्॥ एकभक्तेन नक्तेनायाचितेन हविष्यतः। पयोमूलफलैर्वापि बालवृद्धातुरः क्षिपेत्। हविष्यभोजनं स्नानं सत्यमाहारलाघवम्। अग्निकार्य-मधःशय्यां नक्तभोजी षडाचरेत्॥ अष्टैतान्यव्रतघ्नानि आपो मूलं फलं पयः। हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्॥ इति व्रते प्रतिनिधयः॥

अथ रामपूजा॥ सुतीक्ष्णमाह चागस्त्यः प्रकारः सोऽ-भिधीयते। क्रमेण योजयेत्सम्यक्सौकर्यार्थं व्रतार्थिनाम्॥ षडा-क्षरादिकै राममन्त्रैः स्यात्पूजनं यथा। सर्वेषां राममन्त्राणां मन्त्र-राजः षडक्षरः॥ तारकं ब्रह्म चेत्युक्तं तेन पूजा प्रकाश्यते। यद्वा पुरुषसूक्ताद्यैर्दीक्षाविधिमजानतः॥ वैदिकस्याप्यभावे तु नाममन्त्रैर्भवेद्ध्रुवम्॥

अथाष्टमीकृत्यम्॥ अष्टम्यां चैत्रमासस्य शुक्लपक्षे जिते-न्द्रियः। दन्तधावनपूर्वं तु प्रा[3]तःस्नायाद्यथाविधि॥ नद्यां तडागे कूपे वा ह्रदे प्रस्रवणेऽपि वा। ततः संध्यादिकं कुर्यात्सं-स्मरन्राघवं हृदि। गृहमागत्य विप्रेन्द्र कुर्यादौपासनादिकम्॥ दान्तं कुटुम्बिनं विप्रं वेदशास्त्ररतं सदा। श्रीरामपूजानिरतं सुशीलं दम्भवर्जितम्॥ विधिज्ञं राममन्त्राणां राममन्त्रैकसाधनम्।

---

१ गन्धधूपानुलेपनम्। २ पुण्यस्त्रीणां। ३ ततः स्नानं यथाविधि।

Scanned with CamScanner

आहूय भक्त्या संपूज्य वृणुयात्प्रार्थयन्निति। श्रीरामप्रतिमादानं करिष्येऽहं द्विजोत्तम। तत्राचार्यो भव प्रीत्या श्रीरामो हि त्वमेव मे॥ इत्युक्त्वाज्येन तं विप्रं स्नापयित्वा ततः स्वयम्। तैलेनाभ्यज्य च स्नायाच्चिन्तयन्राघवं हृदि॥ श्वेताम्बरधरः श्वेतगन्धमाल्यानि धारयेत्। अर्चितो भूषितश्चैव कृतमाध्याह्निकक्रियः॥ आचार्यं भोजयेत्पश्चात्सात्विकान्नैः सविस्तरम्। भुञ्जीत स्वयमप्येवं हृदि राममनुस्मरन्॥ नवम्या अङ्गभूतेन एकभक्तेन राघव। इक्ष्वाकुवंशतिलक प्रीतो भव भवप्रिय॥ इति निवेदनमन्त्रः॥ एकभक्तव्रती तत्र सहाचार्यो जितेन्द्रियः। शृण्वन् रामकथां दिव्यामहःशेषं नयेन्मुने॥ सायंसंध्यादिकाः कुर्यात्क्रिया राममनुस्मरन्। आचार्यसहितो रात्रावधःशायी जितेन्द्रियः। वसेत्सायं तथैकान्ते श्रीरामार्पितमानसः॥ आचार्यकरणेऽशक्तः स्वयं भुक्त्वा स्वपेत्सुखम्॥ इत्यष्टमीकृतम्॥

अथ नवमीकृत्यम्॥ तत्र व्रतसंकल्पः। ततः प्रातः समुत्थाय स्नात्वा संध्यामुपास्य च। प्रातः सर्वाणि कर्माणि शीघ्रमेव समापयेत्॥ उपोष्ये नवमीं त्वद्य यामेष्वष्टसु राघव। तेन प्रीतो भव त्वं मे संसारात्त्राहि मां हरे॥ इत्युपवासनियममन्त्रः॥ ततः स्वस्थमना भूत्वा विधिज्ञैः सहितोऽनघ। स्वगृहे चोत्तरे भागे यागमण्डपमाचरेत्॥ चतुर्द्वारं पताकाढ्यं सुवितानं सुतोरणम्। मनोरमं महोत्सेधं पुष्पाद्यैः समलंकृतम्॥ शङ्खचक्रहनूमद्भिः प्राग्द्वारे समलंकृतम्। गरुत्मच्छार्ङ्गबाणैश्च दक्षिणे समलंकृतम्॥ गदाखड्गाङ्गदैश्चैव पश्चिमे समलंकृतम्। पद्मस्वस्तिकनीलैश्च कौबेरे समलंकृतम्॥ मध्ये हस्तचतुष्काढ्यं वेदिकायुक्तमायतम्।

Scanned with CamScanner

प्रविश्य नृत्यगीतैश्च वाद्यैश्चापि सुसंयुतम् ॥ पुण्याहं वाचयेत्तत्र विद्वद्भिः प्रीतमानसैः । ततः संकल्पयेदेवं राममेवमनुस्मरन् ॥ अस्यां रामनवम्यां च रामाराधनतत्परः । उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि ॥ इमां स्वर्णमयीं रामप्रतिमां स्वप्रयत्नतः। श्रीरामप्रीतये दास्ये रामभक्ताय धीमते ॥ प्रीतो रामो हरत्वाशु पापानि सुबहूनि मे । अनेकजन्मसंसिद्धान्यभ्यस्तानि महान्ति च ॥ इति त्रिभिः संकल्पः ॥

अथ राममूर्तिलक्षणम् ॥ शक्ताऽशक्तात्यशक्तस्य मूर्तिनिर्माणमुच्यते । ततः स्वर्णमयीं रामप्रतिमां पलमानतः ॥ [पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश । सुवर्णाश्चैव चत्वारः पलमित्यभिधीयते ॥] निर्मितां द्विभुजां दिव्यां वामाङ्कस्थितजानकीम् । बिभ्रतीं दक्षिणकरे ज्ञानमुद्रां महामुने । वामेनात्मकरेणापि[1] देवीमालिङ्ग्य संस्थिताम् । सिंहासने राजतेऽत्र पलद्वितय[2]निर्मिते ॥ अशक्तो यो महाभाग तस्य वित्तानुसारतः । पलेनाथ तदर्धेन तदर्धार्धेन वा मुने ॥ ततोऽप्यशक्तौ रौप्येण कारयेद्रघुनन्दनम् । लोहेन निर्मितां वापि शिलया दारुणापि वा ॥ यद्वा लेप्यं विलेख्यं वा मातुरङ्कगतं हरिम् । कोमलाङ्गं विशालाक्षमिन्द्रनीलसमप्रभम् ॥ दक्षिणाङ्के दशरथं पुत्र[3]स्येक्षणतत्परम् । पृष्ठतो लक्ष्मणं देवं सच्छत्रं कनकप्रभम् ॥ पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ । अग्रेऽव्यग्रं हनूमन्तं रामानुग्रहकाङ्क्षिणम् ॥ वित्तशाठ्यमकृत्वैव मूर्तिं कुर्यात्प्रयत्नतः ॥ तथाच भविष्योत्तरे—विभवे सति यो मोहान्न कुर्याद्विधिविस्तरम् । न तत्फलमवाप्नोति देवद्रोही स उच्यते ॥ इति मूर्तिलक्षणम् ॥

१ करेणाराद्देवीं । २ पलद्वयविनिर्मिते । ३ पुत्रान्वेषणतत्परं ।

Scanned with CamScanner

अथ रामपूजासनादि ॥ आसनोपरि संविश्य न्यासजालं विधाय च। शङ्खं प्रपूजयेदग्रे गन्धपुष्पाक्षतादिभिः ॥ कलशं वामभागस्थं पूजाद्रव्याणि चादरात्। पाणिना प्रोक्षयेद्भक्त्या चात्मानं मन्त्रमुच्चरन् ॥

अथ सर्वतोभद्रप्रकारः ॥ विलिखेत्[1]सर्वतोभद्रं वेदिकोपरि सुन्दरम्। तिर्यगूर्ध्वगता रेखाः कुर्यादेकोनविंशतिः ॥ खण्डेन्दुस्त्रिपदः कोणे शृङ्खला पञ्चकोष्टका। एकादशपदा वल्ली भद्रं तु नवभिः पदैः ॥ चतुर्विंशपदा वापी परिधिर्विंशतिः पदैः। मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतम् ॥ सितेन्दुः शृङ्खला कृष्णा वह्नयो नीलेन पूरिताः। भद्रारुणाः सिता वाप्यः परिधिः पीतवर्णकः ॥ बाह्येऽन्तरदलेष्वेका कर्णिका पीतवर्णिका। खण्डेन्दुः शृङ्खला वल्ली वापी भद्रं तु पञ्चमम् ॥ परिध्या वेष्टितं पद्मं बाह्ये सत्वं रजस्तमः। सर्वव्रते समुद्दिष्टं सर्वतोभद्रमण्डलम् ॥ मध्ये ब्रह्माष्टासु दिक्षु सोमाद्या देवताः स्मृताः। लोकपालांश्च संस्थाप्य ग्रहांश्चैव यथाक्रमम् ॥ वायुसोमद्वयोर्मध्ये वसवोऽष्टौ तु कारयेत्। ईशानसोमयोर्मध्ये रुद्रानेकादशाथ वै ॥ ईशदेवेन्द्रयोर्मध्य आदित्यान्द्वादशालिखेत्। इन्द्राग्निमध्यभागे च अश्विनौ पूजयेत्ततः ॥ आग्नेययमयोर्मध्ये विश्वेदेवाः सपैतृकाः। याम्यनैर्ऋतयोर्मध्ये सप्तयक्षांश्च कारयेत् ॥ नैर्ऋत्यपाशिनोर्मध्ये नागान्भूतांश्च कारयेत्। वारुणवायव्ययोर्मध्ये गन्धर्वाप्सरसः कुरु ॥ वायुसोमद्वयोर्मध्ये रुद्रांस्तत्रैव कारयेत्। स्कन्दं नन्दीश्वरं शूलं सहदेवं च कारयेत् ॥ ब्रह्मसोमद्वयोर्मध्ये दक्षादिसप्तको गणः। ब्रह्मेन्द्रयोस्तथा मध्ये दुर्गा विष्णु-

---

१ सर्वतोभद्रमालिख्य।

स्तथैव। ब्रह्माग्निमध्ये च तथा स्वधां देवीं च कारयेत्। ब्रह्म-याम्यद्वयोर्मध्ये मरुतः सप्त वै कुरु॥ ब्रह्मणः पादमूले तु मेदिनीं तत्र कारयेत्। कावेरी नर्मदा चैव यमुना च सरस्वती॥ गङ्गा कृष्णा तथा गोदा पूज्याः सर्वाः ससागराः। क्षारक्षीरक्षौद्रसर्पिर्नीरेक्षुदधिसागराः॥ ब्रह्मजज्ञानमित्याद्यैर्मन्त्रैस्तास्तास्तु देवताः। गन्धपुष्पादिभिः पूज्या दद्याद्दीपांश्च सर्वतः॥ सर्वं भद्रमयं यस्मात्सर्वतोभद्रमीरितम्॥ इति सर्वतोभद्रम्॥

अथ प्रथमयामपूजादिकृत्यम्॥ मध्ये तीर्थोदकैः पूर्णं कुम्भं रत्नोदरं[1] शुभम्। चूतपल्लवपुष्पैश्च युक्तं संस्थाप्य चर्चितम्॥ सौवर्णे राजते ताम्रे पात्रे षट्कोणमालिखेत्॥ अलाभे बिल्वपीठे वा कलशोपरि संस्थिते[2]। स्थाप्योपरि वस्त्रयुग्ममच्छिन्नं सदृशं[3] ततः॥ दिव्यसिंहासनं तत्र स्थापयित्वार्चयेत्सुधीः। ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपीठात्मने नमः॥ इति मन्त्रेण तन्मध्ये कुर्युः पुष्पाञ्जलिं पुनः। (इति पीठार्चा) अर्घ्यपाद्यादिकं दद्यात्स्नानं पञ्चामृतेन च॥ लेप्यादौ नाभिषेकः स्याद् (अर्थादन्यमूर्त्यादावभिषेकः कार्यः) दद्याद्वस्त्रोपवीतकम्। ततः संस्थाप्य पीठे तं पूजां कुर्याद्यथाविधि॥ आवाहनं[4] स्थापनं च संनिधापनमेव च। सन्निरोधनमेवं स्यादवगुण्ठनमञ्जसा॥ तत्त-

---

१ रत्नाष्टकं। २ सुस्थिरे। ३ सुदशं। ४ आवाहन्यादिमुद्राप्रदर्शनीयमिदं सार्धपद्यं यद्यपि पूजारम्भ एव पीठपूजोत्तराव्यवहितस्थले अर्घ्यपाद्यादिकेत्यतः पूर्वमपेक्षितं तथाप्युपलब्धसर्वादर्शेष्वप्यत्रैव विन्यासाद्यथावस्थितमेव स्थापितमस्माभिः।

Scanned with CamScanner

न्मुद्राभिरेवं स्याद्देवं संप्रार्थ्य भक्तितः । नानारत्नविचित्राणि दद्यादाभरणानि च ॥ हिमाम्बुघृष्टं रुचिरं घनसारसमन्वितम् । गन्धं दद्यात्प्रयत्नेन सागरुं च सकुङ्कुमम् ॥ [यक्षकर्दमलक्षणं—कस्तूरिकाया द्वौ भागौ द्वौ भागौ कुङ्कुमस्य च । चन्दनस्य त्रयो भागाः कर्पूरस्यैक एव हि ॥ यक्षकर्दम इत्येष समस्तसुरवल्लभः ।] कह्लारकेतकीजातीपुन्नागाद्यैः प्रपूजयेत् ॥ चम्पकैः शतपत्रैश्च सुगन्धैः सुमनोहरैः । चूतपल्लवपुष्पैश्च दूर्वाभिस्तुलसीदलैः ॥ कोमलैर्बिल्वपत्रैश्च अशोककुसुमैस्तथा । [कौसल्यापूजा] रामस्य जननी चासि रामात्मकमिदं जगत् । अतस्त्वां पूजयिष्यामि लोकमातर्नमोस्तु ते ॥ [दशरथपूजा] नमो दशरथायेति पूजयेत्पितरं तथा । [आवरणक्रमेण पीठदेवतापूजा । ततोऽनुज्ञाप्य देवेशं परिवारान्समर्चयेत् ॥ पूर्वं षट्कोणकोणेषु हृदयादीनि षट् क्रमात् ॥ इति प्रथमावरणम् ॥ हनूमन्तं च सुग्रीवं भरतं च विभीषणम् । लक्ष्मणाङ्गदशत्रुघ्नान् जाम्बवन्तं दलादिषु ॥ इति द्वितीयावरणम् ॥ धृष्टिं जयन्तं विजयं सौराष्ट्रं राष्ट्रवर्धनम् । अकोपं धर्मपालं च सुमन्तं दलमध्यतः ॥ इति तृतीयम् ॥ दलाग्रे लोकपालांश्च ॥ इति चतुर्थ ॥ तदस्त्राणि तदग्रतः ॥ इति पञ्चमम् ॥ नाममन्त्रैर्नमस्कारचतुर्थीभ्यां प्रपूजयेत् । घण्टां च वादयन्धूपं दीपं चास्मै समर्पयेत् । भक्ष्यभोज्यादिना भक्त्या नैवेद्यं विधिनार्पयेत् ॥ आचामं च सुताम्बूलं महानीराजनं ततः । नमस्कुर्यात्ततः स्तोत्रैः स्तुत्वा वा प्रजपन्मनुम् ॥ शृण्वन् जयन्तीमाहात्म्यं दिव्यां

---

१ शक्तिनस्त्वेक एव हि । २ कमलैः । ३ ससुग्रीवं । ४ पालाख्यं । ५ नमस्कारचतुर्थीभ्यां नाममन्त्रैः प्रपूजयेत् ।

Scanned with CamScanner

रामकथां तथा। रामभक्तैः समं यामं नयेद्राममनुस्मरन्॥ इति प्रथमयामकृत्यम्॥

द्वितीययामकृत्यम्॥ शङ्खपात्रासनार्चां च कुर्याद्यामेष्वतन्द्रितः। यामे द्वितीये संप्राप्ते मध्याह्ने जन्म भावयेत्॥ उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां मधौ लग्ने कर्कटके पुनर्वसुयुते मेषं गते पूषणि। निर्दग्धुं निखिलाः पलाशसमिधो मेध्यादयोध्यारणेराविर्भूतमभूतपूर्वविभवं यत्किंचिदेकं महः॥ मत्वैवं वादयेद्वाद्यान्यर्घ्यं दद्याज्जगत्पतेः। फलपुष्पाम्बुसंपूर्णं गृहीत्वा शङ्खमुज्वलम्॥ अशोकचूतकुसुमैर्युक्तं च तुलसीदलैः॥ दशाननवधार्थाय धर्मसंस्थापनाय च। दानवानां विनाशाय दैत्यानां निधनाय च॥ परित्राणाय साधूनां जातो रामः स्वयं हरिः। गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघ॥ इत्यर्घ्यमन्त्रः॥ पुनः पुष्पाञ्जलिं दत्त्वा यामे यामेऽप्यतन्द्रितः। पूजयेद्विधिवद्भक्त्या दिवारात्रं नयेद्बुधः॥ इति नवमीकृत्यम्॥

अथ दशमीकृत्यम्॥ ततः प्रातः समुत्थाय स्नानसंध्यादिकाः क्रियाः। समाप्य विधिवद्रामं पूजयेत्पूर्ववन्मुने॥ ततो होमं प्रकुर्वीत मूलमन्त्रेण मन्त्रवित्। पूर्वोक्तपद्मकुण्डे वा स्थण्डिले वा यथाविधि॥ लौकिकाग्नौ विधानेन शतमष्टोत्तरं ततः। साज्येन पायसेनैव स्मरन् राममनन्यधीः॥ ततो भक्त्या सुसंतोष्य आचार्यं पूजयेन्मुने। कुण्डलाभ्यां सरत्नाभ्यामङ्गुलीयैरनेकधा॥ गन्धपुष्पाक्षतैर्वस्त्रैर्विचित्रैः सुमनोहरैः। ततो रामं स्मरन्दद्यादेवं मन्त्रमुदीरयेत्॥ रामप्रतिमादानमन्त्रः—इमां स्वर्णमयीं

Scanned with CamScanner

रामप्रतिमां समलंकृताम् । चित्रवस्त्रयुगच्छन्नां रामोऽहं राघवाय ते । श्रीरामप्रीतये दास्ये तुष्टो भवतु राघवः ॥ इति दत्त्वा विधानेन दद्याद्वै दक्षिणां भुवम् । अन्येभ्यश्च यथान्यायं गोहिरण्यादिशक्तितः ॥ दद्याद्वासोयुगं धान्यं यथाविभवमादृतः । ब्राह्मणैः सह भुञ्जीत तेभ्यो दद्याच्च दक्षिणाम् ॥ (पारणासंकल्पः) तव प्रसादस्वीकारः कृतं यत्पारणं मया । व्रतेनानेन संतुष्टः स्वस्मिन्भक्तिं प्रयच्छ मे ॥ इति पारणासंकल्पः ॥ कृत्वैवं ब्रह्महत्यादिपापेभ्यो मुच्यते ध्रुवम् । बहुना किमिहोक्तेन मुक्तिस्तस्य करे स्थिता ॥ कुरुक्षेत्रे महापुण्ये सूर्यपर्वण्यनेकशः । तुलापुरुषदानाद्यैः कृतैर्यल्लभ्यते फलम् । तत्फलं लभते मर्त्यो दानेनानेन सुव्रत ॥ इति दशमीकृत्यम् ॥

अकिंचनव्रतम् ॥ अकिंचनोऽपि नियतमुपोष्य नवमीदिने । कृत्वा जागरणं भक्त्या रामभक्तैः समन्वितः ॥ स्मरन्[2] रामं धिया भक्त्या पूजयेद्विधिवन्मुने । जपन् राममनुं मायारमानङ्गसमन्वितम् ॥ एकाक्षरं वा विधिवत्सर्वं न्यासकृतोन्नति । प्रातःसंध्यां च विधिवद्दिवासंध्यादिकाः क्रियाः ॥ गोभूतिलहिरण्यादि दद्यावित्तानुसारतः । श्रीरामचन्द्रभक्तेभ्यो विद्वद्भ्यः श्रद्धयान्वितः ॥ पारणं च प्रकुर्वीत ब्राह्मणैः सह शक्तितः । एवं यः कुरुते भक्त्या सर्वपापैः प्रमुच्यते । गङ्गायां प्रक्षिपेल्लेप्यां लेख्यां मूर्तिं गृहे न्यसेत् ॥ इत्यकिंचनव्रतम् ॥

अथ रामजयन्त्युद्यापनम् ॥ शक्तस्यैतद्व्रतं प्रोक्तमशक्तोद्यापनं च तत् । तदपि स्याद्यथाशक्त्या साङ्गं तु सकलं तदा ॥ एकामपि नरो भक्त्या श्रीरामनवमीं मुने । उपोष्य कृतकृत्यः

---

१ प्रीतस्त्वं । २ स्मरन् । ३ आर्षोयं प्रयोगः ।

स्यात्सर्वपापैः प्रमुच्यते ॥ अपिशब्दादशक्तस्य मूर्तेर्दानं तु सूचितम्। (इत्यकिंचनव्रतोद्यापनं) वर्षे वर्षेऽसमर्थस्य व्रतेनैव प्रपूर्णता। न तस्योद्यापनं किंचिद्व्रतादन्यद्विधीयते ॥ सर्वव्रतस्य पूर्त्यर्थमिदं रामव्रतं चरेत्। नान्येनास्याब्धिवत्पूर्तिरनेनैवास्य पूर्णता ॥ इति समर्थोद्यापनम् ॥ इत्यगस्त्यसंहितायां श्रीरामजयन्तीव्रतम् ॥

चैत्रद्वादश्यां दमनोत्सवः ॥ द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः। बौधायनादिभिः प्रोक्तः कर्तव्यः प्रतिवत्सरम् ॥ तत्र स्यात्स्वीयतिथिषु वह्न्यादेर्दमनार्पणम्। वह्निर्विरिञ्चिर्गिरिजा गणेशः फणी विशाखो दिनकृन्महेशः। दुर्गान्तको विश्व-हरिः स्मरश्च शर्वः शशी चेति तिथीषु[1] पूज्याः ॥ क्रियालोपविघातार्थं यन्मया विहितं प्रभो। न मे विघ्नो भवेदत्र कुरु नाथ दयां मयि ॥ सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः। उपवासेन त्वां देव तोषयामि जगत्पते ॥ कामक्रोधादयो ये ते न मे स्युर्व्रतघातकाः। अद्यप्रभृति देवेश यावद्वैशेषिकं दिनम्। तावद्रक्षा त्वया कार्या सर्वस्यास्य जगत्पते ॥ एवं विज्ञाप्य देवेशं गुरुपादौ प्रणम्य च। प्रातः स्नात्वा समभ्यर्च्य देवेशं विधिवत्ततः ॥ गच्छेद्दमनकारामंमेकादश्यां सुशोभितम्। क्रमेणादाय तत्रैव पूजयेच्चन्दनादिना ॥ नेष्यामि रामपूजार्थमिति संप्रार्थ्य तं नमेत्। उत्पाट्य पञ्चगव्येन प्रोक्ष्य प्रक्षाल्य वारिणा ॥ अशोकमूले गन्धाद्यैः स्थण्डिले पूजयेत्क्रमात्। अशोकं च तथा कालं वसन्तं काममेव च ॥ ॐ अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन। शोकार्तो हर मे नित्यमानन्दं जनयस्व मे ॥ अनेन पूजयेत्पुष्पैरशोकं शोकना-

१ दीर्घ आर्षः।

Scanned with CamScanner

शनम् ॥ त्रुट्यादिकालपर्यन्तः कालरूपो महाबलः । कलते चैव यः सर्वं तस्मै कालात्मने नमः ॥ १ ॥ अनेन पूजयेत्कालमक्षयं कलनात्मकम् ॥ २ ॥ वसन्ताय नमस्तुभ्यं वृक्षगुल्मलताप्रिय । सहस्रमुखसंवाह कामरूप नमोस्तु ते ॥ वसन्तपुष्पैरमुना मनुना कामरूपिणम् ॥ ॐ कामभस्मसमुद्भूत रतिबाष्पपरिप्लुत । ऋषिगन्धर्वदेवादिविमोहक नमोस्तु ते । संगृह्य दमनं पुण्यं पूजयेन्मनुनामुना ॥ ॐ नमोस्तु पुष्पबाणाय जगदाह्लादकारिणे । मन्मथाय जगन्नेत्रे रतिप्रीतिप्रीयाय ते ॥ दमनं चोपतिष्ठेत मन्त्रेणानेन मन्मथम् । दमनं तं पृथक्कृत्वा भागेनैकेन मन्मथम् ॥ पूजयेदुक्तमार्गेण परिवारसमन्वितम् । कामाय नम इत्येष मन्त्रस्तु प्रणवादिकः ॥ मन्त्रेणानेन दमनं पूजयेद्गन्धपुष्पकैः । धौतेन वाससाच्छाद्य निधाय पटले नवे । घण्टापुरुषसूक्तादिस्वनैः स्वगृहमानयेत् ॥ इति गृहानयनम् । वक्ष्यमाणप्रकारेण दमनं चाधिवासयेत् । निशायां रामचन्द्राग्रे कुर्याद्दृष्टदलं शुभम् ॥ व्यक्तं सितासितारक्तपीतवर्णप्रपूरितम् । चतुष्कोणं बहिः कृत्वा पीतवर्णेन पूरयेत् । तद्बाह्ये श्वेतपीताद्यैर्वर्तुलं मण्डलत्रयम् । तद्बाह्ये स्याच्चतुष्कोणं रक्तवर्णेन पूरितम् । सर्वकामिकमेतद्धा सर्वतोभद्रमुद्धरेत् । कुम्भं पुण्याम्बुनापूर्य हेमरत्नयुतं शुभम् । संस्थाप्य तस्मिन् रामाग्रे दमनं तत्र पूजयेत् । वितानं पञ्चवर्णाढ्यमाबध्य सुमनांसि च । निर्माय महतीं पूजां कुर्यात्तदधिवासनम् । पूजार्थं देवदेवस्य विष्णोर्लक्ष्मीपतेः प्रभोः । दमन त्वमिहागच्छ[1] सान्निध्यं कुरु ते नमः ॥ इत्यावाहनमन्त्रः ॥ ॐ क्लीं कामदेवायनमः ॐ श्रींह्रींरत्यैनमोस्त्विति ।

१ मिहागत्य ।

दिक्षु स्मरशरीरायानङ्गाय च नमोनमः। ॐ मन्मथाय रामाय क्लीं वसन्तसखाय च। स्मराय चेक्षुचापाय पुष्पास्त्रायेति पूजयेत्। ॐ तत्स्वरूपाय विद्महे कामदेवाय धीमहि। तन्नोऽनङ्गः प्रचोदयात्। इति मन्मथगायत्र्या सममष्टोत्तरं शतम्। धूपदीपैश्च नैवेद्यैरुपचारैः प्रपूजयेत्। हार्देन मनुना पुष्पाञ्जलिं दत्त्वाभिवन्दयेत्॥ नमोस्तु पुष्पबाणाय जगदाह्लादकारिणे। मन्मथाय जगन्नेत्रे रतिप्रिय नमोस्तु ते॥ इति॥ आमन्त्रितोसि देवेश पुराणपुरुषोत्तम। प्रातस्त्वां पूजयिष्यामि सान्निध्यं[1] कुरु केशव॥ क्षीरोदधिमहानागशय्यावस्थितविग्रह। प्रातस्त्वां पूजयिष्यामि सन्निधौ भव ते नमः॥ निवेदयाम्यहं तुभ्यं प्रातर्दमनकं शुभम्। सर्वथा सर्वदा विष्णो नमस्तेस्तु प्रसीद मे॥ इत्थमामन्त्र्य देवेशं दत्त्वा पुष्पाञ्जलिं पुनः। पूजितं तद्दमनकं कुम्भस्योपरि संस्थितम्॥ अस्त्रेण सर्वतो रक्षेत्कवचेनावगुण्ठयेत्। रक्षेद्वा चक्रमन्त्रेण नृहरेर्मनुनाथ वा॥ ब्राह्मणेभ्यो नमस्कृत्य गुरुपादौ प्रणम्य च। गीतमङ्गलनिर्घोषैः कुर्याज्जागरणं ततः। इत्यधिवासनम्॥ ॥ प्रातर्नत्वाथ देवेशं कुर्यात्स्नानं यथाविधि। नित्यपूजां ततः[2] कृत्वा कुर्यान्नैमित्तिकीं ततः॥ दमनं दूर्वया युक्तं गन्धाक्षतसमन्वितम्। जयमङ्गलनिर्घोषैर्देवदेवे समर्पयेत्॥ देवदेव जगन्नाथ वाञ्छितार्थप्रदायक। हृदिस्थान्पूरयेः कामान्मम कामेश्वरप्रिय॥ इमं दमनकं देव गृहाण मदनुग्रहात्। इमां सांवत्सरीं पूजां भगवन्परिपूरय॥ मूलसंपुटितो ह्येष दमनारोपणे मनुः। एवं समर्प्य देवाय प्रार्थयेद्विष्णुमव्ययम्॥ मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः। इयं

१ सान्निध्यं कुरु ते नमः। २ पृथक्कृत्वा।

Scanned with CamScanner

सांवत्सरी पूजा तवास्तु गरुडध्वज ॥ वनमालां यथा देव कौस्तुभं सततं हृदि । तद्वद्दामनकीं मालां पूजां च हृदये वह ॥ जानताऽजानता वापि न कृतं यत्तवार्चनम् । तत्सर्वं पूर्णतां यातु त्वत्प्रसादाद्रमापते ॥ जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन । नमस्तेस्तु हृषीकेश महापुरुष पूर्वज ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन । यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ एवं संप्रार्थ्य देवेशं निपतेद्दण्डवद्भुवि । अथ संपूजयेद्भक्त्या गुरुं वस्त्रादिकाञ्चनैः ॥ स्वयं भुक्त्वाभ्यर्च्य बन्धून्विप्रान्संभोज्य पारयेत् । स्यादश्वमेधजं पुण्यमित्याह भगवाञ्छिवः ॥ इति दमनारोपणम् ॥ पारणाहे न लभ्येत द्वादशी घटिकापि चेत् । तदा त्रयोदशी ग्राह्या पवित्रदमनार्पणे ॥ इति चैत्रकृत्यम् ॥

अथ वैशाखज्येष्ठयोः कृत्यम् ॥ माधवे[1] दमनारोपः स्यान्मधौ विघ्नतो यदि । वैशाख्यां श्रावणे भाद्रे कर्तव्यं वा तदर्पणम् ॥ वैशाखे पौर्णमास्यां तु जलस्थं जगदीश्वरम् । शुक्लस्यैकादशी यावत्पूजयेत्सुप्रहर्षितः ॥ तथाच गारुडे—निक्षिप्य जलपात्रे तु मासे माधवसंज्ञिते । माधवं येऽर्चयिष्यन्ति देवतास्ते नरा भुवि ॥ स्वर्णपात्रे तथा रौप्ये ताम्रे वा मृन्मयेऽथवा । तोयस्थमर्चयेद्देवं शालग्रामसमुद्भवम् । प्रतिमां वा महाभाग तस्य पुण्यमनन्तकम् । तस्माज्ज्येष्ठे सदा भूप तोयस्थं पूजयेद्धरिम् । वीततापे नरस्तिष्ठेद्यावदाभूतसंप्लवम् ॥ इति ॥ ज्ञेयः कालविकल्पोऽयमुष्णस्य तारतम्यतः । गन्धोदकयुते पात्रे नित्यपूजां समाप्य च ॥ आवाह्य च दिने रात्रौ देवं नीत्वा निजासनम् । पञ्चोपचारैः संपूज्य तीर्थं प्राश्य विसर्जयेत् । आ-

1 माघे ।

स्नानं गृहदारादींस्तेन तीर्थेन सेचयेत्। द्वादश्यां तु जले रात्रावर्चयेद्गारुडोक्तितः। द्वादश्यां पूजयेद्रात्रौ जलस्थं जलशायिनम्। इति ॥ इति वैशाखज्येष्ठयोः कृत्यम् ॥

अथाषाढकृत्यम् ॥ आषाढशुक्लद्वादश्यां क्षीराब्धिशयनोत्सवः। कार्योऽन्यथा त्वनावृष्टिर्भवेत्पौराणवाक्यतः ॥ भविष्ये—मिथुनस्थे सहस्रांशौ स्वापयेन्मधुसूदनम्। तुलाराशिं गते तस्मिन्पुनरुत्थापयेत्प्रभुम् ॥ इति ॥ गारुडे—मिथुनस्थे सहस्रांशौ न स्वापयति यो हरिम्। वैष्णवैः सह संभूय ह्यनावृष्टिस्तदा भवेत् ॥ इति ॥ भविष्योक्तप्रकारस्तु प्रोच्यते शयनोत्सवे। पारणाहे पूर्वरात्रौ घण्टादीन्वादयन्बहु ॥ विधाय महतीं पूजां विष्णुमभ्यर्च्य वैष्णवान् ॥ इति।

अथ तप्तमुद्राधारणविधिः ॥ शौनकोक्तप्रकारेण तप्तमुद्राङ्कधारणम्। कर्तव्यं वैष्णवैः सर्वैः संप्रदायानुरोधतः ॥ अतप्ततनूर्न तदामो अश्नुते श्रुतास इद्बृहन्तस्तमाशत। तपोष्पवित्रं विततं दिवस्पदे शोचन्तो अस्य तन्तवो व्यस्थिरन्। इति ऋग्वेदे ॥ सहोवाच याज्ञवल्क्यस्तस्मात्पुमानात्महिताय श्रेय्सा हरिं भजेत् सुश्लोकमौलेर्वर्माण्यग्निना संदधते ॥ इति शतपथश्रुतिः ॥ प्रतद्विष्णो अजचक्रे सुतप्ते जन्माम्भोधिं तर्तवे चर्षणीन्द्राः। मूले बाह्वोरदधन्ये पुराणा लिङ्गान्यङ्गे तप्तायुधान्यर्पयन्त ॥ इति सामवेदे ॥ उरुक्रमस्य चिह्नैरङ्किता उत्तमं लोकं सुभगा भवाम। इत्यथर्ववेदे ॥ अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा। ब्राह्मणस्य तथैवेदं तप्तचक्रादिधारणम् ॥ इति ॥ पाद्मे—श्रुतिस्मृतिशतैरुक्तस्तत्प्रकारः प्रतन्यते। बह्वृचपरिशिष्टेथ

१ पावयेत्। २ शातपथी।

Scanned with CamScanner

प्रोक्तो यः शौनकादिभिः। षोडशोपचारैर्भगवन्तमभ्यर्च्य। ऋचो अक्षरे परमे व्योमन् यस्मिन्देवा अधिविश्वे निषेदुः। यस्तं न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते॥ शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः। इत्येताभ्यां चक्रं शङ्खं चाभ्यर्च्य। द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परिद्यामृतस्य। आ पुत्रा अग्ने मिथुनासो अत्र सप्तशतानि विंशतिश्च तस्थुः॥ अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पाञ्चजन्यं बहवः समिन्धते। विश्वस्यां विशि प्रविविशिवा ꣳ समीमहे स नो मुञ्चत्वꣳहसः॥ इत्येताभ्यामग्नावादध्यात्॥ वैश्वानरस्य सुमतौ स्याम राजा हिकं भुवनानामभिश्रीः। इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण॥ इत्यग्निं परिषिञ्चेत्। पुरुषसूक्तेन षोडशाहुतीर्हुत्वा भगवन्तं पुरुषसूक्तेनोपस्तुत्य। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये॥ इति पुरतो दण्डवन्निपतेत्॥ अथ—सुदर्शन महाज्वाल सूर्यकोटिसमप्रभ। अज्ञानान्धस्य मे नित्यं विष्णोर्मार्गं प्रदर्शय॥ इति सुदर्शनमावाह्य। सुदर्शनाय विद्महे महाज्वालाय धीमहि। तन्नश्चक्रः प्रचोदयात्। इति चक्राधानम्॥ पाञ्चजन्य निजध्वानध्वस्तपातकसंचय। पाहि मां पापिनं घोरं संसारार्णवपातिनम्॥ इति शङ्खमादाय। पाञ्चजन्याय विद्यहे पावमानाय धीमहि। तन्नो शङ्खः प्रचोदयात्॥ इति शङ्खाधानम्॥ य एवं कुरुते विद्वा-

Scanned with CamScanner

न्ब्राह्मणः श्रोत्रियः शुचिः। सर्वपापैः प्रमुच्येत विष्णुलोकं स गच्छति॥ शयन्यां चैव बोधिन्यां चक्रतीर्थे तथैव च। शङ्ख-चक्रविधानेन वह्निपूतो भवेन्नरः॥ इति तप्तमुद्राधारणविधिः॥

अथ रामशयनविधिः॥ नीराज्य नरयानेष्वारोप्य रामं सवैष्णवैः। गीतवादित्रघोषेण देवं नीत्वा जलाशयम्॥ पुष्पाञ्जलिं प्रदायाथ यानादुत्तारयेत्प्रभुम्। तीरेऽङ्घ्रिन्यासमाशास्य हस्तं दत्वोपवेशयेत्॥ धौताङ्घ्रिपाणिराचान्तः कुर्यात्संकल्पमादृतः। न्यासं कृत्वाथ देवे च स्वर्णघर्मानुवाकतः॥ तथा पुरुषसूक्तेनोत्तर-नारायणेन च। पञ्चामृतेन संस्नाप्य पूज्याभ्यर्च्य रघूत्तमम्॥ अतोदेवेति मन्त्रेण जले प्रस्तापयेत्प्रभुम्। शेषपर्यङ्कवर्येऽस्मिन्फणा-मणिगणामले। श्वेतद्वीपान्तरे देव कुरु निद्रां नमोस्त्विति॥ अथ कृत्वा महापूजां गन्धस्रग्धूपदीपकैः। अन्नताम्बूलनृत्याद्यैराशा-स्यानुग्रहं हरेः॥ सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदम्। विबुद्धे च विबुध्येत प्रसन्नो मे भवाव्यय॥ इति संप्रार्थ्य तस्याग्रे गृह्णीयान्नियमानिमान्॥

अथ चातुर्मास्यनियमाः॥ श्वेतद्वीपे भोगिनाथे योगि नाथे स्थिते त्वयि। चातुर्मास्यव्रतेऽनुज्ञां देहि लक्ष्मीपते मम। लब्ध्वानुज्ञां शङ्खहस्तो यथा प्रोषितभर्तृका। चतुरो वार्षिका न्मासान्राघवोत्थापनावधि। इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत॥ इदं व्रतं मया देव गृहीतं पुरतस्तव। निर्विघ्नं सिद्धि मायातु प्रसादात्ते रमापते॥ गृहीतेऽस्मिन्व्रते देव पञ्चत्वं यदि मे भवेत्। तदा भवतु संपूर्णं प्रसादात्ते रघूद्वह॥ इत्यभ्यर्च्य देवाय शङ्खेनार्घ्यं निवेदयेत्॥ (शाकव्रतम्) श्रावणे वर्जयेच्छाक

१ रमापते।

Scanned with CamScanner

दधि भाद्रपदे तथा। दुग्धमाश्वयुजे मासि कार्तिके चामिषं त्यजेत्॥ (आमिषगणः) प्राण्यङ्गचूर्णं चर्माम्बु जम्बीरं बीजपूरकम्। अयज्ञशिष्टमन्नाद्यं यद्विष्णोरनिवेदितम्॥ दग्धमन्नं मसूरं च माषं चेत्यष्टधामिषम्॥ रुच्यं तत्तद्देशलभ्यं फलमूलादि वर्जयेत्॥ निष्पावान्राजमाषांश्च मसूरं सन्धितानि च। वृन्ताङ्कं च कलिङ्गं च सुप्ते देवे न भक्षयेत्॥ इति स्मृतेः॥ चतुर्ष्वपि[1] च मासेषु हविष्याशी न पापभाक्॥ (हविष्याणि) हैमन्तिकं सिताखिन्नं धान्यं मुद्गयवास्तिलाः। कलायकङ्गुनीवारा वास्तुकं हिलमोचिका॥ षष्टिकं कालशाकं च मूलं च क्रमुकेतरत्। कन्दं सैन्धवसामुद्रे गव्ये च दधिसर्पिषी॥ पयोऽनुद्धृतसारं च पनसाम्रहरीतकी। पिप्पली जीरकं चैव नागरं चापि तिन्तिणी[2]॥ कदली लवली धात्री फलान्यगुडमैक्षवम्। अतैलपक्वं मुनयो हविष्याणि प्रचक्षते॥ अन्यान्यपि पुराणेषु द्रष्टव्यानि व्रतानि तु। ततः स्तुत्वा प्रजापाले राजन्याशास्य मङ्गलम्॥ शङ्खतीर्थं च संप्राश्य गीतनृत्यादिना हरिम्। परितोष्याथ संपूज्य वैष्णवान्नरयानकम्। भगवन्तं समारोप्य गीतवादित्रघोषतः॥ आगत्य मन्दिरं[3] कृत्वा महानीराजनं प्रभोः। विसृज्य वैष्णवान्देवमुपवेश्य सुखं स्वपेत्॥ इत्याषाढमासकृत्यम्॥

अथ श्रावणकृत्यम्॥ तत्र पवित्रारोपणम्॥ श्रावणस्य सिते पक्षे द्वादश्यां शौनकादिभिः। उक्तः सदा प्रकर्तव्यः पवित्रारोपणोत्सवः॥ तथा च बह्वृचपरिशिष्टे—स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः। हरेश्च प्रीतिमाप्नोति यः पवित्रं समाचरेत्॥ विधिना शास्त्रदृष्टेन यो न कुर्यात्पवित्रकम्। हरन्ति

१ चतुर्ष्वपीह। २ तिन्तिडी। ३ मन्दिरे।

Scanned with CamScanner

राक्षसास्तस्य सर्वं पूजादिकं बलात् ॥ इति। पाद्मे—ऊर्जे व्रतं मधौ दोला श्रावणे तन्तुपूजनम्। चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः ॥ इति ॥ पवित्रारोपणं विघ्नाच्छ्रावणे न भवेद्यदि। कार्तिक्यवधि तूलार्के कर्तव्यमिति नारदः ॥ इति पवित्रनित्यता ॥

अथ पवित्रोत्पत्तिकथा ॥ प्रयोगसारादुत्पत्तिः पवित्रस्य प्रतन्यते। कनीयान्वासुकेर्नाम्ना पवित्रो नाम सर्पराट् ॥ निराहारव्रतो भूत्वा दैविकं शरदां शतम्। तपस्तेपे समाश्रित्य देवदेवं महेश्वरम् ॥ प्रसन्नस्तपसा तस्य पुरस्तात्पुरुषोत्तमः। प्रणतार्तिहरः शुम्भुराविरासीदुमापतिः ॥ प्रसादाभिमुखं दृष्ट्वा देवं स भुजगेश्वरः। कण्ठाभरणतां प्राप्तुं वव्रे वरमनुत्तमम् ॥ तथेत्याभाष्य तं तद्वद्वारयंस्त्रिपुरान्तकः। प्रादात्तस्मै वरं चान्यं पवित्रायात्मयोगिने ॥ ये त्वां न बहु मन्यन्ते यथा संभावितो मया। जपहोमादिकं तेषां फलं त्वामेतु निश्चयात् ॥ अत्रैव श्रावणे मासि नक्षत्रे चापि वैष्णवे। तस्मादाराधयन्तु त्वां नित्यनैमित्तिकोद्यताः ॥ वैदिकाः सक्तुहोमेन पूजा कुर्वन्तु तेऽनघ। त्वत्साहश्यानुकारेण निवीतेनैव तान्त्रिकाः ॥ आराध्यारोप्य पूजायै देवतायै पवित्रकम् ॥ इति पवित्रोत्पत्तिकथा ॥

पवित्रलक्षणम्। नानागमोक्तमार्गेण तस्य कर्तव्यतोच्यते ॥ हेमरूप्यताम्रक्षौमैः सूत्रैः कौशेयपद्मजैः। कुशैः काशैश्च कार्पासैर्ब्राह्मणीकर्तृकैः शुभैः ॥ कन्यया वा पवित्रं स्यान्न पुंश्चल्यादिभिः कृतैः। स्नात्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत् ॥ हृन्मन्त्रेण पञ्चगव्यैरद्भिः प्रक्षालयेत्पुनः। मूलेनाष्टोत्तरशतं गायत्र्या रामसंज्ञया ॥ शङ्खोदकेनाभिमन्त्र्य पवित्राणि विनिर्ममेत्। दुग्ध-

१ फलम्। २ शुक्रार्के। ३ वैदिकं। ४ ब्राह्मण्या कर्तितैः। ५ लयेत्ततः।

दध्याज्यविण्मूत्रैः[1] पञ्चगव्यक्रमं विदुः ॥ आप्यायस्व दधिक्राव्णस्तेजोसीति[2] यथाक्रमम् । गायत्र्यन्ते गन्धद्वारां मन्त्राः स्युः पञ्चगव्यके ॥ मधुवातेति गायत्री[3] क्रमः पञ्चामृतेऽप्ययम् ॥ इति सूत्रशुद्धिः ॥ तत्रोत्तमं पवित्रं तु षष्ट्या सह शतैस्त्रिभिः । सप्तत्या सहितं द्वाभ्यां[4] पवित्रं मध्यमं स्मृतम् ॥ साशीतिना शतेनैव कनिष्ठं तत्समाचरेत् । अष्टोत्तरतदर्धेन[5] नवसूत्रीक्रमेण वा ॥ जानूरुनाभिपर्यन्तमुत्तमादित्रयं भवेत् । अष्टोत्तरसहस्रेण वनमालां[6] समाचरेत् ॥ उत्तमस्य पवित्रस्य द्वैगुण्येनापि वा भवेत् ॥ आरभ्य मुकुटं यावत्सूत्रैर्विरचिता शुभा । आपादलम्बिनी माला वनमाला प्रकीर्तिता[7] ॥ यजमानपवित्रं चाधिवासनपवित्रकम् । कनिष्ठेन समं कार्यं मध्यमेन समं गुरोः ॥ अग्नेः पवित्रं कुर्वीत मध्यमेन समं शुभम् । साधारणपवित्राणि त्रिभिः सूत्रैः समाचरेत् ॥ उत्तमं तु शतग्रन्थि पञ्चाशद्ग्रन्थि मध्यमम् । कनिष्ठं तु पवित्रं स्यात्षट्त्रिंशद्ग्रन्थि शोभिनम्[8] ॥ षट्त्रिंशच्च चतुर्विंश द्वादशेति च केचन । चतुर्विंशद्द्वादशाष्टावित्येके मुनयो विदुः ॥ अङ्गुष्ठपर्वमात्रं तु कुर्याद्ग्रन्थिमथोत्तमे ॥ तदर्धेन तदर्धेन मध्यमे च कनिष्ठिके । ग्रन्थीन्कुर्वीत सर्वत्र सुवृत्तान्सुमनोहरान् ॥ न वै विषमसंख्याकान्ग्रन्थीन्कुर्वीत कुत्रचित् । विशोभसूत्रदानेन कर्तुः स्यादशुभं फलम् ॥ पवित्रं परया भक्त्या तस्मात्कुर्वीत शोभनम् । कुङ्कुमं

---

१ विट्शब्देनात्र गोमयग्रहणं । २ तेजोसि शुक्रमस्यथ । ३ गायत्र्या । ४ सताभ्यां । ५ तदर्धार्धं । ६ नवमालां । ७ वनमालालक्षणमन्यत्रेत्थम्—तुलसीकुन्दमन्दारपारिजाताम्बुजैस्तु या । पञ्चभिर्ग्रथिता माला वनमाला प्रकीर्तिता ॥ इति ॥ ८ शोभनम् ।

Scanned with CamScanner

रोचनं चैव कर्पूरेण विमिश्रितम्। तेन संरज्य तत्सूत्रमष्टाक्षराभिमन्त्रितम्॥ ततोऽभिमन्त्रणं कुर्यादिदंविष्णुश्च मन्त्रतः। द्वादशाक्षरमन्त्रो यः सर्वसाधारणः स्मृतः॥ त्रिस्त्रिरुत्तमसूत्रे स्यात्तद्वदेवाधिवासके। द्विर्मध्यमेपि मन्त्रः स्यात्कनिष्ठे तु सकृत्स्मृतः॥ इति पवित्रलक्षणम्॥

अथ पवित्राधिवासनम्। ततस्तानि पवित्राणि वैष्णवे पटले शुभे। संस्थाप्य शुचिवस्त्रेण पिधाय पुरतो न्यसेत्॥ अरत्निसंमितां वेणीं कुर्यात्षट्त्रिंशता कुशैः। मन्त्रयेन्मूलमन्त्रेण पञ्चगव्येन शोधयेत्॥ तां तु कक्षान्तरे कृत्वा मानसं स्नानमाचरेत्॥ स्वयं तु भगवत्पूजां महतीं च समाचरेत्। महास्नानं प्रकुर्वीत उपचारांस्तथैव च॥ देवस्य सर्वतः स्थाप्य दन्तकाष्ठं जलं कुशाः। मृत्तिकां च हरिद्रां च कुष्ठं गोरोचनादि च॥ पादुकोपानहौ छत्रं चामरं व्यजनं तथा। व्रीह्यादीनि च धान्यानि पुरतः स्थापयेत्ततः। दण्डवत्प्रणिपातैश्च स्तोत्रैर्नानाविधैस्तथा॥ वैदिकैश्च जपैर्देवं यथावत्प्रतिबोधयेत्॥ क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो। मयैतत्क्रियते देव तव तुष्ट्यै पवित्रकम्। न मे विघ्नो भवेदत्र कुरु नाथ दयां मयि॥ सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः। उपवासेन देव त्वां तोषयामि जगत्पते॥ कामक्रोधादयो ह्येते न मे स्युर्व्रतघातकाः। अद्यप्रभृति देवेश यावद्वैशेषिकं दिनम्। तावद्रक्षा त्वया कार्या सर्वस्यास्य नमोस्तु ते। एवं विज्ञाप्य देवेशं गुरुपादौ प्रणम्य च। कुर्वीत वैष्णवैः सार्धं पवित्रारोपणं हरेः॥ कुम्भं पुण्याम्बुनापूर्य सर्वतोभद्रके

१ ॐ नमो भगवते वासुदेवायेति। २ मण्डले। ३ पानहश्छत्रं। ४ रपि।

Scanned with CamScanner

शुभे । स्थापयेत्पुरतो विष्णोस्तत्र सूत्राणि पूजयेत् ॥ संवत्सरस्य यागस्य पवित्रीकरणाय भोः । विष्णोर्लोकात्पवित्राद्य आगच्छेह नमोस्तु ते ॥ अनेनावाहयेत्सूत्रं मूलमन्त्रयुतेन च । उत्तमादित्रये विद्वान्स्मरेद्देवत्रयं तथा ॥ गुणान्वेदत्रयं चैव ध्यायेल्लोकत्रयं तथा । प्रकृतिं वनपूर्वायां मालायां निखिलात्मिकाम् ॥ द्युलोकं मुकुटे सूत्रे ध्यायेत्तद्वात्रशालिनि ॥ ॐसर्वाभरणचित्राङ्ग सर्वदेवनमस्कृत । लावण्यरूप विश्वात्मन् ज्येष्ठसूत्रं समाश्रय ॥ सर्वलक्ष्मीकर श्रीश सर्वज्ञानमयात्मक । निवृत्तिरूप विश्वात्मन्मध्यसूत्रं समाश्रय ॥ अतिवेग जगद्योने पुरुषात्मन्दिवस्पते । कनीयसि प्रभो देव तेजसा सूत्रमाश्रय ॥ सर्वाधार धरारूप सर्वकर्तः प्रजापते । सर्वगात्मेश सूत्रेषु[1] सान्निध्यं कुरु ते नमः ॥ सर्वरत्नोज्वलाकार ब्रह्माण्डब्रह्मरोचिष । मुकुटोत्तमसर्वाङ्ग शिरस्सूत्र इहेहि भोः ॥ प्रकृते जगतः कर्त्रि सर्वलावण्यदायिनि । श्रीसूत्रे सर्वकल्याणि सान्निध्यं कुरु ते नमः ॥ उत्तमादीनि सूत्राणि क्रमादालभ्य पाणिना । मनुभिर्मन्त्रयेदेतैः पूजयेन्मूलमन्त्रतः ॥ ब्रह्मविष्णुमहादेवास्त्रिसूत्रीदेवताः स्मृताः । ॐङ्कारः सोमवह्नी च ब्रह्मा नागाः शशी रविः । शिवश्च विश्वदेवाश्च नवसूत्र्यधिदेवताः ॥ क्रिया च पौरुषी वीरा विजयेशाऽपराजिता । मनोन्मनी जया भद्रा मुक्तिश्च[2] ग्रन्थिदेवताः ॥ ध्यात्वावाह्यामृतीकृत्य गन्धपुष्पाक्षताङ्कुरैः । धूपदीपान्नताम्बूलैः पवित्राणि बुधोऽर्चयेत् ॥ अथ देवकरे विद्वान्पट्टसूत्रसमुद्भवम् । वितस्तिमानकं दोरं बध्नीयान्मङ्गलात्मकम्[3] ॥ संवत्सरकृतार्चायाः संपूर्णफलदोसि यत् ।

१ सूत्रेस्मिन् । २ मुक्तिश्चिग्रन्थि । ३ मङ्गलात्मके ।

Scanned with CamScanner

पवित्रारोपणायैतत्कुरु दोरंक ते नमः ॥ विष्णुतेजोद्भवं रम्यं सर्वपातकनाशनम् । सर्वकामप्रदं देव तवाङ्गे धारयाम्यहम् ॥ मूलसंपुटितं तस्मै दद्याद्गन्धपवित्रकम् । नीराजयेत्ततो देवं मङ्गलाघोषपूर्वकम् ॥ नैवेद्यं विधिवद्दद्यात्ताम्बूलमनुलेपनम् । उपतिष्ठेत्ततो देवं जितमित्यादिभिः स्तवैः ॥ मन्त्रेणाथ सुरेशानं देवदेवं निमन्त्रयेत् ॥ आमन्त्रितोसि देवेश पुराणपुरुषोत्तम । प्रातस्त्वां पूजयिष्यामि सन्निधौ भव ते नमः ॥ निवेदयाम्यहं तुभ्यं प्रातरेतत्पवित्रकम् । सर्वथा सर्वदा विष्णो नमस्तेस्तु प्रसीद मे ॥ निपतेद्दण्डवद्भूमौ क्षिप्त्वा पुष्पाञ्जलिं पुनः । पूजितान्यथ सूत्राणि कुम्भं ते च पुरः स्थितम् ॥ अस्त्रेण सर्वतो रक्षेत् कवचेनावगुण्ठयेत् । रक्षेद्वा चक्रमन्त्रेण नृहरेर्मनुनाथ वा ॥ ब्राह्मणेभ्यो नमस्कृत्य गुरुपादौ प्रणम्य च । गीतमङ्गलनिर्घोषैः कुर्याज्जागरणं ततः ॥ अधिवासे विधिः प्रोक्तः कथितो नारदादिभिः ॥ इति पवित्राधिवासनम् ॥

अथापरेह्नि प्रातःकृत्यम् ॥ ततः प्रातः समुत्थाय ध्यात्वा देवं यथोदितम् । नित्यपूजां ततः कृत्वा पवित्राणां तथैव च ॥ नीराजयेच्छुभैर्दीपैर्मङ्गलाघोषपूर्वकम् । स्तुत्वा च विविधैः स्तोत्रैर्नत्वा देवं सुरार्चितम् ॥ ततो मङ्गलनिर्घोषैः शङ्खतूर्यादिभिः स्वनैः । गन्धदूर्वाक्षतायुक्तं दद्याद्देवाय सूत्रकम् ॥ ॐ रामराम नमस्तुभ्यं गृहाणेदं पवित्रकम् । पवित्रीकरणार्थाय वर्षपूजाफलप्रदम् ॥ पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतम् । शुद्धो भवाम्यहं देव त्वत्प्रसादात्सुरेश्वर ॥ मूलसंपुटितो ह्येष पवित्रारोपणे मनुः । अङ्गाद्यावृत्तिदेवेभ्य-

१ कंधरते । २ पुटितादस्मात् ।

Scanned with CamScanner

स्ततो दद्यात्स्वनामभिः ॥ नैवेद्यं तु महापूर्वं ततो दद्याच्च भक्तितः। नीराजयेत्ततो देवं रमाकान्तं सुमङ्गलम् ॥ संवीज्य चामरैः पुण्यैर्दर्पणं दर्शयेत्ततः। विविधानि च पुष्पाणि दद्यात्पुष्पाञ्जलिं तथा ॥ प्रार्थयेद्देवदेवेशं मन्त्रैरेतैर्यथाविधि ॥ मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः। इयं सांवत्सरी पूजा तवास्तु गरुडध्वज ॥ वनमालां यथा देव कौस्तुभं सततं हृदि। तथा पवित्रतन्तूंश्च[1] पूजां च हृदये वह ॥ जानताऽजानता वापि न कृतं यत्तवार्चनम्। केनचिद्विघ्नदोषेण परिपूर्णं तदस्तु मे ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन। यत्पूजितं मया देव परिपूर्णं तदस्तु मे। अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ॥ दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर[2]। निपत्य दण्डवद्भूमौ भक्तियुक्तेन चेतसा। प्रणमेद्देवदेवेशं राममिष्टार्थदं बुधः ॥ ततः पवित्रं गुरवे दद्याद्गन्धादिपूर्वकम्। अथैनं पूजयेद्भक्त्या स्वर्णवस्त्रानुलेपनैः॥ ब्राह्मणान्वैष्णवांश्चैव गन्धपुष्पादिनार्चयेत्। भक्त्या प्रतोषयेत्तांश्च वस्त्रभोजनकाञ्चनैः ॥ मासं पक्षमहोरात्रं त्रिरात्रं धारयेत्तथा। देवे तं सूत्रसंदर्भदेशकालविवक्षया ॥ प्रत्यहं स्नानकर्मादौ[3] सूत्राण्युत्तार्य कारयेत्। अभिषिंच्यार्घ्यतोयेन ततो देवं निवेशयेत्। अर्घ्यान्तं देवमभ्यर्च्य विशेषात्पुष्पचन्दनैः ॥ नैवेद्यं विधिवद्दत्ता ततः सूत्रं विसर्जयेत्। सांवत्सरीं शुभां पूजां संपाद्य विधिवन्मम। व्रजेदानीं पवित्र त्वं विष्णुलोकं विसर्जितम्। यावद्देवपवित्राणि तावत्तिष्ठेत्समाहितः ॥ ब्रह्मचारी हविष्याशी देवपूजापरायणः। पवित्रारोपणं काले न करोति कथंचन। तदाऽयुतं जपेन्मन्त्रं स्तोत्रं वापि समाचरेत् ॥ इति पवित्रारोपणम् ॥ इति श्रावणकृत्यम् ॥

---

१ तद्वत्पवित्रतन्तूंश्च, तन्तूनां। २ मधुसूदन। ३ स्नानकार्यादि।

Scanned with CamScanner

अथ भाद्रपदकृत्यम् ॥ अथ भाद्रपदे शुक्लद्वादश्यां कर्णिकोत्सवः । कर्तव्यो वैष्णवैः सार्धं शयन्युत्सववद्धरेः ॥ तथाच कटदानं भविष्योत्तरे—प्राप्ते भाद्रपदे मासि एकादश्यां सितेऽहनि । कटदानं भवेद्विष्णोर्महापातकनाशनम् ॥ इति ॥ शयन्युत्सवरीत्या तु देवं नीत्य जलाशयम् ॥ कटदानोत्सवं कुर्वे इति संकल्प्य पूजयेत् ॥ देवदेव जगन्नाथ योगिगम्य निरञ्जन । कटदानं करिष्येऽद्य प्राप्ते भाद्रपदे शुभे ॥ अनेन कर्णिकावृत्तिं दक्षिणाङ्गे प्रकल्पयेत् । महापूजां ततः कृत्वा पूर्ववत्स्वगृहं व्रजेत् ॥ इति कटदानोत्सवः ॥

विष्णुपरिवर्तनोत्सवः ॥ अत्रैव विष्णुपुराणे परिवर्तनोत्सवः ॥ संध्यायां विष्णुं संपूज्य प्रार्थयेत् । मन्त्रस्तु तिथितत्त्वे—ॐवासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव । पार्श्वेन परिवर्तस्व सुखं स्वपिहि माधव ॥ इति कटदानोत्सवः । इति भाद्रपदकृत्यम् ॥

अथाश्विनकृत्यम् ॥ आश्विनस्य सिते पक्षे दशम्यां विजयोत्सवः । कर्तव्यः सुजनैः सार्धं सर्वत्र विजयार्थिभिः ॥ हनुमद्वाक्यमाकर्ण्य हृष्टातिजनकात्मजा । आनन्दपूर्णैः कपिभिर्विज्ञापितमुपस्थितम् ॥ रथमारोप्य देवेशं सर्वालंकारशोभितम् ॥ सासितूणधनुर्बाणपाणिं नक्तंचरान्तकम् । स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् ॥ रथैरश्वैर्गजैः पद्भिः सौमित्रिसुग्रीवादिभिः । युतं राजोपचारैस्तं शमीं प्रति समानयेत् ॥ शमीविष्ण्वर्चनं कुर्व इति संकल्प्य पूजयेत् । विष्णुधर्मोक्तक्रमेण यात्रानिर्विघ्नसिद्धये ॥ शमीयुक्तं रमाकान्तं भक्तानामभयंकरम् । अर्चयित्वा

१ शयनोत्सववत् । २ मार्गेण । ३ सीतारामं शमीयुक्तं ।

Scanned with CamScanner

शमीवृक्षमर्चयेच्च ततः पुमान् ॥ शमी शमयते पापं शमी लोहितकण्टका । धरित्र्यर्जुनबाणानां रामस्य प्रियवादिनी ॥ करिष्यमाणा या यात्रा यथाकालं सुखं मया । तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते ॥ गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदम् । गीतवादित्रनिर्घोषैस्ततो देवं गृहं नयेत् ॥ कैश्चिदृक्षैस्तत्र भाव्यं कैश्चिदन्यैश्च वानरैः । कैश्चिद्रक्तमुखैर्भाव्यं कोसलेन्द्रस्य तुष्टये ॥ निर्जिता राक्षसा दैत्या वैरिणो जगतीतले । रामराज्यं रामराज्यं रामराज्यमिति ब्रुवन् ॥ आनीय स्थापयेत्सुस्थं दिव्यसिंहासने विभुम् । ततो नीराज्य देवेशं प्रणमेद्दण्डवद्भुवि ॥ देवोपभुक्तवस्त्रादि धारयेत्स्वजनैः सह ॥ इति विष्णुधर्मोत्तरे आश्विनकृत्यम् ॥

अथ कार्तिककृत्यम् ॥ प्रबोधोत्सवः ॥ आरभ्यैकादशीं शुक्लामाश्विनस्य तु जागरम् । प्रबोध्य देवं कुर्वीत स्कान्दवाक्याद्द्विजोत्तम ॥ जागरं कार्तिके मासि यः करोत्यरुणोदये । दामोदराग्रे विप्रेन्द्र गोसहस्रफलं लभेत् ॥ कार्तिके पश्चिमे यामे स्तवं गीतं करोति यः । वसते श्वेतवैकुण्ठे पितृभिः सह नारद ॥ न करोति हि यो मूढः कार्तिकेऽरुणजागरम् । स याति नरकं घोरमिति पाद्मविगानतः ॥ नीराज्येशं ततः स्नायाद्विधिवत्तुष्टये हरेः । व्रतं चरेत्तथा किंचिच्छक्त्योर्जमहिमानकम् ॥ अव्रतेन क्षिपेद्यस्तु मासं दामोदरप्रियम् । तिर्यग्योनिमवाप्नोतीत्यादिपाद्माभिधानतः ॥ अथ कार्तिकशुक्लार्के कृत्वा तप्ताङ्कधारणम् । शयन्युक्तप्रकारेण रथमारोप्य माधवम् ॥ विधाय महतीं पूजां विष्णोरभ्यर्च्य वैष्णवान् ।

१ प्रार्थयेच्च पुनः पुनः । २ धारिण्यर्जुन ।

Scanned with CamScanner

वाद्यघोषेण महता देवं नीत्वा जलाशये ॥ धौताङ्घ्रिपाणिः कुर्वीत संकल्पं वैष्णवैः सह । एवंगुणविष्टायां बोधिन्यामिन्दिरापतेः ॥ कुर्वे प्रबोधनमथ वा पुरोक्तान्मनून्पठेत् ॥ ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वन्दित वन्दनीय । बुध्यस्व देवेश जगन्निवास मन्त्रप्रभावेण सुखेन देव ॥ इयं च द्वादशी देव प्रबोधाय विनिर्मिता । त्वयैव सर्वलोकानां हितार्थं शेषशायिना ॥ [उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते ।] त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदम् । उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव ॥ इदं विष्णुरनेनाम्बुतल्पादुत्थापयेत्प्रभुम् । प्राजापत्यं च गायत्रं वैष्णवं सर्वकामदम् । (हिरण्यगर्भ इति च प्राजापत्यं पठेत्तथा ॥ गायत्रं वैष्णवं सूक्तमतोदेवा अवन्त्विति ।) उत्तिष्ठोत्तिष्ठ गोविन्द योगनिद्रां विहाय च ॥ अनेन मनुनोत्थाप्य घण्टावादित्रनिस्वनैः । तीरे समुपवेश्येशं महानुग्रहमर्थयेत् ॥ सोऽसावदभ्रकरुणो भगवान्प्रबुद्धप्रेमस्मितेन नयनाम्बुरुहं विजृम्भन् । उत्थाय विश्वविजयाय च नो विषादं माध्व्या गिरापनयतात्पुरुषः पुराणः ॥ इति पुष्पाञ्जलिं दत्त्वा सूक्तमाथर्वणं जपेत् । स्नापयेद्राघवं पञ्चामृतैः पुरुषसूक्ततः ॥ नीराज्य मन्त्रं विन्यस्य वस्त्रालंकारचन्दनैः । स्रग्धूपदीपदिव्यान्नताम्बूलैस्तोषयेत्प्रभुम् ॥ एवं कृत्वा महापूजां गृहीत्वा साक्षतं जलम् । प्रतिमासव्रतान्युक्त्वा राघवाय निवेदयेत् ॥ अनुष्ठितैर्मया नानाचातुर्मास्यव्रतैः प्रभुः । प्रभूतपातकस्यान्ते राघवः प्रीयतां मम ॥ एवं व्रतान्यर्पयित्वा स्तुवीत परमादृतः॥ श्रुतिस्तुत्या

१ जलाशयम् । २ प्रबोधार्थं । ३ हितार्थं । ४ चोत्थितं । ५ देवेश । ६ विहाय । ७ °म्बुजजृम्भणेन ।

Scanned with CamScanner

वेदवादबोधमानं रमापतिम् । 'जयजय जय जह्यजां' इत्यादिवेद-स्तुतिः । स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायन्तु भूतानि शिवं मिथो धिया । मनश्च भद्रं भजतामधोक्षजे आवेश्यतां नो मतिरप्यहैतुकी ॥ इत्याशिषः समभ्यर्थ्य गीतवाद्यजयस्वनैः । रथमारोपयेद्विष्णुं जनानानन्दयन्मुहुः । रथारूढे महाविष्णौ ये कुर्वन्ति जयस्वनैः । पूजां तेऽखिलपापेभ्यो मुक्ता यान्ति हरेः पदम् ॥ युक्तं सैन्यादिवाहैर्मरकतसुरणत्किङ्किणीजालमालारत्ना-द्यैर्मौक्तिकानामविरतमणिभिः संभृतैश्चैव हारैः । हैमैः कुम्भैः पताकाशिवतररुचिभिर्भूषितैः केतुमुख्यैश्छत्रैर्ब्रह्मेशवन्द्यो दुरि-तहतिकरैः पातु जत्रो रथो नः[1] ॥ पलायध्वं पलायध्वं रे रे दिति-जदानवाः । संरक्षणाय लोकानां रथारूढो नृकेसरी ॥ इत्यादि-विष्णुधर्मोक्तमन्त्रैः संतोष्य सादरम् । प्रसादमालां नृहरेर्गृह्णीयाद्भ-क्तिभावतः ॥ जय देव महादेव जय रामाखिलेश्वर[2] । वरदेशा-खिलं विश्वं रक्ष रक्ष रमापते[3] ॥ जय सीतापते देव जय दैत्य-निषूदन । देवदेवाखिलाधार पाहि नः शरणागतान् ॥ ॥ अथ रथोत्सवप्रकारः ॥ नृत्यैर्वाद्यैर्भागवतैर्घण्टावाद्यजयस्वनैः । भ्राम-येत्स्यन्दनं विष्णोः पुरमध्ये समन्ततः ॥ रथस्याकर्षणे पूर्वं पुरतो दैत्यनायकाः । ततः[4] सुराः सिद्धसंघा मुनिगन्धर्वमानवाः ॥ यावत्पदानि कृष्णस्य रथस्याकर्षणं नरः । करोति क्रतुभिस्तानि तुल्यानि नरनायक ॥ रथेन सह गच्छन्ति पुरतः पृष्ठतोऽग्रतः । महाविष्णुसमा ह्येते भवन्त्यङ्घ्रिभवा अपि ॥ श्रीकृष्णरथशोभां ये कुर्वन्ति[5] च वदन्ति च । जयेति च पुनर्ये वै तेषां लोकाः

---

१ वः । २ देवदेवाखिले० । ३ जगत्पते । ४ सुराश्च सिद्धसंघाश्च ५ शकुर्वन्ति वदन्ति वा ।

Scanned with CamScanner

सनातनाः ॥ रथस्थितो नरैर्[1]यस्तु पूजितो मधुसूदनः । ददाति वाञ्छितं तेषामन्ते च परमां गतिम् । दोलायमानं गोविन्दं रथस्थं मधुसूदनम् । नृणां भक्त्या सकृद्दृष्ट्वा पुनर्जन्म न विद्यते । रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते ॥ रथस्थं ये न गच्छन्ति भ्रममाणं जनार्दनम् । विप्रा[2] वेदविदस्तेऽपि विज्ञेयाः श्वपचाधमाः ॥ येषां गृहाग्रतो याति रथस्थः श्रीनृकेसरी । पूजा तैस्तैः प्रकर्तव्या वित्तशाठ्यविवर्जितैः ॥ अनर्चितो यदा याति प्रमादात्स्वगृहाद्बहिः । पितरस्तस्य विमुखा यावत्संवत्सरं नृप ॥ स्त्रियोपि मुक्तिमायान्ति रथयात्रापरायणाः । नीराजनेन गीतेन जायन्ते मण्डलेश्वराः ॥ रथोत्सवस्य माहात्म्यं कलौ वितनुते हि यः । सशैलवनसस्या[3]ढ्या तेन दत्ता वसुन्धरा ॥ इति पद्मपुराणोक्तैर्भ्रामयित्वा रथं गृहम् । गत्वा नीराज्य देवेशं शयीत राघवं स्मरन् ॥ इति रथमहोत्सवः ॥

अथ संध्यायां त्रिपुरोत्सवः ॥ पौर्णमास्यां तु संध्यायां कर्तव्यस्त्रैपुरोत्सवः । दद्यादनेन मन्त्रेण सुदीपांश्च सुरालये ॥ कीटाः पतङ्गा मशकाश्च वृक्षा जले स्थले ये विचरन्ति जीवाः । दृष्ट्वा प्रदीपं नच जन्मभागिनो भवन्ति सत्यं श्वपचोपि विप्राः ॥ इति स्कान्दे त्रिपुरोत्सवः ॥ इति कार्तिककृत्यम् ॥

अथ मार्गशीर्षकृत्यम् ॥ मार्गशीर्षे त्वेकभक्तं कृत्वा योऽभ्यर्चयेद्धरिम् । भोजयित्वा द्विजान्भुक्तः स्यादित्याह कलिप्रियः ॥ नक्तव्रतेन यो मासं मार्गशीर्षं हरिप्रियम् । नयेदसौ नरो याति विष्णुलोकं सनातनम् ॥ इति विष्णुधर्मोक्तं मार्गशीर्षकृत्यम् ॥

---

१ नरैर्विप्र। २ विप्रस्ते वेदविद्विष्टा। ३ देशाढ्या।

Scanned with CamScanner

अथ पौषमाघयोः कृत्यम् ॥ पौषस्यैकादशीं शुक्लामारभ्य स्थण्डिलेशयः। मासमात्रं रघुप्रीत्यै द्विवारं स्नानमाचरेत् ॥ त्रिकालमर्चयेद्रामं त्यक्तभोगो जितेन्द्रियः। माघस्य द्वादशी शुक्ला भवेत्पुण्यफलप्रदा ॥ मासमर्धं तदर्धं वा दशाहं वा तदर्धकम्। कृत्वा याति हरेः स्थानं पूजां दध्योदनोत्सवम् ॥ विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरम्। पितृभ्यश्चैव तद्देयं तदानन्त्याय कल्पते ॥ पितृशेषं तु यो दद्याद्धरये परमात्मने। रेतोदाः पितरस्तस्य भवन्ति क्लेशभागिनः ॥ गीतैर्वाद्यैश्च नृत्यैश्च दधिभक्तं समर्पयेत्। अर्पयित्वा हरौ भक्त्या प्रसादमानयेत्ततः। यः प्रसादं हरेर्भक्त्या गृह्णाति प्रददाति च। भुनक्ति वैष्णवैः सार्धं सोऽनन्तफलमश्नुते ॥ इति पाञ्चरात्रे पौषमाघयोर्दध्योदनमहोत्सवः ॥

अथ फाल्गुनकृत्यम् ॥ तपस्ये पौर्णमास्यां तु प्रकुर्याद्धोलिकोत्सम्। [1]वसन्तार्चां प्रकुर्वीत परमानन्दरूपिणे ॥ प्रभाते विमले जाते प्रतिपद्भास्करोदये। कृत्वा चावश्यकं कर्म संतर्प्य पितृदेवताः ॥ वन्दयेद्धोलिकाभूतिं सर्वदुष्टोपशान्तये ॥ वन्दितासि सुरेन्द्रेण ब्रह्मणा शङ्करेण च। अतस्त्वं पाहि भूतेभ्यो भूते भूतिप्रदा भव ॥ ॥ आम्रकुसुमप्राशनम् ॥ प्रातर्वसन्तसमये रमणं रमाया अभ्यर्च्य चन्दनरसालमृदुप्रवालैः। प्राश्यानि चूतकुसुमानि निवेद्य देवं संतोषयेद्विविधगीतविनोदनृत्यैः ॥ मण्डिते चर्चिते शुद्धे उपलिप्ते गृहाजिरे। चतुष्कं कारयेच्छ्रेष्ठं वर्णकैश्चाक्षतैः शुभैः ॥ तन्मध्ये स्थापयेत्पीठं

---

1 वसन्तोत्सवं।

शुक्लवस्त्रोत्तरच्छदम्। अग्रतः पूर्णकलशं स्थापयेत्पल्लवैर्युतम्॥ आसने चोपविष्टस्य ब्रह्मघोषेण भारत। अभिषेकः प्रकर्तव्यः सदूर्वैश्चूतपल्लवैः॥ कुसुमं चूतवृक्षस्य वसन्तनवपल्लवम्। संग्राशयामि सुखदमायुरारोग्यवर्धनम्॥ ये पिबन्ति वसन्तादौ चूतपुष्पं सचन्दनम्। सम्यग्हृदिस्थकामस्य पूजां ते कुर्वते जनाः॥ अनन्तरं द्विजेन्द्राणां सूतमागधबन्दिनाम्। दद्याद्दानं यथाशक्त्या कामात्मा प्रीयतामिति। ततो भोजनवेलायां श्रुतं प्रागेव तद्दिने। प्राशयेत्प्रथमं चान्नं ततो भुञ्जीत कामतः॥ सायं चतुष्कगश्वेतच्छदपीठस्थितान् शुचीन्। रत्नकुम्भाम्भसा चूतपल्लवैरभिषेचयेत्॥ एवं यः कुरुते पार्थ शास्त्रोक्तं फाल्गुनोत्सवम्। मत्प्रसादाच्च सिध्यन्ति तस्य सर्वे मनोरथाः॥ वृत्ते तुषारसमये सितपञ्चदश्यां प्रातर्वसन्तसमये समुपस्थिते च। संग्राश्य चूतकुसुमं सह चन्दनेन सत्यं हि पार्थ पुरुषोऽब्दशतं सुखी स्यात्॥ इति भविष्योत्तरे भगवदुक्तो वसन्तोत्सवः॥ इति फाल्गुनकृत्यम्॥

अथाधिकमासकृत्यम्॥ अधिमासे तु संप्राप्ते स्मृत्वा सीतापतिं हरिम्। सुवर्णेनाज्यसंयुक्तांस्त्रयस्त्रिंशदपूपकान्॥ दद्याच्च वेदविदुषे श्रोत्रियाय कुटुम्बिने। नश्यत्यकरणे शीघ्रं पुण्यं द्वादशमासजम्॥ इति भविष्योत्तरेऽधिकमासकृत्यम्॥

अथ दशमीसंकल्पः॥ द्वादशस्वपि मासेषु पक्षयोरुभयोरपि। दिण्ड्युत्सवः प्रकर्तव्य एकादश्यां च जागरः॥ दशम्यां प्रातरुत्थाय कृतमैत्रादिको व्रती। देवार्चनक्रियां कृत्वा कुर्यात्संकल्पमादृतः॥ दशमीदिनमारभ्य करिष्येऽहं व्रतं

Scanned with CamScanner

तव। त्रिभिर्दिनैश्च देवेश निर्विघ्नं कुरु मे[1] विभो॥ इत्युच्चार्यार्पयेत्पुष्पाञ्जलिं श्रीरामपादयोः। शङ्खोदकेन संकल्प्य प्रणमेद्दण्डवद्विभुम्॥ इति दशमीसंकल्पः॥ ॥अथैकादशीसंकल्पः॥ एकदश्यां तु पर्णाद्यैर्निर्वर्त्य दन्तधावनम्। स्नात्वा देवार्चनं कृत्वा व्रतसंकल्पमाचरेत्॥ एकादश्यां निराहारः स्थित्वाहमपरेऽहनि। भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाव्यय॥ इत्यञ्जलिं च मन्त्रेणार्पयेद्देवलवाक्यतः[2]। गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः॥ उपवासं गृहीत्वाथ मन्त्रपूतं जलं[3] पिबेत्। इत्येकादशीसंकल्पः॥ ॥अथ द्वादशीसंकल्पः॥ कृत्वा चावश्यकं सर्वं द्वादश्यां व्रतमर्पयेत्। अज्ञानतिमिरान्धस्य व्रतेनानेन केशव। प्रसादसुमुखो नाथ ज्ञानदृष्टिप्रदो भव॥ इति द्वादशीसंकल्पः॥ अन्यः प्रकारः॥ भविष्योक्तप्रकारेण कुर्याद्वा त्रिदिनव्रतम्। प्रसिद्धत्वात्तदस्माभिः कर्तव्यं न प्रपञ्चितम्॥ कृष्णजन्माष्टमी मुख्या धर्मतो नागमोदिता। तत्तच्छास्त्रात्तु विज्ञेया वैष्णवी वैष्णवैर्नरैः॥ प्रसिद्धत्वान्न चोच्यन्ते ग्रन्थविस्तारभीतितः। प्रसिद्धस्य सुसंकोचो ह्यप्रसिद्धस्य विस्तरः। चैत्रादिषूदितोऽस्माभिः कर्तव्यश्चेशतुष्टये॥ ॥उपसंहारः। ब्रह्मानन्दनिमग्नस्य नालं मे स्यात्स्थिरं मनः। त्वत्पादपद्मगन्धेन यथा स्याज्जानकीपते। न कामतापो न तमोस्ति मे यतः प्रकाशिता तेऽर्चनचन्द्रिकेयम्। तुष्टो भव त्वं सुकृतेन तेन यस्मात्त्वदन्यन्न हि रामचन्द्र॥ रामोस्मीत्यविपन्नधीरविमुखं रामं भजे तद्वधे यद्रामेण वियुक्त-

---

१ केशव। २ इति चाञ्जलिपात्रेणार्पयेत्। ३ पिबेज्जलम्।

मेतदखिलं रामाय तच्चार्पये । रामादेतदभिन्नमेव चरितं रामस्य को वेत्ति तत् रामे सर्वमिदं विलीयत अतो मे राम साम्यं तनु ॥ कार्कश्यं दशकन्धरो रघुपतेः सन्मार्दवं मैथिली दातृत्वं च बिभीषणो बहुविधं स्नेहं पुनर्लक्ष्मणः । स्वामित्वं हनुमानुपैत्युपकृतिं देवा वियोगं पिता कोपानुग्रहमम्बुधिर्वयमपि प्रेमाङ्घ्रिजं सांप्रतम् ॥ संसारदावानलतापशान्त्यै श्रीरामचन्द्रार्चनचन्द्रिकेयम् । स्यात्संहितामार्गमुपाश्रयद्भिर्भवादिभिर्निर्मितमौषधं यथा ॥ पटलैः पञ्चभिः प्रोक्ता श्रीरामार्चनचन्द्रिका । आनन्दवननाम्ना हि यतिना रामतुष्टये ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्मुकुन्दवनश्रीचरणशिष्यानन्दवनविरचितायां श्रीरामार्चनचन्द्रिकायां पञ्चमः पटलः ॥ ५ ॥

समाप्तेयं श्रीरामार्चनचन्द्रिका ॥

नामाद्याक्षरमारभ्य यावन्मन्त्रादिवर्णकम् ।
द्विधा कृत्वा स्वरैर्भित्त्वा तदन्यद्विपरीतकम् ॥
कृत्वाधिको ऋणी ज्ञेयो ऋणी चेन्मन्त्र उत्तमः ।
स्वयं ऋणी चेत्तन्मन्त्रं त्यजेत्पूर्वऋणी यतः ॥

इति मन्त्रराजे ॥

१ कविना हरितुष्टये ।

Scanned with CamScanner

विक्रेयाणि संस्कृतपुस्तकानि ।

	किं. रु.	आ.	ट. रु.	आ.
आचाररत्न–(आह्निकग्रन्थ)	१	०	०	४
आह्निकचंद्रिका—(सायनमन्त्रभाष्यासह) ...	०	१४	०	४
उत्सर्जनोपाकरणविधि—(ऋग्वेदी श्रावणी) ...	०	४	०	॥
ऋग्वेदी नित्यविधि.	०	८	०	२
कुंडरत्नावलि (सटीक)—कुंडांच्या ६४ आकृतींसह.	१	४	०	[illegible]
गणेशसहस्रनामावलि.	०	३	०	१
त्रिकालसंध्या ऋग्वेदीया.	०	१॥	०	१
त्रिकालसंध्या हिरण्यकेशीया (आपस्तंबीया). ...	०	१	०	१
त्रिकालसंध्या यजुर्वेदीया.	०	१	०	१
त्रिसुपर्ण.	०	१	०	१
दत्तात्रयसहस्रनामावलि.	०	४	०	१
देवीसहस्रनामावलि.	०	३	०	१
नित्यकर्मपद्धति.	०	२	०	१
पंचायतनदेवाच्या पृथक अष्टोत्तर शतनामावलि.	०	३	०	१
पूजासमुच्चय–यांत ९२ पूजा व १३ नामावली १०५ विषय आहेत.	१	०	०	४
प्रतिसांवत्सरिकश्राद्धप्रयोग.	०	६	०	१
प्रयोगरत्न–नारायणभट्टी उत्तरनारायणभट्टी अंत्येष्टि समंत्रक.	२	०	०	८
प्रयोगपारिजातस्य–नृसिंहीयस्य—प्रथम षोडशसंस्कारकाण्डम्. यांत आलेल्या मंत्रांचे अर्थ दिले आहेत.	४	०	०	१२
प्रातःस्मरण.	०	१॥	०	१
ब्रह्मकर्मसमुच्चय–ऋग्वेदी—(विषय ३८८) हा ग्रंथ भिक्षुकवर्गाच्या संग्रहीं असणें मोठ्या अगत्याचें आहे.	२	१२	०	१२

पाण्डुरङ्ग जावजी–निर्णयसागराध्यक्षः,

पो० काळबादेवी, मुंबई.

Scanned with CamScanner